ब्रह्मनेमिदत्तविरचितनेमिनाथपुराणस्य पाठसमीक्षात्मकम् सम्पादनम्

शोधनिर्देशकः

प्रो. डॉ. श्रीयांशकुमारसिंघई
आचार्योऽध्यक्षश्च
जैनदर्शनप्राकृतविद्याशाखा
के.सं.वि.वि. जयपुरपरिसरः
जयपुरम्

अनुसंधात्री

प्रतीतिः जैनः
शोधच्छात्रा
जैनदर्शनप्राकृतविद्याशाखा

जैनदर्शनप्राकृतविद्याशाखा

केन्द्रीयसंस्कृतविश्वविद्यालयः
जयपुरपरिसरः, जयपुरम्
सत्रम्- 2023

" अथ श्री नेमिनाथपुराणम् "

प्रथमोऽधिकारः

श्रीमन्नेमिजिनं[1] नत्वा लोकालोकप्रकाशकम्[2]।
तत्पुराणमहं वक्ष्ये भव्यानां सौख्यदायकम्।।1।।

नमद्देवेन्द्रमौलीनां लसत्कांतिसरोजले[3]।
यस्य पादद्वयं प्राप्य[4] प्रोल्लसत्कमलश्रियम्।।2।।

यो नेमिर्धर्मचक्रस्य नेमिर्जातं प्रवर्त्तने।
तं स्तुवे भुवनांभोजभास्करं[5] नेमिनायकम्।।3।।[6]

सर्वसौभाग्यसंदोहं सर्वशक्रसमर्चितम् ।
यो भवत् सर्वसौख्यानां कारणं भव्यदेहिनाम्।।4।।[7]

यस्य नामस्मृतिश्चापि करोति परमं सुखम्।
प्रभावाद् भास्करस्यौच्चैर्विकासं कमलाकरे ।।5।।

यज्जन्मनोऽपि प्रीत्या सर्वदेवेन्द्रसंततिः ।
रत्नवृष्ट्यादिभिर्भवत्या सेवांचक्रे निरन्तरम्।।6।।

1.श्रीमन्नेमिर्जिनं इति स प्रतौ

2. लोकालोकप्रकसकं इति ब प्रतौ

3. सरोवरे इति स प्रतौ,

4. प्राप इति ब, स , द प्रतीनाम्

5. भवनांभोजभास्करं इति अ-स प्रतयोः

6.स प्रतौ श्लोकः अनुपलब्धः

7.तीर्थेशान् वृषभाधीशैः सुराधीशैः वर्द्धमानात् ।
नायकान् ज्ञानसंपन्नान् संनमामि जगद्धितान् ।। इति स प्रतौ अतिरिक्तः

तं नमामि जगत्सारं स्वर्गमोक्षसुखप्रदम्[1] ।
नेमिनाथं महाभक्त्या[2] सत्पुराणप्रसिद्धये[3] ।।7 ।।

वंदे श्री वृषभाधीशं सुराधीशार्चितक्रमम्।
येनाभ्यधायिसद्धर्मो विनयेन विना श्रमम्[4]।।8।।

अजितं जितकंदर्पन्तं नमामि जगद्धितम्।
योजितो नैव पूतात्मा रागद्वेषादिशत्रुभिः।।9।।[5]

संभवं भवसंतापं संदोहक्षयकारकम्।
वंदेऽभिनंदनं देवं देवदेवाधिनायकम्।।10।।

संस्तुवे सुमतिं देवं भव्यानां सुमतिप्रदम्।
पद्मप्रभं प्रभाधीशं प्रसिद्धमहिमास्यदम्[6] ।।11।।

श्री सुपार्श्वजगत्सारं[7] संपदा शर्मसाधनम्[8] ।
चंदप्रभं प्रभासारं सर्वक्लेशविनाशनम्[9]।।12।।

पुष्पदं तं लसत्कुंदं पुष्पसत्कांतिसुंदरम्।
वंदेऽहं शीतलं प्रीत्या[10] शीतलोत्तं वाग्भरम्।।13।।

श्रेयो जिनं नमाम्युच्चैः सारश्रेयो निबंधनम्।
वासुपूज्यं जगत्पूज्यं प्रबुद्धकमलाननम्।।14।।

1.स्वर्गमोक्षनिबंधनं इति अ-ब-द प्रतीनाम्,

2.तया इति अ-द प्रतयोः,

3. तत्पुराणप्रसिद्धये इति द प्रतौ

4.अजितं जितकंदर्पं त्रैलोक्य जनताहिते इति द्वितीयपादं स प्रतौ

5. स प्रतौ श्लोकोनास्ति

6. प्रकृष्टमहिमास्यदम् इति स प्रतौ

7. सुपार्श्वजिनाधीशं इति स प्रतौ.

8. संपदासौख्यकारकं इति स प्रतौ,

9. संसारांभोधितारणं इति स प्रतौ

10.देवं इति स प्रतौ

नमामि विमलाधीशं केवलज्ञानभास्करम्।
वंदेऽनंतजिनं भक्त्यानंतानंतसुखाकरम्।।15।।

धर्मसद्धर्मतीर्थेशं सुरासुरसमर्चितम्[1] ।
शांतिनाथं भजाम्येनं[2] सर्वभव्यैकसंमतम्।।16।।

वंदे कुंथुजिनाधीशं कुंथ्वादौ च दयास्पदम्।
अरं देवं सदा वंदे सारं सारं रमाप्रदम्।।17।।

मल्लिं मोहारिसंमल्लं वंदे निःशल्यधामकम्।
सुव्रतं संनमाम्येतं मुनिसुव्रतनायकम् ।।18।।

श्रीनमिं संस्तुवे देवं नमद्देवेन्द्रसंस्तुतम्।
नेमिनाथं जगन्नाथं वंदे सर्वामरार्चितम्।।19।।

प्रसिद्धमहिमासारं पार्श्वनाथजिनेश्वरम्।
वंदे श्रीवीरतीर्थेशं वीरवीरं सुखाकरम्।।20।।

एते तीर्थकराधीशाः सर्वदेवेन्द्रवंदिताः ।
सन्तु मे शांतिकर्त्तारश्चान्ये कालत्रयोद्भवाः ।।21।।

त्रैलोक्यशिखरारूढा सिद्धाः संसारपारगाः[3] ।
ते मे नित्यं समाराध्या सन्तु सत्कार्यसिद्धिदाः ।।22।।

वंदेऽहं भारती जैनी जगद्ध्वांतविनाशिनी ।
भासिनी सर्वतत्त्वानां भानुभामेव निर्मलाम्।।23।।

रत्नत्रयपवित्राणां मुनीनां शर्मकारिणाम्।
पादांभोजद्वयं वंदे संसारांभोधितारणम्।।24।।

शुद्धश्रीमूलसंघाख्ये प्रोत्तुंगोदयभूधरे।
भानुर्भट्टारकः स्वामी जीयान्मे मल्लिभूषणः।।25।।

1.सुरासुरनमस्कृतम् इति स प्रतौ,
2.भजाम्येषः इति अ-ब-द प्रतीनां, नमाम्येष इति स प्रतौ
3.सर्वेन्द्रवंदिताः इति स प्रतौ

मोक्षमार्गप्रदीपाय गुरवो गुणमंडिताः।
हृतपंकजे वसन्तूच्चैस्ते मे सद्बोधसिंधवः।।26।।

इत्याप्तभारती साधुपादांभोजद्वयस्मृतिः।
अस्तु मे सत्पुराणोरूप्रासादकलशश्रिये।।27।।

यत्पुराणं पुराप्रोक्तं गुणभद्रादिसूरिभिः।
तद्वक्ष्ये तु तुच्छबोधोऽहं किमाश्चर्यमतःपरम् ।।28।।

सौर्ये विद्योतिते[1] मार्गे किरणैस्तमसःक्षये[2] ।
चक्षुष्मान् को न वागच्छेल्लीलया परया जनः।।29।।

तथाहि तत्प्रसादेन तुच्छबोधोपि भक्तितः।
प्रसिद्धैः संस्कृतश्लोकैः श्रीमन्नेमिजिनेशिनः।।30।।

वृत्तं सर्वोपकाराय स्वात्मनश्च हिताय वै।
संक्षेपेण समाश्रित्य सत्पवित्रो भवाम्यहम्।।31।। युग्मं ।।

समस्तं यदि पीयूषं प्राप्यते नैव सर्वथा।
किं तदा स्पर्शमात्रेण सुखी न स्यात् सुधीर्जनः[3]।।32।।

इत्याकलय्य सद्भावं प्रेर्यमाणं स्वबांधवैः।
आचार्यैः सिंहनंद्याख्यैर्भूरिभव्यहितार्थिभिः।।33।।

स्वशक्त्या नेमिनाथस्य सत्पुराणं सतां ब्रुवे।
युक्तं मंदोऽपि शूरत्वं याति सद्वाक्यपोषितः।।34।।

यथा श्रीगौतमस्वामी संज्ञानमयविग्रहः।
श्रेणिकं प्रश्नतः प्राह सत्पुराणमिदं शुभम्।।35।।

---

1. सौर्ये र्वा इति द प्रतौ,
2. निर्गते ध्वांत संचये इति स प्रतौ
3.कदाचनःइति स प्रतौ

श्रीमन्महापुराणे च त्रिषष्टिपुरूषाश्रिते।
धर्मार्थकाममोक्षाणां कारणं प्रथमं परम्।।36।।

तेन क्रमेण संक्षेपात्छ्रीमन्नेमिजिनेशिना ।
पुराणं भक्तितो बुद्ध्या विहीनोऽपि सतां ब्रुवे[1]।।37।।

श्रुण्वन्तु सुधियो भव्यास्तत्पुराणं सुखावहम्।
श्रुतेन येन भव्यानां भवन्ति सुखकोटयः ।।38।।

पूर्वं सद्भिस्तु वक्तव्यं पुराणादौ सतां मुदे।
वक्तृश्रोतृकथानां च लक्षणं क्रमसूचकम्।।39।।

सदुक्ता सर्वशास्त्रज्ञो धर्मज्ञो[2] नीतितत्त्ववित्[3] ।
आचारवान् विचारज्ञःक्षमावांल्लोकसंमतः।।40।।

श्रीसर्वज्ञपदांभोजसेवनैकमधुव्रतः।
दृष्टोत्तरं कृपायुक्तो निगर्वः सर्वदा शुचिः।।41।।

एतैर्गुणैः समायुक्तो यो वक्ता संभवेद् भुवि।
भव्यानां स्वात्मनश्चापि तारकः सम्मतो बुधैः।।42।।

श्रोता देवः गुरूत्कृष्टः भक्तिभारेण मंडितः।
दुराग्रहैःपरित्यक्तो दाता साधर्मिवत्सलः।।43।।

पात्रापात्रविभेदज्ञो गुणदोषविचारवान्।
कामक्रोधविनिर्मुक्तः शुश्रुषादिगुणैर्युतः।।44।।

कथाभेदास्तथाचार्यैः संप्रोक्तास्ते चतुर्विधाः।
तान्वक्ष्येऽहं यथाशास्त्रं श्रुण्वन्तु सुधियो जनाः।।45।।

1.भक्तिभारान्वितो बुध्या प्रहीणोपि सतां ब्रुते इति द्वितीयपादं स प्रतौ
2.लोकज्ञो इति स प्रतौ,
3. धर्मतत्त्ववित् इति स प्रतौ

आक्षेपिणी कथा पूर्वा कथा विक्षेपिणी परा।
संवेगिनी कथा चान्या कथा निर्वेदिनी मता॥46॥

तथैतासां कथानां च भव्यानां कृतसंपदाम्।
अनुक्रमेण संवक्ष्ये लक्षणं विदुषां प्रियम्॥47॥

स्थाप्यते हेतुदृष्टांतैः स्वमतं यत्र पंडितैः।
स्याद्वादध्वनिसंयुक्ता सा कथाक्षेपिणी मता॥48॥

मिथ्यादृशां मतं यत्र पूर्वापरविरोधकृत्।
तन्निराक्रियते सद्भिः सा च विक्षेपिणी कथा॥49॥

यत्र तीर्थंकरादीनां पुराणानि विशेषतः।
सद्धर्मजं फलाख्यानं सात्र संवेगिनी कथा॥50॥

यत्र संसारभोगांगः स्थितिलक्षणवर्णनम्।
वैराग्यकारणं भव्यैः सोक्ता निर्वेदिनी कथा॥51॥

एताः कथाश्चतस्त्रोऽपि सत्कथाः पुण्यहेतवः ।
रागद्वेषादिकं यत्र केवलं विकथा हि सा ॥52॥

ततः पुण्यानुकारीदं सत्पुराणं जगद्धितम् ।
श्रीमन्नेमिजिनेन्द्रस्य पूर्वयोगसमुद्भवम् ॥53॥

ये पठन्ति महाभव्यान् पाठयन्ति परानपि ।
श्रृण्वन्ति भक्तितो नित्यं ते लभन्ते परं सुखम् ॥54॥

उक्तं च- इदमर्चयतां शांतिस्तुष्टिः पुष्टिश्च पृच्छताम् ।
पठतां क्षेममारोग्यं श्रृण्वतां कर्मनिर्जराम् ॥55॥[1]

इत्यादिपीठिकां कृत्वा संक्षेपेण सतां मतः ।
स्वामिनो भवसंबंधो यथा शास्त्रं प्रचक्षते[2] ॥56॥

---

1. स प्रतौ अनुपलब्धः
2.वर्णनं हरिवंशस्य इति स प्रतौ

(शार्दूलविक्रीडित)

यो देवेन्द्रनरेन्द्रचन्द्रविलसन्मौलीवदरत्नप्रभा ।
पानीय प्रविधौतपूतचरणांभोजद्वयो निर्मलः ।
लोकालोकविलोकनैकचतुरश्चिंतामणिः प्राणिनाम् ।
स श्रीनेमिजिनेश्वरो गुणनिधिः कुर्यात् सतां मंगलम् ॥57॥[1]

इति त्रिभुवनैकचूड़ामणिश्रीनेमिजिनपुराणे भट्टारकश्रीमल्लिभूषणशिष्याचार्य-श्रीसिंहनंदिनामांकिते ब्रह्मनेमिदत्तविरचिते पीठिकाव्यावर्णनो नाम प्रथमोऽधिकारः ॥1॥

1.अ प्रतौ अनुपलब्धः

द्वितीयोऽधिकारः

अथ जंबूमतिद्वीपे समीपे सारसंपदाम्।
नाभिस्थाने महामेरुः सुदर्शनसमाह्वयः ॥1॥[1]

स्वर्णकायो महातुंगोश्चतुर्वनपरिष्कृतः।
सर्वद्वीपसमुद्राणां पतिर्वा पट्टकूलभाक्॥2॥[2]

सीतासीतोदिके नद्यौ यत्पर्यंतेति निर्मले।
विराजन्ते सुगंभीरे भूपतेर्वा कुलस्त्रियौ॥3॥[3]

यद्वनेषु जिनेन्द्राणां प्रासादाः प्रविरेजिरे।
चतुर्दिक्षु समुत्तुंगा प्रतिमाभिर्मनोहराः ॥4॥[4]

रूत्वाख्यं वर्तते यस्य बालाग्रांतरमस्तके[5] ।
विमानं भाति विस्तीर्णं छत्राकारं मनोहरम्॥5॥[6]

ज्योतिष्चक्रं विभात्येतद् यं च नित्यं परिभ्रमत्।
राजानं सेवको वोच्चैः पादाक्रान्तं सुभक्तिभाक्॥6॥[7]

तन्मेरोः पश्चिमे भागे सीतोदासरिदुत्तरे।
देशः सुगंधिलाख्योऽस्ति निवेशो वा जगच्छ्रियः॥7॥[8]

---

1. महामेरुः सुविख्याते विदेहे परनामानि इति द्वितीयपादं स प्रतौ
2. *सीतोदया महानद्याः प्रसिद्धे चोत्तरे तटे।*
   देशे सुंगधिलाख्यो वा निवेशो भुवनश्रियः ॥2॥ इति स प्रतौ
3. *यो विभाति स्म् सुग्रामैः पुरोधैः पत्तनै स्थिरैः।*
   खेटैः द्रोणामुखैश्चापि मटं वाद्यैः रत्नं कृतः॥3॥ इति स प्रतौ
4. स प्रतौ अनुपलब्धः
5. बाल्यांतरमस्तके इति ब प्रतौ,
6. स प्रतौ अनुपलब्धः
7. स प्रतौ अनुपलब्धः
8. स प्रतौ अनुपलब्धः

उक्तं च- विराजते यः[1] सुग्रामैः पुरौघैः पत्तनैः स्थिरैः।
खेटैर्द्रौणामुखैश्चापि मटं वाद्यैरलंकृतैः॥8॥

ग्रामो वृत्त्या वृतः स्यान्नगरमुरु चतुर्गोपुरोद्भासिशालम्
खेटं नद्याद्रिवेष्ट्यं परिवृत्तमभितः कर्वटं पर्वतेन
ग्रामैर्युक्तं मटबं दलितदशशतैः पत्तनं रत्नयोनिं
द्रोणास्यं सिंधुवेलावलयवलयिसंवाहनं चाद्रिरूढम्॥9॥

स्वच्छतोयाः सुगंभीराः पद्माद्यास्तापहारिणः।
जलाशया विभात्युच्चैः संतो वा यत्र विस्तृताः॥10॥[2]

नानाकरखनिस्थानैर्निधानैर्वामनः प्रियैः।
भात्युच्चैर्मेदिनी यत्र रत्नगर्भेति सार्थिका॥11॥[3]

मार्गस्थाः पादपा यत्र सदा पुष्पफलैर्नताः।
सुछायाः प्रोन्नताः भान्ति सज्जनाः वा सुतर्पिणः॥12॥[4]

अष्टादशमहाधान्यराशयः पर्वतोन्नताः।
शोभन्ते यत्र भव्यानां पुण्यानामिव संचयाः॥13॥[5]

गोपांगनालसद्रूपं वीक्ष्य यत्र सुरासुराः।
स्वदेवीसंयुताश्चापि मुह्यन्त्यन्यत्र[6] का कथा॥14॥

यत्र तीर्थेशिनां चक्रवर्तिनां हलिनां सदा।
संभूतिः केशवादीनां महामण्डलिनामपि॥15॥

---

1. यो विभाति स्म इति स प्रतौ
2. स प्रतौ अनुपलब्धः
3. स प्रतौ अनुपलब्धः
4. स प्रतौ अनुपलब्धः
5. स प्रतौ अनुपलब्धः
6. मुत्पत्यन्यत्र इति अ प्रतौ

वनादौ यत्र शोभन्ते जिनप्रासादपंक्तयः।
रत्नतोरणमालाभिर्ध्वजाद्यैः परिमंडिताः।।16।।

यत्र भव्याः परोपात्तपुण्यमाहात्म्यतः सदा।
धनैर्धान्यैर्जनैर्युक्ताः संवसन्ति सुखान्विताः।।17।।

ईतयः सप्तधा यत्र नैव सन्ति कदाचन ।
मिथ्यादेवकुलिंग्यादिमूर्त्तयो नापि गोचराः।।18।।

उक्तं च- अतिवृष्टिरनावृष्टिर्मूषकाः शलभाः[1] शुकाः[2]।
स्वचक्रं परचक्रं च सप्तैता ईतयः स्मृताः।।19।।

धर्मो यत्र जिनेन्द्राणां सुरेन्द्राद्यैः समर्चितः।
दशलाक्षिणको नित्यं तत्र का वर्णनापरा ।।20।।[3]

यत्र ते मुनयो नित्यं रत्नत्रयसमन्विताः
स्वस्थचित्ताः स्वयोगेन प्रयान्ति परमं पदम्।।21।।[4]

तत्र सिंहपुरं नाम सत्पुरं समभूत्तराम्।
नानावस्तुसुवर्णादिसंपद्यत्र निरंतरम्।।22।।

यत्पुरं शुभ्रदुर्गेण वेष्टितं भाति सर्वतः।
तत्पतेस्त्रिजगद्व्यापि यशसेव मनोहरम्।।23।।[5]

चतुर्गोपुरसद्वाता हर्म्यावलिसमन्वितम्।
ध्वजाद्यैर्मंडितं रेजे पुरंदरपुरोपमम्।।24।।[6]

---

1. सुलभाः इति ब प्रतौ
2. सुका इति ब प्रतौ
3. नित्यं प्रवर्तते पूतो भव्यानां स्वर्गमोक्षदं इति द्वितीयपादः स प्रतौ
4. अनुपलब्धः स प्रतौ
5. स प्रतौ अनुपलब्धः
6. स प्रतौ अनुपलब्धः

चतुर्दिक्षु पुरे यत्र नानाफलशतैर्नताः।
नारिकेलादिसद्वृक्षाः शोभन्ते वा सुरद्रुमाः[1]॥25॥[2]

महाकूपतडागाद्यैः पुष्पवाटीभिराश्रिताः।
ध्वजाद्यैर्यत्र राजंते जिनसद्मपरम्पराः[3]॥26॥

यत्रोत्पन्नाः जनाः सर्वे वर्तन्ते संपदाभृताः।
पूर्वपुण्यप्रसादेन सुखिनः सर्ववांछितैः॥27॥

पुत्रपौत्रादिसंभूत्या जैनी यात्रादिकर्मभिः।
मंगलानां शतान्युच्चैर्वर्तते यत्र सर्वदा॥28॥

यत्पौराः परमानंदात् पात्रदानं चतुर्विधम्।
पूजां श्रीमज्जिनेन्द्राणां महाभ्युदयदायिनीम्॥29॥

कृत्वा पर्वोपवासं च धृत्वा शीलं निजोचितम्।
सर्वं सम्यक्त्वपूर्वं हि प्राप्नुवन्त्युत्तमां गतिम्॥30॥

स्त्रियो यत्र विराजन्ते रूपलावण्यमंडिताः।
प्रखंडितदुराचारां यथा साधुप्रवृतयः॥31॥

इत्यादिसम्पदासारे तत्र सिंहपुरे शुभे।
अर्हदादिमहाभक्तो राजार्हद्दासनाम भाक्॥32।

संजातः सद्गुणोपेतः क्षत्रियाणां शिरोमणिः।
शूरोऽधीरोतिगंभीरो रूपेण जितमन्मथः॥33॥

---

1. सज्जना यथा इति स प्रतौ
2. स प्रतौ अनुपलब्धः
3.जैनसद्मपरंपराः इति स प्रतौ

विक्रमेण हरिक्रूरं धनदं धनसंपदा ।
दिवाकरं प्रतापेन कान्त्याचन्द्रं विजेष्ट यः[1]॥34॥

यत्प्रतापो रिपौ चण्डद्युतेर्वाल्पसरोवरे।
यत्कांतिश्च सतां सौम्या विधोर्वा कुमुदाकरे॥35॥

दाता भोक्ता विचारज्ञो धर्मज्ञो नीतिमण्डितः।
योऽभवत्सर्वभूपानां दृष्टांतपदवीं श्रितः॥36॥

राजविद्याश्चतस्रोऽपि यस्याऽभूवन् मनःप्रियाः।
प्रिया वा सततं सर्वं वांछितार्थं सुखप्रदाः॥37॥

आन्विक्षिकी त्रयी वार्ता दंडनीतिरिति ध्रुवम्।
एता विद्याचतस्रोपि क्षितीशानां भवंत्यलम्॥38॥

सप्तांगराज्यसंपन्नो वैरिषड्वर्गवर्जितः।
स राजा राजते स्मोच्चैर्धर्मकर्मपरायणः॥॥39॥

स्वाम्यमात्यसुहृत्कोशः देशदुर्गबलं तथा ।
सप्तांगराज्यमित्युच्चैर्भाषितं भूभुजां बुधैः[2]॥40॥

कामो क्रोधो मदो मानो हर्षो लोभश्च पापकृत् ।
इत्यतो वैरिषड्वर्गः क्षितीशानां समाहृतः[3]॥41॥

तथा राजगुणैः षड्भिर्मण्डितो दण्डिताहितः।
स भूपः शोभितो नित्यं यथा षट्कर्मभिर्गृही॥42॥

---

1. व्यजेष्टयः इति स-द प्रतयोः
2. पूर्वसूरिभिः इति स प्रतौ
3. भूभुजां कः श्रितौ बुधैः इति स प्रतौ

संधिश्च विग्रहो यानमासनं संश्रयस्तथा।
द्वैधी भावश्च संप्रोक्ताः षट्गुणाः क्षितिपाश्रिताः।।43।।

तस्यार्हद्दासभूपस्य देवी जाता पतिव्रता ।
जिनदत्ताभिधासारसर्वस्त्रीसृष्टिमण्डना।।44।।

देवांगना समालोक्य यद्रूपं भुवनोत्तमम्।
मेषोन्मेषविनिर्मुक्ता मन्येऽभवत् सुविस्मिता ।।45।।

मृद्वंगी कोमलालापा मानसे करूणान्विता।
दानेन कल्पवल्ली वा साऽभवत् साधुसंमता।।46।।

एवं तयोर्महापुण्यं प्रसादेन निरंतरम्।
भोगान् भुंजान् यो र्दिव्यान् सुखं काले प्रयाति वा।।47।।

अथैकदा सती सा च जिनदत्तगुणोज्वला।
कृत्वार्हतां महापूजां शुभमाष्टाङकीं मुदा।।48।।

पुत्रेच्छया[1] सुखं सुप्ता निशाप्रांते प्रसन्नधीः।
स्वप्ने सिंहं गजं चार्कं चण्डं पद्माभिषेचनम्।।49।।

समैक्षिष्टः तदा तस्याः गर्भे कोऽपि कृती महान्।
समायातः समस्तानां दातुं वा शर्मसंततिम्।।50।।

नवमासावसाने च सा सुखं सुतमुत्तमम् ।
अभूतपुण्यपुंजं वा काव्यं वा स कवेर्मतिः।।51।।

तदादेशे पुरे ग्रामे सज्जनानां विशेषतः।
संजातः परमानन्दः सुपुत्रः कुलदीपकः।।52।।

---

1. पुत्रेछया इति अ प्रतौ

राजार्हद्दासनामापि पुत्रजन्ममहोत्सवे।
सद्दानं याचकादिभ्यो[1] ददौ वांछादिकं मुदा।।53।।

तज्जन्मनः प्रभृत्युच्चस्तत्पिताभूद्विशेषतः।
परैरजयमाहात्म्यस्तस्मात्तद्वांधवा मुदा।।54।।

जिनेन्द्रभवनैः चारू महोत्सवशतैस्तराम्।
अपराजितनामकं तं जगुः सुतमुत्तमम्।।55।।

अहो पूर्वस्य पुण्येन मंगलानां शतानि च।
प्राप्नोति परमानन्दाज्जन्तुः सर्वत्र सर्वदा।।56।।

तस्मात् प्रमादमुत्सृज्य भो भव्या शर्मदायकम्।
नित्यं कुर्वन्तु सत्पुण्यं मुनीद्रैः परिकीर्तितम्।।57।।

पुण्यं श्रीमज्जिनेन्द्राणां चरणार्चनमुत्तमम्।
पात्रदानं व्रतच्छीलं सोपवासादिकं मतम्[2] ।।58।।

ततोऽसौ रूपसौभाग्यः महाभाग्यसमन्वितः।
आनंदं तनयन्नित्यं[3] वृद्धिं प्रापेंदुवत्सताम् ।।59।।

यो भावी तीर्थकृद्देवो देवदेवेन्द्रवन्दितः।
तद्गुणग्रामवाराशेः को वा पारं प्रयात्यहो।।60।।[4]

एवं पुत्रादिभिर्युक्तो धर्माशक्तो गुणान्वितः।
सोर्हद्दासनृपो यावत् सुस्थितः[5] सुखतो महान्।।61।।

---

1. याचकदिभ्यो इति अ-ब प्रतयोः

2. हितम् इति स प्रतौ

3. वनयन्नित्यं इति अ प्रतौ, जनयन्नित्यं इति स प्रतौ

4.*ज्ञानविज्ञानसद्दानसन्मनादिगुणोकरैः।*
स बालोऽपि तथा रेजे यथा वृद्धोऽपि ना परः ।।60।। इति स प्रतौ अतिरिक्तः

5. संस्थितः इति स प्रतौ

तदा मनोहरोद्याने नाम्ना विमलवाहनम्।
श्रुत्वासौ तीर्थकर्तारं वनपालात्समागतम्।।62।।

दत्वा तस्मै महादानं वनपालाय वेगतः।
आनन्ददायिनीं भेरीं दापयित्वा प्रमोदतः।।63।।

स्वांतःपुरपरिवारस्तु पौरजनमण्डितः।
विभूत्या तद्वनं गत्वा भक्तिभारेण संयुतः।।64।।

तं पुनः केवलज्ञानभासुरं तीर्थनायकम्।
चतुस्त्रिंशन्महाचार्यैः[1] प्रातिहार्यैर्विभूषितम्।।65।।

निर्ग्रंथादिगुणोपेतं सुरासुरसमर्चितम्।
वर्षन्तं धर्मपीयूषं समवादिसृतौ स्थितम्।।66।।

त्रिःपरीत्य महाभक्त्या संप्रणम्य मुहुर्मुहुः।
संपूज्य जगतां नाथं जलाद्यैस्तत्पदांबुजम्।।67।।

त्वं देवस्त्रिजगन्नाथस्त्वं त्रैलोक्यविभूषणम्।
त्वं त्राता सर्वजन्तूनां त्वं गुरुः सर्वदेहिनाम्।।68।।

घातिकर्मारिहन्ता त्वं केवलज्ञानभास्करः।
त्वं संसारमहाम्भोधिः पारगो भव्यतारकः।।69।।

त्वं सदा सप्ततत्त्वार्थः रत्नरत्नाकरो महान्।
त्वं सर्वेन्द्रसमभ्यर्च्यो निस्पृहोऽपि जगद्धितः।।70।।

त्वं त्रैलोक्यपितास्वामी मंगलानां च मंगलम्।
त्वं च लोकोत्तमो देवः शरण्यो भव्यदेहिनाम्।।71।।

1.चतुस्त्रिंशन्महाश्चार्यैः इति अ-द प्रतयोः

त्वत्पादसेवयादेव यत्सुखं प्राप्यते ध्रुवम्।
अन्यैः क्लेशशतैर्देवः स्वप्ने तदपि दुर्लभम्॥72॥

निर्वाणगमने तेभूद्यस्माद्विमलवाहनम्।
रत्नत्रयमयं सत्यं तत्वं विमलवाहनः ॥73॥

इत्यादिस्तुतिभिर्देवं तं स्तुत्वा त्रिजगद्धितम्।
गुर्वादीश्च समानम्य धर्मं प्रपच्छ शुद्धधीः॥74॥

स च प्राह[1] जिनाधीशो धर्मरत्नत्रयात्मकम् ।
निश्चयव्यवहारेण द्विप्रकारं सुखप्रदम् ॥75॥

यत्र रत्नत्रयं प्रोक्तं व्यवहारेण धीर्धनैः।
तत्र निःशंकिताद्यष्टगुणैः सम्यक्त्वमूर्जितम्॥76॥

व्यंजनोर्जितः सन्मुख्यं सम्यग्ज्ञानं जिनोदितम्।
अष्टप्रकारकं प्राह प्रज्ञापारामिताबुधाः॥77॥

त्रयोदशप्रकारं च चारित्रं भुवनार्चितम्।
अहिंसादिमहानाम व्रताद्यैः प्रविराजितम्॥78॥

इन्द्रप्रतीन्द्रचक्र्यादिविद्याधरपदप्रदम्।
क्रमेण केवलज्ञानकारणं तत् प्रकीर्तितम्॥79॥

आत्मैव तत्त्रयं यत्र सेव्यते मुनिनायकैः।
निश्चयरत्नत्रयं तत्तु संप्रोक्तं मोक्षदायकम्॥80॥

इत्यादिधर्मसद्भावं श्रुत्वासौ नृपतिस्तराम्।
संसारदेहभोगेषु सुधीर्निर्वाणमानसः॥81॥

1.प्राहुः इति ब-स प्रतयोः

दत्वापराजितायोच्चैः राज्यं पुत्राय धीमते।
राज्ञां पंचशतैः सार्द्धं जैनीदीक्षां समाददे।।82।।

अपराजितनामापि कुमारोजितमन्मथः।
गृहीत्वा शुद्धसम्यक्त्वं पंचाणुव्रतसंयुतम्।।83।।

विभूत्या स्वपुरं प्राप्य प्रोल्लसद्ध्वजतोरणम्।
पुरंदरपुरं पूतं यथा सर्वामराधिपः।।84।।

तथासौ सद्व्रतोपेतः पवित्रोऽतीव धार्मिकः।
राज्यभारं समस्तं स्वं नियोज्य निजमंत्रिषु।।85।।

सुधीर्विनोदमात्रेण भुंजन् भोगान् निरंतरम्।
पात्रदाने जिनेन्द्रार्चा शास्त्रादौ तत्परोऽभवत्।।86।।

एकदा निजता तेन समं विमलवाहनम्।
मुक्तिप्राप्तं समाकर्ण्य गंधमादनपर्वते।।87।।

अदृष्टातं जिनं तातं नाहं भोक्ष्येऽतिभद्रधी ।
अष्टोपवाससंयुक्तस्तदाभूदपराजितः।।88।।

तदा शक्राज्ञया शीघ्रं कुबेरस्तस्य भूपतेः।
समवादिसृतिं कृत्वा दर्शयामास तौ जिनौ।।89।।

तत्रासौ परमानंदौ तौ संपूज्य जिनेश्वरौ।
चकार पारणायुक्तं धर्मिणां को न वा सखा।।90।।

ततस्तस्य नरेन्द्रस्य नित्यं धर्मार्थकामतः।
महान् कालो गतः सौख्यं लीलया क्षणवत्तराम्।।91।।

अथैकदा वसंतेऽसौ नंदीश्वरमहोत्सवे।
कृत्वा पूजां जिनेन्द्राणां महाभ्युदयदायिनीम्।।92।।

तत्र स्वयं सुधीर्भव्यान् महाधर्मानुरागतः।
धर्मोपदेशनां कुर्वन् यावदास्ते स्वलीलया॥93॥

आकाशगामिनौ तावत् समायातौ मुनीश्वरौ।
प्रणिपत्य जिनाधीशं चक्रतुः[1] स्तवनं शुभम्॥94॥

तयोः स्तोत्रावसानेसौ तौ प्रणम्य सुभक्तितः।
श्रुत्वा धर्मं जगत्सारं नृपः प्राहापराजितः॥95॥

भो स्वामिनौ मया क्वापि भगवंतौ जगाद्धितौ।
दृष्टपूर्वो न जानामि स्थानं तत् क्वापि कीदृशम्॥96॥

श्रीमतां दर्शनेनोच्चैः प्रीतिर्मे वर्तते हृदि।
किं कारणं कृपां कृत्वा सर्वं संकथ्यते मम॥97॥

तदा ज्येष्टमुनिः प्राह तत् सत्यं भो नरेश्वरः।
आवां दृष्टौ त्वया पूर्वं तत्सर्वं कथयाम्यहम्॥98॥

पुष्करार्धपरस्योच्चैर्मेरो पश्चिमभागगे।
सीतोदोदक्तटे देशे गंधिलाख्ये मनोहरे॥99॥

विजयार्धगिरौ तत्र प्रोत्तरश्रेणिमण्डने।
पुरे सूर्यप्रभे पूर्वं राजा सूर्यप्रभोऽभवत्॥100॥

प्रतापनिर्जितारातिसमूहो धर्मवत्सलः।
धारिणी नाम तद्देवी सारसौभाग्यधारिणी॥101॥

तयोश्चिन्तागतिः पुत्रो ज्येष्ठो जातो भवान् महान्।
मनोगतिर्द्वितीया तु चपलापि गतिस्ततः॥102॥

---

1. श्चक्रतु इति अ प्रतौ

त्रिभिः पुत्रैस्तरां तौ द्वौ प्रमोदं पितरौ गतौ।
यथा रत्नत्रयेणोच्चैर्महामुनिः शिरोमणिः ॥103॥

तस्यामेवोत्तरः श्रेण्यामरविन्दंपुरं परम् ।
तत्रारिञ्जयभूपालो विद्याधरधराधिपः[1] ॥104॥

अभूदजितसेनाख्या तत् प्रिया प्राणवल्लभा ।
तस्याः प्रीतिमतीपुत्री रूपसौभाग्यशालिनी ॥105॥

सैकदा यो गिरिं मेरुं त्रिपरीत्य स्वविद्यया।
गृह्णाति रत्नमालां मे पुरो भूत्वा महामतिः॥106॥

स एव प्राणनाथो मे नान्यः कोपि महीतले।
इति प्रतिज्ञां सञ्चक्रे तां श्रुत्वाखिलखेचरा ॥107॥

मुक्ताचिंतागतिं सर्वे तदाशासक्तमानसाः[2]।
गत्वा तयैकया तत्र मानभंगं तरां ययुः॥108॥

तत्कर्मणि तया सर्वे निर्जिताः खेचराधिपाः।
अहो प्रकृष्टपुण्येन विना किं प्राप्यते जयः॥109॥

मनश्चपलगत्याख्यौ समागत्य स्वबांधवम्।
प्राह तु मानभंगस्य कारणं दुःखकारणम्॥110॥

श्रुत्वा चिंतागतिं सोऽपि विनोदेन महामना।
गत्वा प्रीतिमतिं जित्वा यशोराशिं सुधीश्रितः॥111॥

तन्मालार्पणकालेऽसौ तां जगाद् कुमारिकाम्।
कन्ये ममानुजंरत्नमालया त्वं वशीकुरु॥112॥

---

1 .नराधिपः इति स प्रतौ

2. तदा भक्तमानसाः इति अ प्रतौ

कन्यावोचत् सुधीर्येन निर्जिताहं महीतले।
तं व्यक्त्वा[1] सर्वथा नान्यं नरं संभावयाम्यहम्॥113॥

तद्वचः श्रवणात् सोऽपि पुनस्तां प्राह कन्यकाम्।
गतियुद्धं त्वया सार्द्धं पूर्वं विहितमादरात्॥114॥

बांधवाभ्यां मम द्वाभ्यां तवाशासक्तचेतसाम्।
अभिलाषात्त योस्त्याज्या ममत्वं सर्वथा शुभे॥115॥

तयोर्यं रोचते तुभ्यं तं मालालंकृतं कुरु।
अहो सतां मनःसारमहिमा केन वर्ण्यते॥116॥

तत् समाकर्ण्य सा कन्या प्रतिज्ञा निश्चलाशया।
महावैराग्यसंपन्ना मेरोर्वा चूलिका दृढा॥117॥

निवृताख्यार्यिकापार्श्वे सर्वं त्यक्त्वा तपःश्रिता।
तद्विलोक्य महैश्वर्यं बहवः संयमं ययुः॥118॥

चिंतागतिस्तदा ताभ्यां बांधवाभ्यां समन्वितः।
कन्यासाहसमालोक्य त्रिधा वैराग्यमण्डितः॥119॥

गुरुं दमधराचार्यं श्रित्वा दीक्षां समाददे।
कृत्वा तपो जिनोदिष्टं प्रांते सन्यासपूर्वकम्॥120॥

कल्पे सामानिको देवस्तूर्येऽभूत् सानुजः सुधीः।
तत्र भुक्त्वा महाभोगान् सप्तसागरसम्मितान्[2]॥121॥

ततश्च्युत्वानुजौ जंबूद्वीपे पूर्वविदेहके।
सुदेशे पुष्कलावत्यां विजयार्द्धे महाचले॥122॥

1.मुक्ता इति स प्रतौ
2.सप्तसागरमण्डितान् इति ब प्रतौ

तत्र स्थितोत्तरश्रेण्यां पुरे गगनवल्लभो।
प्रभुर्गगनचन्द्राख्यस्तस्य विद्याधरेशिनः।।123।।

देव्यां गगनसुन्दर्यामावां जातौ सुतौ नृपौ ।
नाम्नामितगतिर्ज्येष्ठोमिततेजो द्वितीयकः।।124।।

विद्यात्रयसमायुक्तौ संजातौ विक्रमान्वितौ।
अन्येद्युः[1] पुडरीकिण्यां नगर्यां लीलया गतौ।।125।।

तत्र तीर्थंकरं देवं स्वयंप्रभसमाह्वयम्।
समभ्यर्च्य महाभक्त्या पूर्वजन्मप्रचेष्टितम्[2] ।।126।।

आवां संपृष्टवन्तौ तं तेन तीर्थेशिना तदा।
मनश्चपलगत्यादिजन्मत्रयमुदाहृम्।।127।।

आवयोश्च तदा चिंतागतिर्बंधुः क्व वर्तते।
इति प्रश्ने जिनः प्राह जंबूद्वीपे मनोहरे।।128।।

देशे सुगंधिले सिंहपुरे राजापराजितः।
श्रुत्वेति स्वामिनो वाक्यं तत्पदांबुजयोरधः।।129।।

दीक्षामादाय सुस्नेहात् त्वां विलोकितुमागतौ।
पुनर्यदुच्यते राजन् सावधानतया श्रुणु।।130।।

पुण्योदयेन सद्भोगान् भवान् भूयः प्रभुक्तवान्।
जीवितं मासमात्रं ते सावधानो हिते भव।।131।।

इत्याकर्ण्य मुनेर्वाक्यं संतुष्टःप्राह भूपतिः।
अहो जन्मांतरस्नेहात् पुण्याद्वा मम केवलम्।।132।।

---

1. अवेद्युः इति अ प्रतौ
2. प्रवेष्टितम् इति अ प्रतौ

निर्ग्रन्थपदवीं[1] प्राप्तौ युवां दूरात समागतौ।
जगत्सारजिनेन्द्रोक्तं धर्मकर्मोपदेशिनौ।।133।।

यः श्रीमद्भिः कृतोऽस्माकमुपकारो महीतले।
तं कर्तु कः क्षमो लोके पूज्यपादौ विना ध्रुवम्।।134।।

इत्यादिसंस्तवं कृत्वा प्रणामसमये च तौ।
दत्वाशीर्वचनं तस्मै स्वस्थानं मुनिपौ गतौ।।135।।

स तदैव महीनाथो धीरवीरोऽपराजितः।
दत्वा प्रीतिंकरायोच्चैः राज्यं पुत्राय युक्तितः।।136।।

आष्टाङ्गिकीं महापूजां कृत्वा श्रीमज्जिनेशिनाम्।
महाभक्त्या यथायोग्यं दत्वा दानं विशुद्धधीः।।137।।

बंधून् विसर्ज्य सद्वाक्यैः शल्यत्रयविवर्जितः।
प्रायोपगमनं नाम सन्यासं संविधाय च ।।138।।

स्मरन् पंचगुरून् गाढं संसारांभोधितारकान्।
त्यक्त्वा प्राणान् सुधीरन्ते सुकल्पे षोडशेऽभवत्।।139।।

तत्र पुष्पोत्तरे नाम्ना विमाने रत्नशोभते।
दिव्यशय्यान्तरे भूत्वा मूहुर्तान्नवयौवनः।।140।।

वातपित्तज्वरश्लेष्मरोगशोकविवर्जितः।
दिव्यमूर्तिः सुखोपेतो निर्द्धातुर्घातवर्जितः।।141।।

तदा जातोवधिज्ञानः सोच्युतेन्द्रो महर्द्धिकः।
मत्वा पूर्वकृतं पुण्यं प्रशस्य जिनशासनम्।।142।।

1.निग्रथपदवी इति अ प्रतौ

स्नात्वा पीयूषकुण्डे च समभ्यर्च्य जिनेश्वरान्।
स्तुत्वा सिंहासने स्थित्वा सुन्मान्यनतान्[1] सुरान्॥143॥

अणिमादिगुणाधीशः परमानन्दनिर्भरः।
विमानादिमहाभूत्या मंडितो निर्मलाशयः॥144॥

अणिमामहिमालघिमा गरिमातर्द्धानिकामरुपित्वम्।
ईशत्वं वशीकरणं स्युर्देवाश्चाष्टगुणनिलया॥145॥

देवांगनागणोपेतो भुंजन भोगान् मनोहरान्।
सरोजे कल्पवल्लीयुक् पर्यटन्[2] वा सुरद्रुमः॥146॥

मेरूनंदीश्वरादौ च शाश्वतश्रीजिनालयान्।
गत्वा सारविभूत्यासौ मण्डिता खण्डिता शुभा ॥147॥

संकल्पमात्रसंप्राप्तः दिव्यपुष्पादिवस्तुभिः।
पूजयामास पूतात्मा जिनेन्द्रप्रतिमा शुभा॥148॥

कदाचित् केवलज्ञानिपादपद्मद्वयार्चनम्।
करोति स्म महाभक्त्या स्वर्गमोक्षसुखप्रदम्॥149॥

श्रृण्वन् जैनेश्वरीवाणीं सर्वसंदेहनाशिनीम् ।
कदाचिद् श्रीजिनेन्द्राणां पंचकल्याणकेषु च ॥150॥

करोति स्म महापूजां परमान्दनिर्भरः।
संचकार मुनीद्राणां सारसेवां समग्रधीः॥151॥

एवं पुण्यप्रसादेन सोऽच्युतेन्द्रः सुखान्वितः।
सुधीः द्वाविंशतिप्रोक्तसागरोपमजीवितः॥152॥

---

1. सुसमान्यतान् इति अ प्रतौ, सुसमान्यतान् इति ब-स-द प्रतीनाम्
2 . पर्यन् इति ब प्रतौ

द्वाविंशतिसहस्राब्देर्मनसाहारमाहरन्।
पञ्चेन्द्रियमनःसारसौख्यसंदोहदायकम्॥153॥

तथैकादशभिर्मासैर्गृह्णन् स्वासं मनाक् सुखम्।
दिव्यदेहप्रभावेन महापुण्यभरेण च ॥154॥

एवमच्युतकल्पेन्द्रो भुक्तासारसुखं महान्।
श्रीमज्जिनेन्द्रचन्द्राणां पादपंकजषट्पदः॥155॥

ततः प्रच्युत्य पूतात्मा जंबूद्वीपे मनोहरे।
पवित्रे भारते क्षेत्रे सुदेशे कुरु जंगले॥156॥

हस्तिनागपुरे राजा श्रीचन्द्राख्यो विचक्षणः।
श्रीमती तत्प्रिया जाता श्रीसौभाग्यसमन्विता॥157॥

तस्यां स्वपुण्यपाकेन पुत्रो जातो गुणोज्वलः।
प्रसिद्धः सुप्रतिष्ठाख्यो रूपसौभाग्यभाग्यवाक्॥158॥

आपूर्णयौवनस्योच्चैस्तस्यापि प्राणवल्लभा।
सुनंदाख्या प्रिया जाता सर्वसौख्यप्रदायिनी॥159॥

एकदा स महीनाथः श्रीचन्द्रो निर्मलाशयः।
दत्वा तस्मै महाराज्यं सुप्रतिष्ठाय धीमते॥160॥

सुमन्दाराख्ययोगेन्द्रं नत्वा प्रीत्या जगद्धितम्।
दीक्षामादाय जैनेन्द्रीं संजातो मुनिसत्तमः॥161॥

सुप्रतिष्टोऽपि संप्राप्य राज्यलक्ष्मीमनोहरम्।
भुंजन् भोगान् मनोभीष्टान्पुण्यजनदुर्लभान् ॥162॥[1]

---

1. भुंजानो विविधान् भोगान् विपुण्यजन दुर्लभान् इति द्वितीयपादं इति स प्रतौ

कुर्वन् भक्तिं जिनेन्द्राणां सर्वसंपत्प्रदायिनीम्।
स्वशीलादिसमायुक्तः पालयन् पुत्रवत्प्रजाः।।163।।

तथा यशोधरायोच्चैर्मुनये युक्तिपूर्वकम्।
दत्वाहारं स भूपालः प्रापदाश्चर्यपंचकम्।।164।।

रत्नवृष्टिस्तदा पुष्पवृष्टिर्देवप्रदुंदुभिः।
त्रिधा वायुर्मरूत्साधुकारश्चाश्चर्यपंचकम्।।165।।

पात्रदानेन सत्सौख्यं संपदा विविधा भवेत्।
दारिद्रयं दुर्गतेर्नाशो विकाशश्च मनोंबुजे।।166।।

अहोसत्पात्रदानेन भूमिमानेन देहिनाम्।
तत् किं लोकत्रये सारं यत्सुखं प्राप्यते न हि।।167।।

मत्वेति धर्मसर्वस्वं पात्रदानं जगद्धितम्।
कुर्वन्तु सुधियो भव्याः भवद्वयहितैषिणः।।168।।

इत्यादिश्रावकाचारः सारधर्मधुरंधरः।
सुप्रतिष्ठो महीनाथो यावत्कालं प्रतिष्ठितः।।169।।

एकदांतः पुरे णामा रम्ये हर्म्यतले सुधीः।
सानंदेन स्थितस्तत्र कुर्वन् दिगवलोकनम्।।170।।

उल्कापातं तदा वीक्ष्य चिंतयामास चेतसि।
संसारे भंगुरं सर्वं धनं धान्यं च यौवनम्।।171।।

इंद्रनागेन्द्रचन्द्रादौ का कथा मरणे क्षणे।
यत्र तीर्थंकरा देवाः संसृतौ न स्थिराः क्वचित्।।172।।

शरीरं मलसंपूर्णं तापकं च परिक्षयि।
पश्यन् ज्ञानीजनस्तत्र कथं प्रीतिपरो भवत्।।173।।

भोगा भोगीद्रंभोगाभाः क्षणतः प्राणहारिताः।
सेव्यंते प्रीतितस्तेपि किमज्ञानमतः परम्॥174॥

इति त्रिधा समुत्पन्नं वैराग्येण विरक्तधीः।
जिनेन्द्रस्तवनं कृत्वा दत्वा दानं यथोचितम्॥175॥

सुदृष्टेर्ज्येष्ठपुत्रस्य राज्यभारं समर्पयत्।
युक्तं चित्ते समायातं सतां यत्तन्न चान्यथा॥176॥

सुमंदरजिनस्योच्चैः पादमूले जगद्गुरोः।
दीक्षां जैनश्वरीं भक्त्या गृहीत्वा शर्मकारिणीम्॥177॥

महाव्रतानि पंचोच्चैः समितीः पंचभासुराः।
गुप्तित्रयं सुधीर्नित्यं पालयामास सादरम्॥178॥

सम्यग्दर्शनसंज्ञानः चारित्रतपसां निधिः।
क्रमणैकादशांगानि पठति स्म प्रसन्नधीः॥179॥

स तथा भावयामास भावनाषोडशोत्तमाः।
याभिः संप्राप्यते पूतं पदं तीर्थकरोचितम्॥180॥

तासां संक्षेपतो वक्ष्ये लक्षणं जिनसूत्रतः।
भावनानां यथाशक्तिः श्रृण्वंतु सुधियो जनाः॥181॥

श्रीमज्जिनेन्द्रचंद्रोक्तसप्ततत्त्वार्थविस्तरम्।
जानामीति रूचिर्यत्तत् सम्यक्त्वं तत्त्वदर्शनम्॥182॥

निःशंकितादिकांगैः स्वैरष्टाभिस्तद् दृढं भवेत्।
यथा मंत्रोक्षरैः पूर्णो भवेत् कार्यस्य सिद्धिदः॥183॥

पंचविंशतितद्दोषैर्दूरगंतच्च दर्शनम्।
शोभते निर्मलं भव्ये यथा खे चंद्रमंगलम्॥184॥

अष्टगर्वमलैर्युक्तं राजते तद्धिदर्शनम्।
दिव्यरत्नं यथागाढं संस्कृतं च विचक्षणैः॥185॥

त्रिधा वैराग्यपानीयक्षालितं च यदा भवेत्।
पूतं दर्शनसद्रत्नं कस्य चेतो न संहरेत्॥186॥

अनन्यशरणीभूतः श्रीपंचपरमेष्ठिषु।
नित्यमाराधनाभावो यत्तद्दर्शनमुत्तमम्॥187॥

एकोहं शुद्धबुद्धोहं ज्ञाता दृष्टा यथा शिवः।
भावनेति सुखे दुःखे सम्यग्दर्शनमूर्जितम्॥188॥

इत्यादिलक्षणैर्युक्तं दर्शनं जिनभाषितम्।
तद्विशुद्धिर्भवेच्चारू दर्शनस्य विशुद्धिता॥189॥

एषा सद्भावना प्रोक्ता पूर्वा श्रीपूर्वसूरभिः।
यथा युक्ताः पराः सर्वाः संभवंति शिवप्रदाः॥190॥

तथा सद्दर्शनज्ञानचारित्रेषु सदादरात्।
तद्वत्सु चापि निर्मायं विनयः क्रियते महान्॥191॥

तस्य संपूर्णता याता विनयसंपन्नता मता।
द्वितीया भावना चैषा तीर्थकृच्छर्मदायिनी॥192॥

ब्रह्मचर्यं भवेच्छीलं तच्च सद्भिः द्विधा मतम्।
मुनिश्रावकभेदेन मनोवाक्काययोगतः॥193॥

तच्च शीलं पुनः प्रोक्तं यच्च स्वव्रतरक्षणम्।
अतीचारो न तत्रोच्चैः सा तृतीया च भावना॥194॥

श्रीमत्सर्वज्ञदेवोक्तः सर्वशास्त्रमहार्णवे।
स्वाध्यायं पंचधा नित्यं सा चतुर्थी सुभावना[1]॥195॥

1. चतुर्थी च शुभावना इति सर्वेषां प्रतीनाम्

निरयेच्छेदनाद्युग्रं दुःखं तृष्णादिकं पशौ।
संयोगादिवियोगोत्थं नरदेवेषु मानसम्।।196।।

एवं चतुर्गतेर्दुःखं जायते यच्चदेहिनाम्।
गृहं तस्यास्ति संसारं संवेगः पंचमीति सा।।197।।

चतुर्विधसुपात्रेभ्यो दानं देयं चतुर्विधम्।
स्वशक्त्या परया भक्त्या षष्टी सा भावना शुभा।।198।।

तपोद्वादशभेदेन शक्तितः क्रियते बुधैः।
कर्मणां निर्जराहेतुर्भावना सात्र सप्तमी।।199।।

रत्नत्रयपवित्राणां साधूनां गुणशालिनाम्।
त्रिधा समाधिर्यो भव्यैः क्रियते भावनाष्टमी।।200।।

सुधर्मिणां[1] मुनीनां च भक्त्याधिव्याधिनाशनम्।
वैयावृत्यं समुदिष्टं भावनानवमीति सा ।।201।।

जिनानां स्तवनं पूजास्तवनं जाप्यमादरात्।
श्रीमुखालोकनं प्रीत्या सर्वसंपद्विधायकम् ।।202।।

ज्ञानादिस्मरणं नित्यं मानसे यद्विधीयते।
अर्हद्भक्तिरिति प्रोक्ता भावना दशमी शुभा ।।203।।

श्रीपादवंदनाभक्तिः स्तोत्राज्ञा प्रतिपालनम्।
आचार्यभक्तिरित्युच्चैर्भावनैकादशमी मता ।।204।।

स्याद्वादवादिनां मिथ्याकुज्ञानक्षयकारिणाम्।
यत्त्रिधा सेवनं सा हि भावना द्वादशी हिता ।।205

जिनेन्द्रवचनं पूज्यं मान्यं त्रैलोक्यनायकैः।
आराध्यते सदा चित्ते भावना सा त्रयोदशी ।।206।।

1.सधर्मिणां इति अ प्रतौ, सधमिणां इति ब प्रतौ

सामायिकं जिनेन्द्राणां संस्तुतिर्जिनवंदना।
प्रतिक्रमणमाप्तो भक्त्या प्रत्याख्यानं सुखप्रदम्[1]।।207।।

कायोत्सर्गविधिः शक्त्या षडावश्यकमित्यलम्।
हानिस्तेषु मुनेर्नैव भावना सा चतुर्दशी।।208।।

जैनेन्द्रसत्तपोज्ञानं प्रतिष्ठादिमहोत्सवैः।
महाप्रासादयात्राभिर्भवेन्मार्गप्रभावना।।209।।

वात्सल्यं क्रियते गाढ़ं सधर्मणि जिने सदा ।
प्रीतिः प्रवचने या च[2] भावनाषोडशी मता।।210।।

इत्यादिभिः सुधीः सारं भावनाभिर्भवांतकृत्।
वध्वासौ तीर्थकृन्नाम सुरासुरसमर्चितम्।।211।।

महामनास्तथा सोपि सौढ्वा शेष परीषहान्।
अंते समाधिना कृत्वा सन्यासं मासमात्रकम्।।212।।

ध्यायन् पंचगुरून् भक्त्या स्वात्मभावनयायुतः।
शत्रुमित्रसमस्त्यक्त्वा स्वप्राणांश्चपलान् दश ।।213।।

अनुत्तरे विमानेऽभूदहमिंद्रो जयंतके।
दिव्यरत्नमये सारं मुक्तामाला विराजते ।।214।।

दिव्योपपादशय्यायां निर्मलायां विशेषतः।
मुनिनां वा मनोवृत्तौ कोमलायां यथा सुखम्।।215।।

अन्तर्मुहूर्ततो जातः संपूर्णनवयौवनः।
एकहस्तप्रमाणांगो रूपलावण्यपुण्यभाक्।।216।।

1.सुषप्रदम् इति स प्रतौ
2.जिनेन्द्रसत्तपोज्ञान इति ब-स प्रतयोः

दिव्यदेहलसत्कांत्या लेश्यया शुक्लयापि च।
स देवः शोभते स्मोच्चैः पुण्यपुंज इवापरः।।217।।

लसन्मुकुटसद्रूपो दिव्यवस्त्रादिमंडितः।
कोमलः कल्पवृक्षो वा पर्यटन् जयन्मुदम्।।218।।

वीतरागो गताशंकः प्रोल्लसन्मुखपंकजः।
कामक्रोधादिनिर्मुक्तो जिनबिंबवदुज्ज्वलः।।219।।

जन्मकाले समुत्थाय वीक्ष्य गेहादि सुन्दरम्।
संजातावधिबोधेन ज्ञात्वा पूर्वार्जितं शुभम्।।220।।

प्रशस्य शासनं जैनं सारसंपत्प्रदायकम्।
स्नात्वाऽमृतैर्भृते कुंडे तत्रस्थे शर्मदायिनि।।221।।

तत्रस्थे श्रीजिनेन्द्राणां महाशोभाशतां चिते।
प्रासादे प्रतिमाः प्रीत्या पूजयामास भूपतिः[1] ।222।।

स्वप्रदेशं परित्यज्य सारसौख्यविधायकम्।
विरागादहमिंद्राणां नास्त्येव गमनं परे।।223।।

ततः श्रीमज्जिनेन्द्राणां पंचकल्याणकेषु च।
कुर्वंति ते सदा प्रीत्या तत्रस्था भक्तिमुत्तमाम्।।224।।

त्रयस्त्रिंशत् समुद्रायुः सोहमिंद्रः स्वपुण्यतः।
भुंजनो निःप्रवीचारं सत्सुखं द्वंद्ववर्जितः।।225।।

लोकनाड़ीप्रमाणोरूदिव्यावधिविलोचनः।
तावत् प्रमाणसत्तेजो द्योतिताखिलदिङ्मुखः।।226।।

त्रयस्त्रिंशत् सहस्राब्दैर्मानसाहारमाहरन्।
सार्द्धषोडशमासांते मनागुच्छवासप्रवर्तनः।।227।।

1.वस्तुभिः इति अ प्रतौ

विक्रियाबलसामर्थ्यात् तत्प्रमाणोपि निर्मदः।
विक्रियां न करोति स्म स्वभावात् कोमलाशयः।।228।।

सप्तधा तु विनिर्मुक्तो व्याधिव्यसनवर्जितः।
योऽभवत् सिद्धदेशीयस्तस्य का वर्णना परा।।229।।

सोऽहमिंद्रो महादीर्घस्वायुस्तत्र स्थितः सुखम्।
किं करोति स्म चेत् प्रश्नस्तदा किंचिन्निरूप्यते।।230।।

शुभे प्रदेशे तत्रैव स्वयमेव समागतैः।
अहमिन्द्रैः परैः सार्द्धं मत्सरादिविवर्जितैः।।231।।

श्रीमत्सर्वज्ञदेवोक्तं सप्ततत्वादिविस्तरम्।
द्वादशांगमहाशास्त्रं चिंतयामास शर्मदम्।।232।।

तस्य चिन्तयतः शास्त्रं दीर्घकालमपि ध्रुवम्।
यत्सुखं तत्सहस्रांशः सुरेशामपि दुर्लभः ।।233।।

तस्माच्छुण्वंतु भो भव्याः यत्सुखं ज्ञानसंभवम्।
निर्द्वंदं तत् सुखं सत्यं परं दुःखाकरं मतम्।।234।।

तत्सुखं वाहमिन्द्राणां वर्तते पुण्यपाकतः।
ततोहमिंद्रौसौ नित्यं भुनक्ति स्म परं सुखम्।।235।।

इत्यादिसुखसंतृप्तः सोहमिंद्रः स्थितो महान्।
यावत्तस्य समुत्पत्तेः क्रियते वंशवर्णनम्।।236।।

(शार्दूलविक्रीडित)

यो देवेन्द्रनरेन्द्रचंद्रनिकरैः संपूजितो भक्तितः।
लोकालोकविलोकनैकचतुरश्चारित्रचूड़ामाणिः।
सद्ध्यानाग्निविदग्धघातिनिचयः सत्केवलज्ञानभाग्।
भव्यानां भवशांतये सभवच्छ्रीनेमिनाथो जिनः।।237।।

श्रीनेमिजिनपुराणे भट्टारकश्रीमल्लिभूषणशिष्याचार्यसिंहनंदिनामांकिते ब्रह्मनेमिदत्तविरचिते स्वामिनो जयंतविमानोत्पत्तिव्यावर्णनो नामद्वितीयोधिकारः ।।

तृतीयोऽधिकारः

अथ प्रणम्य तं देवं नेमिनाथं जगद्गुरुम्।
संक्षेपात् क्रियते भक्त्या हरिवंशस्य वर्णनम् ॥1॥

जंबूद्वीपेऽत्र विख्याते क्षेत्रे भरतनाम्नि ।
वराख्यदेशे कौशांबीनगरे सुमनोहरे[1] ॥2॥

मघवाख्यो नृपस्तस्य वीतशोका प्रियाभवत्।
तयोः सुतो रघुर्जातो विख्यातो जनवल्लभः ॥3॥

तत्रैव नगरे श्रेष्ठी सुमुखाख्यो[2] महर्द्धिकः।
संजातः कामभोगेषु रसिको[3] धनयोगतः॥4॥

इतः कलिंगदेशाच्च पुरादत्तपुराद्वणिकः ।
वीरदत्तो युतो नाम्ना प्रियया वनमालया॥5॥

महाव्याधभयान्नष्टः सार्थेन सह शुद्धधी।
कौशांबीनगरं प्राप्य सुमुखं तत्र संश्रितः॥6॥

एकदा सुमुखः श्रेष्ठी क्रीडया विहरन् वने ।
वनमालां समालोक्य रूपसौभाग्यशालिनीम् ॥7॥

संजातः कामबाणौघैर्जर्जरीकृतमानसः ।
तल्लोभेन तदा पापी मायया वीरदत्तकम्॥8॥

वाणिज्यहेतुना दत्ता द्वादशाब्देषु जीविकाम्।
देशान्तरं तदा शीघ्रं प्रेषयामास तं तत् ॥9॥

---

1. सन्मनोहरे इति स प्रतौ
2. सुमखाख्यो इति ब प्रतौ
3. रसिकौ इति अ प्रतौ

दत्वा वस्त्रादिकं भूरि वनमालां सुलोभिनीम् ।
स्वीचकार तया सार्द्धं भुंजन् भोगान् सुस्थितः[1] ॥10॥

अहो कामातुरः प्राणी कार्याकार्यं न पश्यति।
यथा जन्मांधकः कोऽपि शुद्धं मार्गमपि ध्रुवम्॥11॥

ततो द्वादशवर्षान्ते वीरदत्तो वणिक् पुनः ।
स कौशांबीं समागत्य श्रुत्वा द्विक्रियां तदा॥12॥

शोकाकुलो महादुःखी विदेशी शरणोज्झितः ।
एकाकी सुतरां मानभंगप्राप्तः सुलज्जितः ॥13॥

मानसे चिंतयामास धिक् संसारमसारकम्।
यत्रैवं कुरूते पापं प्राणी पञ्चेन्द्रियोद्धतः॥14॥

वृथा पुत्रकलत्रादौ प्रीतिं कुर्वन्ति देहिनः।
यतः पापं समावर्ज्य दुर्गतिं यान्ति मोहिनः॥15॥

इति वैराग्यभावेन त्यक्त्वा शीघ्रं परिग्रहम् ।
प्रोष्ठिलाख्यं मुनिं नत्वा जैनीदीक्षां समग्रहीत्॥16॥

कृत्वा तपो जिनोद्दिष्टं प्रांते सन्यासपूर्वकम्।
मृत्वा सौधर्मकल्पेऽभूद् देवश्चित्रांगदाह्वयः॥17॥

स श्रेष्ठी सुमुखः सापि वनमाला कदाचन ।
मुनये धर्मसिंहाय प्रासुकं विधिपूर्वकम्॥18॥

दत्वाहारं समादाय सुपुण्यं[2] परमादरात् ।
निन्दित्वात्मकृतं पापं परदारासमाश्रितम्॥19॥

---

1. संस्थितः इति स प्रतौ
2. सत्पुण्यं इति स प्रतौ

एकदा चंचलापातात् संप्रापन्मरणं समम्[1] ।
अत्रैव भारते ख्याते हरिवर्षसमाह्वये ॥20॥

देशे भोगपुराधीशः प्रभंजनमहीपतिः ।
हरिवंशाग्रणीस्तस्य मृकण्डूप्राणवल्लभाः ॥21॥

तयोः पुण्येन स श्रेष्ठी सुमुखः प्राणनाशतः ।
सिंहकेतुसुतो जातो विख्यातो गुणवान् भृशम्॥22॥

तत्रैव हरिवर्षाख्ये देशे शीलपुराधिपः।
वज्रघोषो नृपस्तस्य सुभा राज्ञी सुखप्रदा॥23॥

तयोः सा वनमालापि मृत्वा तद्दानपुण्यतः।
विद्युन्माला सुता जाता रूपलावण्यमण्डिता॥24॥

सम्पूर्णयौवना पूर्वसंस्कारेण मनःप्रिया।
सिंहकेतोः प्रिया सारशर्मदा संबभूव च ॥25॥

कदाचिद्रममाणौ तौ दंपती निजलीलया।
दृष्ट्वा देव वने सोऽपि चित्रांगदःसुरो रूषा॥26॥

स्मृत्वा पूर्वभवं वैरमेतौ मे वैरिणौ ध्रुवम्।
हनिष्यामि समुद्धृत्य व्रजन्निति नभो गणे॥27॥

तदा पुरातनो राजा सुमुखस्य सखा रघुः ।
अणुव्रतफलेनोच्चैः स्वर्गे सौधर्मनाम्नि॥28॥

देवः सूर्यप्रभो जातः सतं वीक्ष्य रूषान्वितः ।
चित्रांगदं प्रति प्राह श्रृणु त्वं भो विचक्षणः॥29॥

किमेतेन हतेनोच्चैर्मिथुनेन तव क्षितौ।
केवल पापबंधोऽस्ति संसारार्णवपातकम् ॥॥30॥

1.शमम् इति अ प्रतौ

ततस्त्वं करूणां कृत्वा त्यजेदेतन्मिथुनं[1] द्रुतम।
इत्यादिकं वचः पथ्यं श्रुत्वा चित्रांगदः सुरः ।।31।।

अमुंचन् मिथुनं शीघ्रं दयाभावसमन्वितम् ।
युक्तं सतां वचः पूतं भवेत् स्वपरशर्मदम् ।।32।।

तदा सूर्यप्रभो देवः परोपकृतितत्परः ।
मत्वा तयोर्द्वयोः सारसंपदां भावनीं सुधी।।33।।

सिंहकेतुं समाश्वास्य विद्युन्मालासमन्वितम्।
चंपापुरीवने शीघ्रं स्थापयामास तौ सुखम्।।34।।

तत्पुरे चन्द्रकीर्त्याख्ये विपुत्रे भूपतौ मृते।
राज्ययोग्यं समन्वेष्टुं सुनरं[2] पुण्यशालिनम्।।35।।

गंधादिभिः समभ्यर्च्य हस्तिनं मंत्रिणां गणः।
अमुंचत् स गजो गत्वा वनं तौ पुण्यपाकतः।।36।।

समुद्धृत्य निजस्कंधं समारोप्यागमत् पुरम्।
तदा मंत्र्यादयः सर्वे सिंहकेतोर्महीपतेः ।।37।।

अभिषेकं विधायोच्चैर्जिनस्तवनपूर्वकम् ।
सिंहासनं समारोप्य कृत्वा तत्पट्टबंधनम्।।38।।

प्रीत्या प्रणम्य तं भूपं पृच्छन्ति स्म कृतादरा ।
कस्य कस्मात् समायातस्त्वमस्माकं वद प्रभो।।39।।

हरिवंशसमुद्भूतः प्रभंजनमहीपतिः ।
सुधीर्भोगपुराधीशः पिता मे गुणमण्डितः ।।40।।

---

1. मैथुनं इति ब प्रतौ
2. सन्नरं इति स प्रतौ

माता सती मृकण्डूर्मे सिंहकेतुस्तयोः सुतः।
बने केनापि देवेन समानीतोऽत्र स प्रियः ॥41॥

अहमेतत्समाकर्ण्य मृकंडास्तनयोः यतः[1]।
मार्कंडेयोयऽमित्युच्चैस्तं ते सर्वे जगुर्मुदा॥42॥

एवं स तत्र पुण्येन तद्राज्यं सुचिरं महत्।
अन्वभूत् परमानंदात् सुपुण्यात् किं न जायते॥43॥

ततस्तस्यापि संताने मार्कंडे यस्य भूपते।
राजा हरिगिरिर्जातः परो हिमगिरिर्महान्॥44॥

अन्यो वसुगिरिर्नाम्ना तृतीयोऽभून्महीपतिः।
परेऽपि बहवो जाता राजनस्तत्कुलोद्भवाः॥45॥

तथा कुशार्थविषये पुरे शौर्यसमाह्वये।
तद्वंशे सूरसेनोऽभूत् क्षिताशानां शिरोमणिः॥46॥

तस्य पुत्रोऽभवत् सूरवीरो वीराग्रणीर्महान्।
हरिवंशनभोभागः मंडनैकदिवाकरः ॥47॥

तस्य श्रीसूरवीरस्य क्षत्रभूपशिरोमणेः।
धारिणी प्रथमा राज्ञी सुकांता च परा मता॥48॥

धारिण्यां तनयो जातो विख्यातोंधकवृष्लिवाक्।
नरादिपतिवृष्लिश्च सुकान्तायाः[2] सुतोऽभवत् ॥49॥

सुभद्रांधकवृष्लेश्च जाता देवी गुणोज्ज्वला।
तयोः पुत्राः दशाभूवन् धर्मा वा त्रिजगद्धिता ॥50॥

---

1. सुतः इति अ प्रतौ

2.सुकांताव्यां इति अ प्रतौ

गांभीर्यादिगुणैर्येन समुद्रो निर्जितस्तराम्।
समुद्रविजयो ज्येष्ठः पुत्रो जातो विचक्षणः॥51॥

प्रतापनिर्जिताशेषः शत्रुसंतानमंडलः।
दानेन कल्पवृक्षो वा स्वप्रजापतिपालकः॥52॥

रूपेण जितकंदर्पे महिम्ना[1] मंदराचलः।
कांत्या शांततया चन्द्रं यो व्यजेष्ट प्रसन्नधीः॥53॥

तस्य का वर्णनान्येषां गुणानां पुण्यशालिनः।
यस्मात् तीर्थकरो देवो भावी त्रैलोक्यपूजितः॥54॥

द्वितीयश्च तथाक्षोभ्यस्ततस्तिमितसागरः।
हिमवान् विजयो नाम्नाचलो धारणपूरणौ ॥55॥

अभिनंदननामापि दशमो वसुदेववाक्।
कुन्ती माद्री सुते द्वे च सुरूपे संबभूवतुः ॥56॥

समुद्रविजयस्यासीत्छिवदेवी सती प्रिया।
रूपसौभाग्यसन्दोहः शालिनीपूर्वपुण्यतः॥57॥

यस्या रूपं समालोक्य पुण्यं च भुवनातिगम्।
इंद्राणीप्रमुखाः देव्यः संजाताः विस्मयान्विताः॥58॥

तस्याः श्रीशिवदेव्यावै वर्णना का परा भुविः ।
या नेमिजिनतीर्थेशः रत्नरत्नाकरक्षितिः ॥59॥

तथा परेषामष्टानां संजाताः प्राणवल्लभाः।
धृतीश्वराद्याः सद्रूपाः सारसौख्यप्रदायिकाः॥60॥

नरादिपतिवृष्लेश्च जाता पदमावतीप्रिया ।
तस्याः पुत्रास्त्रयोऽभूवन् सत्यसाहसशालिनः॥61॥

---

1. महिमा इति स प्रतौ

उग्रसेनस्ततो देवसेननामगुणान्वितः।
महासेनस्तृतीयश्च गान्धारी च सुताऽभवत् ॥62॥

एवं शौर्यपुरे यावत् सूरवीरो महानृपः[1]।
पुत्रपुत्रादिभिर्युक्तः सुखं सन्तिष्ठते ततः॥63॥

अथ कौरवभूपानां संक्षेपेण क्रमं ब्रुवे।
कुरूजांगलसद्देशे संपदा सारसंभृते ॥64॥

हस्तिनागपुरे रम्ये शक्तिनाममहीपतेः।
सवाक्यां च स्त्रियां जातः पुत्रो नाम्ना परासरः ॥65॥

परासरस्य तस्यापि प्रिया सत्यवती सती।
अभूत् मत्स्यकुलोत्पन्नः राजपुत्री विचक्षणा ॥66॥

परासरसत्यवत्योर्व्यासोनाम सुतोऽजनि।
व्यासस्यापि सुभद्रायां संबभूवुः सुतास्त्रयः॥67॥

ज्येष्टः श्रीधृतराष्ट्राख्यः पाण्डुश्च विदुरस्तथा।
रूपसौभाग्यसत्पुण्यः संपदाभिर्विराजिता॥68॥

एकदा यौवनारम्भे भ्रातरोस्ते त्रयोऽपि च।
क्रीडाविनोदभावेन रताः शौर्यपुरं गताः॥69॥

कन्यामंधकवृष्लेश्च तत्र सौधतले स्थिताम्।
क्रीडमानां सखीभिस्तां कुंती सद्रूपमंडिताम् ॥70॥

समालोक्य तदा पण्डुकुमारः कामपीडितः।
मानसे चिंतयामास यद्येषां प्राप्यते ध्रुवम् ॥71॥

तदा मे सफलं जन्म नरत्वं च महीतले।
तदा कुंती च तं वीक्ष्य साभिलाषं[2] स्वचेतसि ॥72॥

1.महान्नृपः इति दप्रतयोः
2. साभिप्रायं इति स प्रतौ

प्रच्छन्नं ताडयामास ताम्बूलेन कुमारकम्।
सोऽपि रोमाञ्चितो भूत्वा संतोषेण ततो गतः॥73॥

युक्तं कामीहतश्चापि स्त्रिया तोषं करोत्यलम्।
यथा धात्तूरिकश्चित्ते सुवर्णं वीक्ष्यते मृदम् ॥74॥

तदा प्रभृति कुन्तीं तां नित्यं संस्मरति स्म सः।
महामुनिर्यथा मुक्तिं परमानंददायिनीम् ॥75॥

अन्यदा भूविहारार्थं वज्रमाली खगो महान्।
कोऽप्यागत्यात्र भूभागे कृत्वा क्रीड़ां च कानने ॥76॥

मुद्रिकां तत्र विस्मृत्य निजां सद्ररत्नमंडिताम्।
गतो यदा तदा पण्डुकुमारोऽपि स्वलीलया ॥77॥

गत्वा तत्र वने वीक्ष्य विस्फुरन्ती सुतेजसा।
जग्राह मुद्रिकां शीघ्रम् भूरिकार्यविधायिनीम् ॥78॥

तदा विद्याधरः सोपि स्मृत्वा तां मुद्रिकां शुभाम्।
तत्रागत्य वने व्यग्रस्तदर्थं पर्यटन् भृशम् ॥79॥

तथाभूतं तमालोक्य पण्डूः प्राह खगं प्रति।
किं भो विलोक्यते गाढ़ं भवता व्यग्रचेतसा ॥80॥

श्रुत्वा तद्वचनं रम्यं सोऽवदत् खगसत्तमः।
मुद्रिकामेऽत्र नष्टेति कुमारस्तामदर्शयत् ॥81॥

पुनः पाण्डुर्जगादैवं वद त्वं भो खगोत्तमः।
प्रभावं मुद्रिकायाश्च तदा प्राह खगोपि च ॥82॥

श्रृणु त्वं भो कुमारात्र सत्यं ते कथयाम्यहम्।
प्राप्यते वाञ्छितं रूपं वैरिवर्गस्तथाखिलः ॥83॥

पादयोः संपतत्येव मुद्रिकायाः प्रभावतः।
आदृशीकरणं[1] चापि संभवत्येव वेगतः ।।84।।

इत्यादिकं समाकर्ण्य पंडुः प्रोवाच तं प्रति।
यद्येवं कानिचिद्वंधो दिनान्येषास्तु[2] मत्करे ।।85।।

अस्याः प्रभावं पश्यामि प्रार्थितश्चेति पाण्डुना।
सोऽपि तस्मै ददौ शीघ्रं मुद्रिकां तां प्रमोदतः।।86।।

सज्जनेनार्थितं वस्तु विद्यमानं स्वमन्दिरे।
को ददाति न चेल्लोभः ग्रहेणोच्चैर्न वंचितः।।87।।

कुमारस्तां समादाय कृत्वाऽदृश्यं स्वरूपकम्।
गत्वा तत्र सुखं सुप्ता कुंती यत्र स्वमन्दिरे ।।88।।

उक्त्वा निजागमं तस्यास्तस्याः सार्द्धं स्मरातुरः।
चकार संगमं गाढ़ं किं करोति न कामुकः।।89।।

ततश्च नवभिर्मासैः कुन्त्या जातः सुतस्तदा।
अपवादभयाच्छीघ्रं कुन्ती परिजनश्च तम् ।।90।।

मंजूषायां समारोप्य सुरत्नकवचांचितम्।
सारभूषासमायुक्तं सलेखं[3] बालकं पुनः ।।91।।

कालिंद्याः सत्प्रवाहे तं मुंचति स्म सुगूढ़तः।
त्यजन्ति सज्जनाश्चापि पुत्रं लज्जाकरं परम् ।।92।।

नद्याः प्रवाहतः सापि मंजूषा वेगतस्तदा[4]।
प्राप्ता चंपापुरेशेन सूर्याख्येन महीभुजा ।।93।।

सर्वलक्षणसंपूर्णो दिव्याभरणभूषितः।
कोमलः कल्पवृक्षो वा तत्र दृष्टः स बालकः।।94।।

1.अदृश्यकीरणं इति अ प्रतौ, आदृश्याकरणं इति स प्रतौ

2. दिनीन्येषास्तुं इति ब प्रतौ

3.सखेलं इति स प्रतौ, सलेषं इति अ-ब प्रतयोः।

4.वेगतो गता इति स प्रतौ

तदा स्वानन्दचित्तेन स्वदेव्याः परमादरात्।
अस्तु ते तनयश्चेति राधायाः समर्पितः॥95॥

सापि कर्णं स्वहस्तेन स्पृशं तं वीक्ष्य बालकम्।
कर्णनामास्तु पुत्रोयमिति नाम मुदां ददौ ॥96॥

एवं तत्र सुखेनोच्चैः स बालः पूर्वपुण्यतः।
वृद्धिं संप्राप्तवान्नित्यं यथा दानद्रुमांकरः॥97॥

इतः शौर्यपुरे चापि स तदांधकवृष्टिवाक्।
मत्वा पण्डुकृतं चित्ते धूर्त्तत्वं स्वशिरस्तरां ॥98॥

विधूय पंडवे तस्मै कुंतीं माद्रीं च ते सुते ।
प्रजापत्यविवाहेन ददौ गंभीरमानसः॥99॥

ततः कुन्त्यां समुत्पन्नो ज्येष्ठपुत्रो युधिष्ठिरः[1]।
भीमसेनोऽर्जुनश्चेति त्रयः पुत्राः गुणोज्जवलाः॥100॥

बभुवुः परमानंददायिनः सुभटोत्तमाः ।
रुपादिकं किमावच्मि यत्र रत्नत्रयोपमाः ॥101॥

मद्रीकुक्षौ समुत्पन्नौ नकुलः सहदेववाक् ।
द्वौ पुत्रौ स्वर्गमोक्षौ समार्गौ वा पुण्यशालिनौ ॥102॥

एवं ते पांडवाः पंच संजाताः संपदान्विताः।
सर्वकार्यविधौ दक्षाः पंच वा परमेष्ठिनः॥103॥

धृतराष्ट्राय गांधारी दत्ता पित्रा महोत्सवैः।
पद्मावती समुत्पन्ना नरादिपतिवृष्टिना॥104॥

तयोः पुत्रा समुत्पन्ना गांधारीधृतराष्ट्रयोः।
ज्येष्ठो दुर्योधनो नाम्नापरो दुःशासनो मतः॥105॥

1.युष्टरः इति ब प्रतौ।

दुर्द्धषणः सुतश्चापि तुर्यो दुर्मर्षणो भटः।
एवं सर्वे बभूवुस्ते पुत्राणां शतमुत्कटम्॥106॥

इत्यादिसर्वभूपानां पूर्वपुण्यप्रसादतः॥
सुखेनोच्चैर्गलत्यत्र कालो लीलाविधायिनाम्॥107॥

एकदा सुप्रतिष्टाख्यो मुनीन्द्रो गन्धमादने॥
गिरौ तत्र समायातश्चारुचारित्रमंडितः॥108॥

श्रीमज्जिनेन्द्रचन्द्रोक्तो सप्ततत्वाच्चिचंद्रमा।
निष्कलंकः कलायुक्तो दयाकान्त्यासमुज्जवलः॥109॥

तदाशौर्यपुराधीशः सूरवीरो महानृपः॥
तं वन्दितुं महाभक्तया पुत्रपौत्रादिभिर्युतः॥110॥

गत्वा योगीन्द्रपादाब्जं द्वयमभ्यर्च वस्तुभिः।
स्तुत्वा तदुक्तमाकर्ण्य धर्मशर्माकरं परम्॥111॥

सद्यः संवेगनिर्वेदपरो भूत्वा विचक्षणः।
कृत्वाभिषेचनं जैनं पुत्रस्यापि महोत्सवैः॥112॥

स्वराज्यं ज्येष्ठपुत्राय स दत्वाधंकवृष्लये।
नराधिपति वृष्लौ च यौवराज्यं विधाय वै॥113॥

तत्पादपद्मयोर्मूले मुनिर्भूत्वा त्रिशुद्धितः।
संचकार जिनेन्द्रोक्तसत्तपांसि प्रसन्नधी:॥114॥

ततो द्वादशवर्षेषु गतेषु घटिकादिभिः।
तत्रैव पर्वते गंधमादने स मुनीश्वरः॥115॥

सुप्रतिष्ठः समालंब्य प्रतिमायोगमुत्तम्।
प्रतिष्ठितस्तमालोक्य नाम्ना देवः सुदर्शनः॥116॥

चकारोपद्रवं घोरं पापीधर्मपरान्मुखः।
विनिर्जित्योपसर्गं तं सोढ्वाशेषपरीषहान् ।।117।।

ध्यानेन घातिकर्माणि हत्वा श्रीसुप्रतिष्ठवाक् ।
संजात केवलज्ञानी लोकालोकैकभास्करः।।118।।

तदा पूजार्थमायातैः देवैरंधकवृष्टिवाक् ।
राजा तत्र सहागत्य कृत्वा पूजादिकं शुभम् ।।119।।

तं जिनं पृच्छति स्मोच्चैर्भो स्वामिंस्त्रिजगद्गुरुः।
हेतुना केन देवोऽयं चक्रे श्रीमत्युपद्रवम् ।।120।।

तद्वाक्यावसि तौ सोऽपि जिनः संप्राह भो ! श्रृणु ।
द्वीपेऽस्मिन् भारते क्षेत्रे कलिंगविषये शुभे ।।121।।

कांचीपुर्यां वणिक्पुत्रौ सूरदत्तसुदत्तकौ ।
गत्वा लंकादिषु स्वैरं द्वीपेषु धनहेतवे ।।122।।

समावर्ज्य धनं भूरि पुनरागत्य लोभतः।
तन्निक्षिप्य पुरी बाह्ये भूमौ शुल्कभयाकुलौ ।।123।।

मूले ह्रस्वतरोः कृत्वा साभिज्ञानं स्वयं गतौ ।
तत्रान्यदा समागत्य कश्चन मद्यस्य हेतवे ।।124।।

तद्योग्यवृक्षमूलानि संगृह्णन् संविलोक्य तत् ।
महाधनं समादाय सगतो वेगतो मुदा ।।125।।

ततस्तौ च वणिक्पुत्रौ तत्रागत्य धनेच्छया।।
अनिरीक्ष्य धनं भ्रान्त्या रूषा हत्वा परस्परम् ।।126।।

क्रोधलोभग्रहग्रस्तौ गत्वा नरकमादिकम्।।
तत्र दुखं चिरं प्राप्य तस्मादागत्य कष्टतः।।127।।

विंध्याद्रिकंदरे मेषो भूत्वा युद्ध्वा तथा मृतौ।।
गंगातटे समुत्पन्नौ वृषभौ गोकुले ततः।।128।।

पूर्ववैरेण तत्रापि महायुद्धविधायिनौ।।
मृत्वा सम्मेदशैलाग्रे मर्कटौ तौ बभूवतुः ॥129॥

तत्र तौ द्वौ तृषान्क्रान्तौ वानरौ गिरिसत्तमे ।
तुच्छतोयं शिलापीठे संविलोक्य तदर्थिनो ॥130॥

दन्तैर्नखैः करैर्गाढ़ं कलहं चक्रतुः पुनः पुनः।
एको मृतो द्वितीयस्तु जातः कंठगतासुकः॥131॥

तस्मिन्नेव क्षणे तत्र चारिणौ मुनिसत्तमौ ।
नाम्नासुरगुरुर्देवगुरुश्च गुणगोचरौ ॥132॥

ताभ्यां पंचनमस्कारान् धर्मश्रवणपूर्वकम् ।
कारूण्यात् कथितानुच्चैः समाकर्ण्य स वानरः॥133॥

तत्प्रभावेन सौधर्म्मस्वर्गे चित्रांगदः सुरः।
अभूत्तत्र सुखं भुक्त्वा दीर्घकालं ततश्च्युतः॥134॥

जंबूद्वीपेऽत्र विख्याते क्षेत्रे भरतनामनि ।
सुरम्यविषये रम्ये पोदनाख्ये पुरोत्तमे ॥135॥

नाम्ना स्थितस्य भूपस्य महादेवी सुलक्षणा ।
सुप्रतिष्ठः सुतस्तस्यां जातोऽहं शुद्धमानसः॥136॥

एकदा प्रावृडारंभे गिरावसितनामनि।।
द्वयोर्मकटयोर्युद्धं विलोक्य निजमानसे ॥137॥[1]

हा मयापि कृतं युद्धमेवं क्वापि स्मरन्निति।।
ज्ञात्वा पूर्वभवं जातः वैराग्यः संसृतेस्तरां ॥138॥

सुधर्म्माचार्यमाश्रित्य मुनिर्भूत्वा त्रिधा ध्रुवम्।।
सूरदत्तचरः सोहं तपः कुर्वन्निह स्थितः॥139॥

1.श्लोकसंख्या भेदं इति अ प्रतौ

सुदत्तो मेऽनुजः पूर्वं यो भ्रान्त्वा भवसागरे।।
सिंधुतीरे कुदृष्टेश्च मृगायणतपस्विनः।।140।।

विशालायां सुतो जातो गोतमाख्यो कुबोधभाक्।।
तपः पंचाग्निकं कृत्वा स भूत्वा ज्योतिषां गणेः ।।141।।

देवसुदर्शनो नाम्ना पूर्ववैरप्रभावतः।।
चकारोपद्रवं मेसौ धर्ममार्गपरान्मुखः।।142।।

शुक्लध्यानबलेनाहं जित्वा शेषपरीषहान्।
घातिकर्माणि निर्मूल्य संजातोऽस्म्यहं केवली ।।143।।

इत्यादिकं समाकर्ण्य तज्जिनोक्तवचोमृतम्।।
मुक्तवैरः सुरः सोऽपि सुदर्शनसमाह्वयः।।144।।

धर्मं श्रुत्वा जिनेन्द्राणां राजा संतुष्टमानसः।।
पुनस्तं जिनमानम्य सुप्रतिष्ठं जगद्धितम् ।।145।।

कृत्वा करांजलिं भक्त्या दृष्टवान् स्वभवावलीम्।।
सर्वज्ञः सोऽपि संप्राह जंबूद्वीपेऽत्र भारते ।।146।।

अयोध्यानगरे राजानंतवीर्यो महानभूत्।।
सुरेन्द्रदत्तस्तत्रैव संजातो वणिजां पतिः।।147।।

पूर्वपुण्येन सर्वाभिः संपदाभिः समन्वितः ।।
दाता भोक्ता जिनेन्द्राणां पादपद्मार्चने रतः ।।148।।

तथा शीलोपवासादिधर्मकर्मणि तत्परः।।
नित्यं करोति दीनारैर्दशभिर्जिनपूजनम् ।।149।।

अष्टम्यां द्विगुणी र्भव्यश्चतुर्दश्यां चतुर्गुणैः।।
अमावस्यादिने पर्वण्यष्टभिर्गुणितैश्च तैः ।।150।।

तद्दानादिं गुणानुच्चैः[1] शशिद्युति[2] समुज्वलान् ।।
किं वक्ष्ये यान् समालोक्य सद्धर्मेऽपि परेऽभवन् ।।151।।

1.गुणानोच्चैः इति ब प्रतौ
2. शशीद्युति इति अ प्रतौ

कदाचित् सवणिग्वर्यः सुधीर्वाणिज्यहेतवे।।
गन्तु वारिपथं शीघ्रं धनं द्वादशवार्षिकम् ।।152।।

रुद्रदत्तस्य विप्रस्य स्वमित्रस्य करे ददौ ।
धनेनैतेन भो ! मित्र ! जिनं पूजां तरां कुरु ।।153।।

अथाहं मत्परोक्षेऽपि गदित्वेतिविशुद्धधीः।
गतो देशांतरं चित्ते संस्मरन् जिनपुंगवान् ।।154।।

सुरेन्द्रदत्तः स श्रेष्ठी केवलं न गतस्तदा ।
देशांतरं मनोगेहाद्विप्रस्यापि वृषोगतः।।155।।

तस्मिन् गते वणिग्वर्ये स विप्रः कतिचिद्दिनै: ।
वेश्याद्यूतादिभिः सर्वं नयति स्म क्षयं धनम् ।।156।।

ततस्तत्पत्तने पापी कुर्वंश्चौरीं परिभ्रमन् ।
रात्रौ तत्कोट्टपालेन श्येनकाख्येन वीक्षितः।।157।।

रे रे दुष्ट ! त्वकं या हि नगराद्वेगतो ध्रुवम् ।
मारयामि न विप्रत्वात्तस्करं त्वां सुपापिनम् ।।158।।

अतःपरं चेद्दृष्टोऽसि हन्यसे त्वं मया खलः।
इत्यादितर्जितः सोऽपि रूद्रदत्तो दुराशयः ।।159।।

व्याधपल्लीं कुधीर्गत्वा सेवयामास तत्पतिम् ।
अयोध्यायां समागत्य दुष्टैर्भिल्लैः सहैकदा ।।160।।

तद् गोकुलं समादाय गच्छन् पापी पुनर्हतः।
श्येनकेन हतो मृत्वा सप्तमं नरकं गतः।।161।।

दीर्घकालं महादुःखं छेदनं भेदनादिकम् ।
भुक्त्वा तस्माद्विनिर्गत्य महामत्स्यो बभूव सः।।162।।

सोऽपि षष्टे हरिः पापी पंचमे नरके तत।।
भूत्वा दृष्टिविषः सर्पः पातालेऽपि चतुर्थके ।।163।।

शार्दूलः स पुनर्भूत्वा नरके च तृतीयके ।
पक्षिराजो द्वितीये च व्यालश्च प्रथमाक्षितौ ॥164॥

एवं सप्तक्षिती गत्वा त्रसस्थावरकेषु च ।
महादुःखं सविप्रोऽपि संप्राप्तपापकर्मणा ॥165॥

इत्थं मत्वा जिनेन्द्राणां पूजास्तोत्रादिकेषु वै ।
अन्तरायो न कर्तव्यः कदा कस्यापि धीधनैः ॥166॥

ततो जंबूमतीद्वीपे भरते कुरुजांगले ।
देशे गजपुरे भूपे प्रजापतिधनंजये ॥167॥

कपिष्ठलस्य विप्रस्य भार्याऽभवदनुधरी।
स संसारे तथा भ्रांत्वा तस्या: गर्भे सुतोऽभवत् ॥168॥

गौतमाख्यः पुरा पापात् तदुत्पत्तौ क्षयं गतम्।
तत् कुलं सकलं सोऽपि केवलं निर्द्धनः स्थितः॥169॥

क्षुधातृष्णादिभिस्तप्तः करे धृत्वा सकर्परम्।
भिक्षार्थं पर्यटन् पुर्यां यत्र तत्र पतन्नपि ॥170॥

महाजीर्णकटीदेशे मलिनं च विशेषतः।
धरन्वस्त्रं यथा मिथ्याशास्त्रं क्षोदक्षमोज्झितम् ॥171॥

यूकालिख्या सहस्राणि शिरोभागे समुद्वहन् ।
पुराकृतमहापापरूपाणीव प्रदर्शयन् ॥172॥

ताड्यमानः पुरीबालैर्लकुटैरूपलादिभिः।
आरटन्निपतन् धावन्नसमर्थस्तरां रुदन् ॥173॥

दण्डितः स्वेन पापेन दण्डधारी स विप्रकः।
देहि देहीति पूत्कारं कुर्वन्गात्रे मलीमसः ॥174॥

पापरूपं भवेदीदृक् स्वरूपं वेति सूचयन् ।
इत्यादिदुःखभारेण पीडितः पर्यटन् पुरे ॥175॥

कालादिलब्धियोगेन कदाचिन्मुनिपुंगवम् ।
समुद्रसेननामानं संव्रजंतं तनुस्थिते ।।176।।

तं विलोक्य स विप्रोऽपि निर्द्धनोऽयं विशेषतः।
कथं प्रवतर्तेऽद्याहं पश्यामि पापीवृत्तकम् ।।177।।

स्वचित्ते विस्मयोपेतः संविचार्येति गौतमः।
चचालपृष्टतस्तस्य मुनीद्रस्य महात्मनः।।178।।

वणिग् वैश्रवणस्तत्र नवपुण्यैः सुभक्तितः।
प्रतिगृह्य मुनिं तस्मै शुद्धाहारं ददौ मुदा ।।179।।

मत्वा तं च मुनेः पार्श्ववर्तिनं गौतमं द्विजम् ।
आकण्ठं भोजयामास मिष्टाहारं दयापरः।।180।।

आजन्मदुर्लभं भुक्त्वा संतुष्टः सोऽपि मानसे।
रूषित्वं प्रतिपद्योच्चैः समागत्य तदाश्रमम् ।।181।।

नत्वा मुनिं जगादैवं भो ! मुने ! त्वं दयापरः।
त्वादृशं कुरु वेगेन मामपि प्रथितोदयम् ।।182।।

गुरुसमुद्रसेनोऽपि ज्ञानी मत्वा स्वचेतसि ।
भव्योऽयं निश्चयाद्च्छीघ्रं मुक्तिकान्तो भविष्यति ।।183।।

कैश्चिद्दिनैः समालोक्य तन्मनोदृढतांतराम् ।
ददौ दीक्षां सुधीस्तस्मै सुरासुरनमस्कृताम् ।।184।।

ततः श्रीगुरुणा तेन जिनागमसरित्पतेः।
सपारं प्रापितः सत्यं गुरवो भवतारकाः।।185।।

शिष्यः सोऽपि गुरोर्भक्त्या ज्ञात्वा शास्त्राणि वेगतः।
संवत्सरस्य मध्येऽपि भूत्वा सप्तर्द्धिमंडितः ।।186।।

श्रीगौतम इति ख्यातः संजातो भुवनत्रये।
क्रमेण स्वगुरोः स्थानं प्राप्य जातो जगद्धितः।।187।।

अहो लोके ददात्युच्चैर्गुरूभक्तिः परं शिवम्।
का कथा परवस्तूनां धन्यधान्यादिसंपदाम् ॥188॥

गुरुः समुद्रसेनाख्यो जैनतत्वविदां वरः।
कृत्वा सन्यासमत्युच्चैर्जीवितां ते समाधिना ॥189॥

षष्टे ग्रैवेयके नाम्ना सुविशाले विमानके ।
अहमिन्द्रो गुणैः रुद्रः संजातः सौख्यभाजनम् ॥190॥

ततो विप्रमुनिः सोऽपि श्रीगौतमसुनामभाक्।
आराधनां समाराध्य सन्यासेन समग्रधीः ॥191॥

तत्रैव निजपुण्येन भूत्वा देवोऽहमिन्द्रभाक्।
अष्टाविंशतिवार्द्ध्यायुः प्राप्य सारसुखं महत् ॥192॥

तस्माद्विप्रचरो देवः समागत्यात्र भूतले।
स्वनाम्नाधंकवृष्टिः त्वं संजातोऽसि प्रभुर्महान् ॥193॥

इत्यादिविस्तरेणोच्चैः सुप्रतिष्ठजिनोदितम्।
श्रुत्वा स्वभावसम्बन्धं संतुष्टो मानसे नृपः ॥194॥

पुनर्नत्वा जिनाधीशं केवलज्ञानचक्षुषम्।
पृच्छति स्म स्वपुत्राणां पूर्वजन्मप्रचेष्टितम् ॥195॥

अकारणजगद्बंधुः सुप्रतिष्ठो जिनोऽवदत्।
सर्वभाषास्वभावेन ध्वनिना शर्मकारिणा ॥196॥

इह जम्बूमतिद्वीपे विषये मंगले शुभे।
राजामेघरथोनाम पुरे भद्रिलसंज्ञके ॥197॥

देवी नाम्ना सुभद्राऽभूत् पुत्रोऽहं दृढरथस्तयोः
यौवराज्यश्रिया सोऽपि शोभितश्च शुभोदयात् ॥198॥

तथा तत्रैव संजातो धनदत्तो वणिक्पतिः ।
भार्या नंदयशास्तस्यां संबभूवुः सुताः नव ॥199॥

ज्येष्टोऽभूद्धनदेवाख्यो द्वितीयो धनपालवाक्।
तृतीयो धनदेवश्च जिनपालश्चतुर्थकः ।।200।।

अर्हदत्ताभिधः पुत्रः षष्टोऽर्हद्दाससंज्ञकः।
सप्तमो जिनदत्तोऽभूत् प्रियमित्रोष्टमो मतः।।201।।

नवमो धर्मरुचाख्यः पुत्री च प्रियदर्शना।
ज्येष्ठा नाम्नी द्वितीयासौ संजाता सुगुणोज्ज्वला ।।202।।

एकदा स नृपो मेघरथो धर्मरथोपमः।
वने सुदर्शनरम्ये मन्दिरस्थविरं मुनिम् ।।203।।

श्रुत्वा समागतां शीघ्रं श्रेष्ठी च धनदत्तकः।
तौ द्वौ पुत्रादिभिर्युक्तो गत्वा नत्वा सुभक्तितः ।।204।।

श्रीमज्जिनेन्द्रचन्द्रोक्तं श्रुत्वा धर्मं तदन्तिके।
दत्वा दृढरथायोच्चैः स्वराज्यं विधिपूर्वकम् ।।205।।

दीक्षां जग्राह जैनेन्द्रीं भवभ्रमणनाशिनीम् ।
श्रेष्ठां च नवभिः पुत्रैर्मुनिजातः सहोत्तमैः ।।206।।

तदा नंदयशा सापि पुत्रीद्वयसमन्विता।
सुदर्शनार्यिकापार्श्वे सन्ती संयममाददो ।।207।।

मन्दिरस्थविराचार्यो मुनिर्मेघरथः स्थिरः।
धनदत्तमुनिश्चेति ते त्रयो मुनिसत्तमाः।।208।।

क्रमाद्वाणारसीबाह्ये समागत्य स्वलीलया।
शुक्लध्यानेन घातीनि हत्वा केवलिनोऽभवत् ।।209।।

इन्द्रादिभिः समर्च्यास्ते त्रयोऽपि जिनपुंगवाः।
भव्यान् संबोधयन्तश्च प्राप्ता राजग्रहे बहिः।।210।।

शुद्धे सिद्धशिलापीठे वीस्तीर्णे तत्र निश्चले।
जरामरणनिर्मुक्ता संप्रापुर्मोक्षमक्षयम् ।।211।।

अन्येद्युर्द्धनदेवाद्या स्तेन वापि मुनीश्वराः।
तस्मिन्नेव शिलापीठे सन्यासेन दृढ़ं स्थिताः॥212॥

तान् समालोक्य सा माता पुत्रीद्वयसमान्विता ।
नाम्ना नंदयशा चित्ते पुत्रमोहेन मंडिता ॥213॥

एते सर्वेऽपि मे पुत्रा संजाता गुणशालिनः।
यथा तथा परत्रापि भवन्तु मम देहजा:॥214॥

अमू द्वे मे प्रिये पुत्र्यौ भवतां परजन्मनि ।
चेज्जिनेन्द्रतपस्युच्चर्फलं चास्ति महीतले ॥215॥

कृत्वा निदानकं चेति सार्यिकापि स्वयं तथा ।
सन्यासं च विधायोच्चैः पुत्रैश्च सहिता तदा ॥216॥

मृत्वानते ततः स्वर्गे शतंकरविमानके।
समुत्पद्य सुखं भुक्त्वा तत्र विंशतिसागरैः ॥217॥

ततश्च्युत्वानतस्वर्गात् सतीनंदयशेश्वरी।
सभद्रा ते प्रिया जाता रूपसौभाग्यमंडिता ॥218॥

ते सर्वे धनदेवाद्यास्तस्मादागत्य पुण्यतः।
सुपुत्रास्ते समुत्पन्ना: समुद्रविजयादयः ॥219॥

प्रियदर्शना ज्येष्ठा च कुंती माद्री सुते तव।
बभूवतुर्जगत्सार रूपसंपद्विराजते ॥220॥

अथ श्री सुप्रतिष्ठाख्यं संप्रणम्य जिनं मुदा ।
सुधीरंधकवृष्टिश्च वसुदेवभवावलीम् ॥221॥

अपृच्छत् स जिनः प्राह स्वामी गंभीरभाषया।
स्वभावस्तादृशास्तेषां येन भव्येष्वनुग्रहः॥222॥

ग्रामे पलाशकूटाख्ये विषये कुरु नामनि।
ब्राह्मणः सोमशर्माख्यः पापाद्दारिद्र्यपीडितः॥223॥

तस्य नंदीसुतो जातः पूर्वकर्मवशात् स च।
दुर्गतो दुर्भगो दुःखी दानमानादिवर्जितः ॥ 224॥

सत्यं पुण्यविहीनानां कथं स्यात् संपदागमः ।
तस्मात् पुण्यधनं भव्याः संचयन्तु सदादरात् ॥225॥

नंदिनस्तस्य संजातो मातुलो देवशर्मवाक्।
तद्ग्रहे कन्यकात् सप्त बभुवुर्गुणमंडिताः ॥226॥

स नन्दी सेवयामास मातुलं च चिरं भृशम्।
तत्कन्याहेतवे सोऽपि देवशर्माभिःधानकः॥227॥

तस्मै मुनिर्धनत्वाच्च कन्या मे कामपि ध्रुवम्।
नो ददाति स्म चान्येभ्यो ददौ सर्वाः स्वपुत्रिकाः॥228॥

अथान्येदुः सनंदी च सोमशर्मद्विजात्मजः।
नटप्रेक्षणकं क्वापि कौतुकाद्वीक्षितुं गतः॥229॥

तत्र भूरि भटोत्पन्नः संघट्टात् पतितः क्षितौ।
तदा सर्वजनैर्हस्ता स्फालनैर्हसितस्तराम् ॥230॥

तत्रापि लज्जितो गाढं मानभंगेन पीड़ितः।
अस्तुवन् स्वस्य दुर्भाग्यं भृगुपाते छयाद्रुतम् ॥231॥

शिलोच्चयं समारूह्य टंकच्छिन्ने च संपतन्।
भीत्वा तत्र यदा कुर्वन् गमनागमनादिकम् ॥232॥

तदा तत्पर्वतस्याधोभागे शुद्धे धरातले।
शंखनिर्नामिकाख्यौ द्वौ सुस्थितौ गुरुणा मुनी ॥233॥

पंतती वीक्ष्य तच्छायां पृच्छतः स्म निजं गुरुम्।
इयं छायास्ति कस्येति ब्रूहि भो ! मुनिपुंगवः! ॥234॥

तदा श्री द्रुमषेणाख्यौ गुरुर्ज्ञानत्रयान्वितः।
संजगाद वचः स्वामी स तयोर्निजशिष्ययोः॥235॥

यस्तृतीये भवे भावीर्भवतोर्जनकः सुधी।
छायेयं तस्य भो वत्सौ! श्रुत्वेति करुणायुतौ!।।236।।

गत्वा तस्य समीपं तौ प्राह तु स्तवनं दिनम्।
कस्मात्ते मरणे वांछा वर्त्तते पापकर्मणि ।।237।।

इत्याकर्ण्य स च प्राह कन्यालाभादिसंभवम् ।
कारणं मानभंगस्य स्वकीयं दुर्भगादिकम् ।।238।।

तौ तं समूचतुर्भद्र मुंचेंद कर्म दुःखदम्।
भूरि संसारवारासौ पातकं मूढदेहिनाम् ।।239।।

भाग्यसौभाग्यसम्मानसंपदादिकवस्तुषु।
चेद्वांछा भवतो गाढ़ं सुधीः स्वर्गापर्वगयोः।।240।।

तदा श्रीमज्जिन्नेद्रचंद्रोक्तं कुरु त्वं सत्तपो ध्रुवम्।
येन ते सर्वकार्याणां संसिद्धिः सभंवत्यहो ।।241।।

इत्यादिभिर्वचो वर्गैस्तमग्राहयतां तपः।
सत्यं सन्त प्रकुर्वन्ति परेषां हितमादरात् ।।242।।

ततो नन्दी मुनिः सोऽपि चिरं कृत्वा तपः शुभम्।
महाशुक्रे सुरो जातः षोडशाब्दिषु जीवितः ।।243।।

अनुभूय सुखं तत्र मनोभीष्टं निरंतरम्।
तस्मादागत्य पुत्रस्ते वसुदेवो बभूव च ।।244।।

रूपसौभाग्यसन्मानसारसंपद्विराजितः।
महाभटशिरोरत्नं गुणानामाकरो ध्रुवम् ।।245।।

यस्मात् भाविनौ सत्यं नवमौ बलकेशवौ।
त्रिखंडाखंडभूपालः संसेवितपदद्वयौ ।।246।।

श्रुत्वेति भूपतिः श्रीमानंधकवृष्टिनामभाक्।
भवावलीं च सर्वेषां सुप्रतिष्ठजिनोदितम् ।।247।।

प्राप्य संवेगनिर्वेदं मोक्षलक्ष्म्यै समुत्सकः।
समुद्रविजयायोच्चैर्महाभिषवपूर्वकम् ।।248।।

ज्येष्ठपुत्राय योग्याय समस्तगुणशालिने।
राज्यं भारं सुधीर्दत्वा मत्वा सर्वं नृणोपमम् ।।249।।

कृत्वा दानं यथायोग्यं राजभिर्बहुभिः सह।
सुप्रतिष्ठजिनस्यैव पादमूले जगद्गुरोः।।250।।

दीक्षामादाय जैनेन्द्रीं सर्वसिद्धिविधायिनीम् ।
कृत्वा तपो महाशुद्धं रत्नत्रयविराजितः।।251।।

प्रान्ते सन्यासयुक्त्यासौ ध्यात्वात्मानं निजं सुधीः।
शुक्लध्यानेन घातीनि हत्वा कर्मणि कर्मठः ।।252।।

केवलज्ञानमुत्पाद्य सुरासुरसमर्चितः ।
शेषकर्मणि निर्मूल्य शुक्लेनान्तेन निर्मलः।।253।।

जरामरणदुःखौघः निर्मुक्तां मुक्तिमुत्तमाम् ।
संप्राप्तः समयेनोच्चैः सिद्धो बुद्धो निरंजनः।।254।।

स्वामी सोंधकवृष्टाख्यः समाराध्यः सदा मम ।
भव्यानां च जिनः सिद्धः संकुर्याच्छाश्वतीं श्रियाम् ।।255।।

(शार्दूलविक्रीडित)

सद्धर्मामृतपूरतर्जितजगत्पाप प्रतापोत्करः।
संसारोरूसमुद्रतारणपरः संज्ञानभाभास्करः।
लोकालोकविलोकनैश्चतुरः सत्सौख्यसंपत्करः।
स श्रीनेमिजिनेश्वरः स्थिरतरः कुर्यात् सतां वांछितम् ।।256।।

इति त्रिभुवनैकचूड़ामणिश्रीनेमिजिनपुराणे भट्टारकश्रीमल्लिभूषणशिष्याचार्यः श्रीसिंहनन्दिनामांकिते ब्रह्मनेमिदत्तविरचित्ते हरिवंशावलीव्यावर्णनो नाम तृतीयोऽधिकारः ।।3।।

चतुर्थोऽधिकारः

अथ शौर्यपुराधीशो हरिवंशशिरोमणिः।
समुद्रविजयः राजा कुर्वन् राज्यं सुखं स्थितम् ॥1॥

भ्रातृभिर्नवभिर्नित्यं मण्डितः प्रीतिमण्डितैः।
खण्डितारातिषड्वर्गः शक्तित्रयसमन्वितः॥2॥

यथा चन्द्रः कलायुक्तो नभोभागे विराजिते।
राजविद्याभिरायुक्तो राजते स्म स तथा नृपः॥3॥

तस्य राज्ये प्रजाःसर्वाः वर्णाश्रमसमाश्रिताः ।
स्वस्वधर्मे निराबाधं प्रवर्तन्ते स्म ताः सुखम् ॥4॥

एवं श्रीमज्जिनेन्द्रोक्ते धर्मे कर्मणि तिष्ठताम्।
समुद्रविजयादीनां कालो गच्छति[1] सौख्यतः॥5॥[2]

वसुदेवकुमारोऽथ कामदेवः सविंशकः।
रूपसौभाग्यसम्पन्नः पुरे तत्र दिनं प्रति ॥6॥

आरूह्य मत्तमातंगं चलच्चामरवीजितः।
मुक्ताफललसच्छत्रो ध्वजमालाविराजितः॥7॥

चतुरंगबलोपेतो वस्त्राभरणभूषितः।
पर्यटन् कल्पवृक्षो वा याचकांस्तर्पयंस्तराम् ॥8॥

बन्दिमागधसंदोहैः पठ्यमानं[3] निरन्तरम् ।
श्रृण्वन् यशः स्वकीयं च शशिद्युतिः समुज्वलम् ॥9॥

स्वप्रतापेन निर्जेतुं भास्करस्येव मण्डलम्।
कान्त्या कुवलयाह्लादी चन्द्रवन्निर्मलस्तराम् ॥10॥

---

1. गछति इति स प्रतौ
2. अ प्रतौ अनुपलब्धः
3.पठ्रमानं इति स प्रतौ

कल्लरीतालकं सालं दुन्दुभीनां समूहतः।
निर्गच्छ ध्वनिसन्दोहः बधिरीकृतदिङ्मुखम् ॥11॥

सारकर्पूरताम्बूलः लसत्कुंकुमसद्रसैः।
सुगन्धीकृतभूभागोविलसत्कुसुमोत्करः॥12॥

साक्षाद्देवकुमारो वा परैः राजकुमारकैः।
सेव्यमानो महाप्रीत्याजनयत् प्रीतिमद्भुताम् ॥13॥

जनानां मोहयन्नुच्चैः सर्वस्त्रीणां मनोम्बुजम्।
के वा नोत्पादयन्त्युच्चैः सत्प्रीतिं पुण्यमण्डिता ॥14॥

लीलाया पर्यटन्नेवं[1] यावद्वादर्शयन् शुभम्।
तावत्तददर्शने तत्र संशक्ताः[2] पुरपोषिताः॥15॥

तं वीक्षितुं तदा सर्वे पोषिताः मदनोत्सुकाः ।
धावन्ति[3] स्म द्रुतं स्वैरं सरितो वा सरित्पतिम् ॥16॥

धावमानाः स्त्रियः काश्चित् प्रस्खलन्ति पदे पदे।
यथा मिथ्यादृशां लोके कृतयो युक्तिवर्जिताः[4]॥17॥

काश्चित् स्त्रियो मदोन्मत्ता वीक्षितुं तं विनिर्गताः ।
उभयोः पक्षयोर्भक्ताः मर्यादां सरितो यथा ॥18॥

गच्छन्त्योऽपि पराः काश्चित्[5] पतद्वस्त्रादिकं निजम्।
जानन्ति स्म न मार्गेऽपि ज्वरेणैव वशीकृता ॥19॥

1.पर्यटत्वे इति ब प्रतौ

2.संसक्ताः इति अ-स प्रतयोः

3.धावती इति ब प्रतौ

4.युक्तिवर्जिता इति स प्रतौ

5.परान्काश्चित् इति द प्रतौ

काश्चित्यक्त्वा स्वकर्माणि निर्ययुस्तं निरीक्षितुं।
मूढानां मतयो वोच्चैरासक्ताः[1] परवस्तुषु ।।20।।

तस्य निर्गमने काचित् कामिनी कुंडलादिकम्।
कृत्वा पादे शिरोदेशे पादभूषाञ्च निर्गता ।।21।।

काचित् त्यक्त्वा निजं बालं कक्षां धृत्वा च मर्कटम्।
निर्ययौ मदनो मूढे किं करोति न दुर्घटम् ।।22।।

ललाटे कज्जलं कृत्वा कामिनी[2] कापि निर्गता।।
दर्शयन्ती व मूर्खत्वं[3] चिह्नं विह्वलमानसा ।।23।।

चन्दनागुरुकाश्मीरं[4] मुक्त्वा काचित्समुत्सुका[5]।
कृत्वांगे कर्दमं शीघ्रं निर्गता तद्गताशया ।।24।।

काश्चिद्धावन्ति पश्यन्ति किरन्ति कुसुमाञ्जलिम्।
अहो रूपमहो रूपं सम्ब्रुवन्तीति मोहिताः।।25।।

यद्रूपं वीक्ष्य सन्तोऽपि प्रशंसन्ति जगद्धितम् ।
तत्र मुग्धासु नारीषु का कथा चित्तहारिणी ।।26।।

अन्यस्मिन्नेव सद्रूपं भवेत् प्रीतिकरं परम् ।
यः स्वयं कामदेवोऽत्र तद्रूपं किं करोति न ।।27।।

इत्यादिकां समालोक्य स्त्रीणां चेष्टा मदोद्धताम् ।
सर्वपौरा सुनिर्विण्णा[6] नत्वा प्रादुर्नराधिपम् ।।28।।

अहो देव! भवन्तस्तु प्रजानां प्रतिपालकाः।
कृपां कृत्वात्र श्रृण्वन्तु[7] साम्प्रतं जनजल्पितम् ।।29।।

---

1. मतयोवोच्चैराशक्ताः इति ब प्रतौ
2.कामि इति अ प्रतौ
3. मूर्षत्वं इति अ प्रतौ,मूढत्वं इति स प्रतौ
4. कास्मीरं इति अ-ब-स प्रतीनाम्
5. समुत्सकाम् इति अ-द प्रतयोः,
6.सुनिर्विन्ना इति सर्वेषां प्रतीनाम्
7.श्रृण्वंत् इति ब प्रतौ

वसुदेवकुमारस्य रूपेणात्यन्तमोहिताः।
सर्वस्त्रियः पुरे राजन्! बभूवुः व्यग्रमानसाः॥30॥

सर्वाणि गृहकर्माणि त्यक्ताः धावन्ति नित्यशः।
निरीक्षितुं कुमारस्य सद्रूपं भुवनातिगम् ॥31॥

अस्माकं भो जनादौ! च सन्देहो जनि भूपते।
किं कुर्मोऽत्र वयं देवं पीडिताः मानसेतराम् ॥32॥

श्रुत्वेति वचनं राजा समुद्रविजयसुधीः।
सन्तोष्य वचनैः पौरमहाजनकदम्बकम् ॥33॥

कुमारे सहजस्नेहान्मानसे संविचारयन्।
स्फुरं चेद्वार्यते बालः खेदं यास्यति चेतसि ॥34॥

इत्थं सञ्चित्य चैकान्ते तमात्य जगौ शनैः।
अहो वत्स! वृथा नित्यं पुरे पर्यटने तव ॥35॥

आतपेन[1] परिम्लानं शरीरं दृश्यतेतराम् ।
तस्माद् बहिर्न गन्तव्यं वृथा भ्रमणहेतवे ॥36॥

विहारे परिवाञ्छा चेत्तवास्ति गुणमन्दिरम् ।
महारम्ये गृहोद्याने परितो राजमन्दिरम् ॥37॥

नानापुष्पफलैर्युक्तो क्रीडावापीविराजिते ।
विचित्ररत्ननिर्माणनानाहर्म्यमनोहरे ॥38॥

स्वमंत्रिमित्रसामन्तपुत्राद्यैः क्रीडनं कुरू ।
स्वेच्छया परमानन्दात् स्वगात्रे यत्नपूर्वकम् ॥39॥

इत्याकर्ण्य कुमारोऽपि वसुदेवो गुणोज्वलः।
स्वीचकार नृपप्रोक्तं कः सुधीर्न गुरोर्वशः[2]॥40॥

1.आतापेन इति ब प्रतौ
2.गुरोवशःइति ब प्रतौ, गुरौर्वशः इति स प्रतौ

ततः सोऽपि गृहोद्याने नानाशोभाशताञ्चित्ते।
सारवस्तुसमाकीर्णे क्रीड़ाञ्चक्रे[1] निजैः सह ॥41॥

कैश्चिद्दिनैस्ततस्तस्य चेटको लंपटः कुधीः।
निपुणादिमतिर्नाम्ना स्वेच्छाचारी जगाद् तम् ॥42॥

अहो!कुमार! जानासि सोपायं त्वं महीभुजा।
शुद्धे कारागृहे[2] क्षिप्तो बहिर्याने निवारितः॥43॥

दुर्जनानां स्वभावोऽयं यः परानपि सज्जनान् ।
निजेन सदृशान् पापी वदत्येव परोक्षतः॥44॥

कुमारः प्राह रे कस्मादित्थं मे भूभुजा कृतम्।
तेनोक्तं देव! ते रूपं सर्वलोचनसम्मतम् ॥45॥

दृष्ट्वा पुरस्त्रियः सर्वाः विह्वलांस्त्वां[3] निरीक्षितुम् ।
मुक्त्वा गृहोचितं कर्मसञ्जातास्ताः निरंकुशाः॥46॥

ततो महाजनैः सर्वैरुक्तं सर्वं महीपते ।
तस्मात् त्वं तेन भूभर्त्रा बहिर्याने निराकृतः॥47॥

श्रुत्वेति चेटकेनोक्तं कुमारस्तत्परीक्षितुम्।
राजगेहाद् विनिर्गच्छन्[4] प्रतिहारेण वारितः ॥48॥

देवराज्ञा निषिद्धोऽसि बहिर्निर्गमने ध्रुवम्।
अतस्त्वया न गन्तव्यं तन्निशम्य स खेदवान् ॥49॥

समुद्रविजयादीनामनुक्त्वा मानवान् द्रुतम्।
राजमन्दिरतो रात्रौ शनैर्निर्गत्य साहसात् ॥50॥

त्यकत्वा शौर्यपुरं रम्यं न केनापि सुलक्षितः।
गत्वा श्मशानकं घोरं राक्षसाद्यैः समाश्रितम् ॥51॥

1.क्रीडाचक्र इति ब प्रतौ

2. कारीगृहें इति अ प्रतौ

3. विकलास्त्वां इति स प्रतौ.

4. विनिर्गछन् इति ब-स-द प्रतीषु

शूलारोपितचौरौघं श्रृंगालस्वनभीषणम्।
अनेकमृतकोपेतं धूलीदुर्द्धमंदुःसहम् ॥52॥

तत्रैकं मृतकं वीक्ष्य प्रज्वलद्वह्निमध्यगम्।
त्यक्त्वा तस्योपरिस्फारं[1] स्वकीयाभरणोत्करम् ॥53॥

अपकीर्तिभयादत्र क्षिप्त्वात्मानं प्रवेगतः।
वसुदेवो दिवं प्राप्तो लिखित्वेति च पत्रकम् ॥54॥

अश्वकण्ठे निबद्ध्यश्रु मुक्त्वा तत्रैव तं हयम्।
अग्निं प्रदक्षिणीकृत्य स्वयं क्वापि गतो द्रुतम् ॥55॥

ततः सूर्योदये राजमन्दिरे सुन्दराकृतिम्।
अनिरीक्ष्य कुमारं तं प्रतीहारो जगौ नृपम्[2] ॥56॥

अहो देव! कुमारोघ! रात्रौ निर्गत्य मन्दिरात्।
नैव जाने गतः क्वापि कृत्वा वा दृष्टिबन्धनम् ॥57॥

तन्निशम्य सः भूपोऽपि कम्पमानः स्वमानसे।
प्रेषयामास वेगेन किंकरान् दिक्षु सर्वतः ॥58॥

तैर्भटैर्नगरे बाह्ये नद्यादौ च वने घने।
तं पश्यद्भिस्ततो घोरे श्मशाने भूरिभीतिदे[3]॥59॥

दग्धं साभरणं तत्र शवमेकं विलोक्य च।
भ्राम्यतं तं हयं वीक्ष्य तत्कण्ठे लेखपत्रकम्[4] ॥60॥

तदादाय समागत्य सर्वं प्रोक्त्वा महीपतेः।
पत्रं समर्पितं तत्र वाचितं केनचित् क्षितौ[5] ॥61॥

---

1. परिस्फीतं इति स प्रतौ
2. कुमारं तं प्रतीहारौ जगौ नृपं इति अ प्रतौ अनुपलब्धा
3. भूतीदे इति अ प्रतौ
4. लेषपत्रकम् इति ब प्रतौ
5. चेति भूतले इति स प्रतौ

चिरं नन्दतु[1] भूपालश्चिरं नन्दतु सा प्रजा।
नन्दिता शिवदेवी च परिवारेण मण्डिता ।।62।।

वसुदेवो गतो घोरं विप्रियो यममन्दिरम्।
इत्याकर्ण्य तदा सर्वे समुद्रविजयादयः।।63।।

गत्वा पितृवनं शीघ्रं सशोकदुःखदायकम्।
सभूषणं समालोक्य भस्मीभूतं तथा शवम् ।।64।।

हाहाकारं विधायोच्चैश्चक्रुस्ते शोकमुत्कटम्।
हा कुमारकृतं कर्म किं त्वया सर्वदुःखदम् ।।65।।

त्वया विना गतोऽस्माकं समुत्साहः सुदूरतः।
यथा पयोधराभावे प्रजानां याति ध्रुवम् ।।66।।

शिवादेवी तथा गाढ़ं शोकं चक्रे स्वमानसे ।
त्वां विना देवर ख्यक्तं का शोभा मन्दिरे मम ।।67।।[2]

यथा चन्द्रं विना रात्रौ नैव शोभा नभांगणे ।
नेत्रं विना मुखाब्जे वा विना पद्मैः सरोवरे ।।68।।

इति शोकाकुलाः सर्वे चक्रुस्ते रोदनन्तराम् ।
तदा नैमित्तिकः कोऽपि ज्ञानवान् प्राह तान् प्रति ।।69।।

भो स्वामिनः! वृथा शोकं मा कुरुध्वं सुदुःखदम् ।
नीत्वा वर्षशतं सोऽपि कुमारः पुण्यवान् भृशम् ।।70।।

महालाभैर्महाभूत्या परमानन्ददायकः।
वसुदेवः समागत्य शर्मसारं करिष्यति ।।71।।

इत्यादिकं समाकर्ण्य नैमित्तिकवचो हितम् ।
प्रापुस्ते परमानन्दं सुखीन[3] शुभोक्तिभिः।।72।।

1.नंदंतु इति ब प्रतौ
2. श्लोकसंख्यायां त्रुटिः इति ब प्रतौ
3. सुषी इति अ प्रतौ

सन्तप्तायस पिंडो वा शीततोयेन संश्रितः।
तस्य वाक्यामृतैः सर्वे शीतीभूताः सुखं स्थिताः॥73॥[1]

तदा सम्प्रेषयामास तं गवेषयितुं भटान्।
प्रभुः सर्वत्र संस्नेहात् स्वयं च सुखतः[2] स्थितः॥74॥

इतः स्वलीलया सोऽपि कुमारः पुण्यसंबलः।
संस्मरन् श्रीजिनं चित्ते निधानमिव शर्मदम् ॥75॥

विजयाख्यपुरोद्यानं सम्प्राप्तो विहरन् मुदा।
तत्राशोकतरोर्मूले सुस्थितः प्रोल्लसद्युतिः॥76॥

तत्पुण्येन तरुच्छायां निश्चलां वासुभक्तितः।
प्राघूर्णकक्रियां कर्त्तुं स्थितां वीक्ष्य वनाधिपः॥77॥

स गत्वात् पुराधीशं स प्रणम्य जगाद च।
स्वामिन् सत्यमभूद्वाक्यं नैमित्तिकसमीरितम् ॥78॥

यस्यागमनमात्रेण शुष्कवृक्षावली प्रभो!।
नानापुष्पफलैर्युक्ताः संजाताः सद्वधूर्यथा ॥79॥

आयातः पुण्यपुञ्जो वा नरकोटिशिरोमणिः।
आकृष्टस्तव पुण्येन स सुधीर्गुणमण्डितः॥80॥

तदाकर्ण्य प्रभुस्तत्र समागत्य विभूतिभिः।
साक्षात्कामं तमालोक्य पुरं नीत्वा प्रमोदतः॥81॥

श्यामलाख्यां सुतां तस्मै विवाहविधिना ददौ।
महोत्सवशतैश्चापि किं न स्यात् पुण्यशालिनाम् ॥82॥

तया सार्द्धं सुखं तत्र वसुदेवप्रसन्नधीः।
भुञ्जन् भोगान् मनोऽभीष्टान् कुर्वन् भक्तिं जिनेशिनाम् ॥83॥

1.स प्रतौ अनुपलब्धः
2.सुषतः इति अ प्रतौ

संस्थाय[1] वासरैः कैश्चित् प्रमोदभरनिर्भरः।
तस्मादपि विनिर्गत्य देवदारुवनं गतः॥84॥

तद्वनं वीक्षितं तेन वसुदेवेन धीमता।
नानापुष्पफलाकीर्णं स्वच्छतोया शतैर्युतम् ॥85॥

भूदेव्या वा जिनेन्द्राणां भक्तिभारेण निर्मितम्।
तद्व्याजेन कृतानन्दमर्घोद्धरणमुत्तमम् ॥86॥

तत्र पद्मसरः पूर्णं मृष्टतोयेन निर्मलम्।
विस्तीर्णं वीक्षितं चापि मुनीनामिव मानसम् ॥87॥

महासरोवरे तस्मिन् गजेन्द्रः रुद्रघोषणः।
निजपादप्रहारेण मर्दितोऽवनिमण्डलः[2] ॥88॥

सुण्डादण्डजलेनोच्चैः संसिक्ता शेषतद्वनः।
नीलवर्णो महानादनिर्जितोरुघनाघनः॥89॥

कर्णतालानिलेनोच्चैश्चालिताखिलपादपः।
दीर्घदन्तमहाघातस्ताडितोरूशिलातलः॥90॥

दृष्टस्तेन समागच्छ भणितश्च महागजः।
सोऽपि सन्मुखमागच्छन् कोपारुणितलोचनः॥91॥

सुभद्रातनयेनोच्चैरावर्त्तननिवर्त्तनैः।
प्रवेशनैश्च पादेषु ताडनैरुपलादिभिः॥92॥

प्रतारणैः खरार्वाक्यैराह्वानन् पुरःसरम्।
दंताद्यारोहणैश्चापि लीलया पुण्यपाकतः॥93॥

तदा स निर्जितः शीघ्रं महानपि मदोद्धतः।
यथा कामो जिनेन्द्रेण मथिताशेषभूतलः॥94॥

1.सस्थित्वा इति ब प्रतौ
2.नमिता इति स प्रतौ

तस्मिन्नीलगजे सुस्थः[1] कुमारः शोभितस्तराम्।
यथा नीलगिरौ तुंगे सुस्थितः श्रीदिवाकरः॥95॥

तदा करीन्द्रकुम्भाग्रे सुस्थितं वीक्ष्य तं खगः।
समुद्धृत्य ततो नीत्वा विजयार्द्धगिरिं द्रुतम्॥96॥

तत्र किंनरगीताख्ये पुरे सत्सम्पदाभरे।
सुधीरशनिवेगाख्यो विद्याधरनरेश्वरः॥97॥

तं प्रणम्य स च प्राह सेवको भो महीपते।
अरण्यकुञ्जरोऽनेन निर्जितो निजलीलया॥98॥

तवादेशो नरः सोऽयं समायातो गुणान्वितः।
सर्वलक्षणसम्पूर्णः पूर्वपुण्यविराजितः॥99॥

तन्निशम्य प्रभुः सोऽपि वसुदेवविलोकनात्।
सन्तुष्टो मानसे गाढं निधाने वा गृहागते॥100।

पुत्रीं शाल्मलिदत्ताख्यां महोत्सवशतैरपि।
जातां पवनवेगायां ददौ तस्मै सम्पदाम्॥101॥

तत्र भुक्त्वा तया सार्द्धं सुखं पञ्चेन्द्रियोचितम्।
तस्मान्निर्गन्तुं कामं तं कामदेवगुणोज्ज्वलम्॥102॥

कन्यामातुलपुत्रस्तु स्वनाम्नांगारवेगकः।
तदा सुप्तं समालोक्य कोपेन कलिताशयः॥103॥

वसुदेवं समुद्धृत्य सन्निर्गच्छन्नभस्तले।
ज्ञात्वा शाल्मलिदत्ता सा प्रज्वलत्खड्गराजिता॥104॥

लग्ना तत्पृष्ठतः शीघ्रं तर्जयन्ती च तं खगम्।
तदा सोऽपि खगो भीत्वा तं मुक्त्वा वेगतो गतः॥105॥

1.संस्थः इति स प्रतौ

तदासौ वसुदेवोपि पर्णलघ्वाख्यविद्यया।
चंपापुरी सरोमध्ये पतितो भार्यया सुखम् ।।106।।

तत्र द्वीपे स्थितो पृच्छत्तत्तटे वर्त्तिनो जनात्।
द्वीपादस्माद्विनिर्गन्तुं कः पंथाः का पुरीत्यहो ।।107।।

इति श्रुत्वा हसित्वा ते तं जगुर्भद्र किं पुनः।
आकाशात् पतितो येन मार्गं त्वं पृच्छसि ध्रुवम्।।108।।

श्रीवासुपूज्यतीर्थेश: जन्मना या पवित्रता।
चम्पापुरी जगत्सिद्धा किं न वेत्सि महामते ।।109।।

सत्यमुक्तं भवद्भिर्भो! पतितोऽहं नभस्तलात्।
तेनोक्तं समाकर्ण्य दर्शयन्ति स्म वर्त्म तत्।।110।।

ततस्तस्माद्विनिर्गत्य सोऽपि चम्पापुरीं शुभम्।
सम्प्रविष्टस्तदा तत्र चारुदत्तवणिक्पतेः ।।111।।

पुत्रीगन्धर्वदत्ताख्या वीणावादनं कोविदा।
रूपसौभाग्यसंपन्ना विद्याहंकारसंयुता।।112।।

वीणावादेन यो मां वैजयिष्यति महीतले।
स मे भर्त्तान्यथा नेति साभिप्रायेण सा स्थिता[1] ।।113।।

तत्र भुक्त्वा तया सार्द्धं सुखं पञ्चेन्द्रियोचितम्।
तस्मान्निर्गन्तुं कामं तं कामदेवगुणोज्ज्वलम्।।102।।

तत्र कन्यार्थमागत्य तदुपाध्यायसिन्निधौ।
अभ्यासं कुर्वन्तो वीक्ष्य वीणावादिन शिक्षकान्।।115।

तदा निगूढवृत्तोऽसौ कुमारःप्राह तान् प्रति।
मयापि क्रियतेऽभ्यासः समादायेति वल्लकीम्।।116।।

---

1. संस्थिता इति स प्रतौ

धूर्त्तत्वेनाच्छिनत्पूर्वं[1] तन्त्रीं तुम्बीफलं तथा।
तत्कर्म ते समालोक्य हसित्वा चेति सञ्जगुः॥117॥

कलाज्ञोऽयं समायातः सत्यं कन्यावरोऽप्ययम्।
भविष्यति सुधीरस्मान् वीणावादे जयिष्यति॥118॥

पठत्येवं स्थिते तत्र कुमारे गुरूसंन्निधौः ।
तदा गन्धर्वदत्तायाः स्वयंवरविधौ मुदा॥119॥

भूखेचरनराणां च कुमाराः प्राप्तयौवनाः।
कन्यार्थं ते समायाताः मह्यमाशा गरीयसी॥120॥

सा स्वयंवरशालायां कन्यागन्धर्वदत्तिका।
वीणावादेन तान् सर्वान् जयति स्म निराकुला॥121॥

वसुदेवोऽपि सर्वासु कलासु कुशलो महान्।
स्वोपाध्यायं तदा पृच्छय कन्याभ्यर्णसमागतः॥122॥

तं समालोक्य सा कन्या सन्तुष्टा मानसेतराम्।
कृतपुण्ये समायाते कस्य प्रीतिर्न जायते॥123॥

निर्दोषा दीयते वीणा तां जगौ स विचक्षणः।
तेपि तिस्र: चतस्त्रोपि वीणां कन्याश्रितां ददुः॥124॥

तस्मै सोऽप्याह संवीक्ष्य तासु दोषाननेकशः।
आसां तन्त्रीषु लोमांशा शल्यं तुम्बीफलेषु च॥125॥

आशादण्डेषु पाषाणखण्डं चापि प्रर्वतते।
इत्यादिकं समाकर्ण्य साश्चर्यं कन्यकाऽवदत्॥126॥

निर्दोषा कीदृशी वीणा भवेत्ते चित्तहारिणी।
ब्रूहि भो! सर्ववस्तूनां परीक्षाकुशलोत्तम् ॥127॥

1.धूर्त्तेनाछिनत् इति ब प्रतौ

वसुदेवस्तदा प्राह श्रृणु त्वं! कन्यके शुभे!।
वक्ष्ये ममेष्टवीणायाः समागमकथानकम्॥128॥

हस्तिनागपुरे राजा नाम्ना मेघरथो महान्।
पद्मावती प्रिया जाता तयो पुत्रौ बभूवतुः॥129॥

विष्णुपद्मरथौ रम्यं कदाचित् स महीपतिः ।
सार्द्धं विष्णुकुमारेण मुनिर्मेघरथोऽभवत्॥130॥

तदा पद्मरथ: राजा राज्यं कुर्वन्नपि स्थितः।
प्रत्यन्तवासिभिस्तीव्रं पीडितः शत्रुभूमिपै: ॥131।

बली नाम तदा मन्त्री सामभेदादिभिर्द्रुतम्।
शत्रूंस्तान् वारयामास स्वबुद्धिकुशलो महान्॥132॥

तदा पद्मरथेनोक्तं सन्तुष्टेन महीभुजा।
वाञ्छितं याच्यतां मन्त्रिन् मया तुभ्यं प्रदीयते॥133॥

विप्रो मंत्री नृपं प्राह यदा कार्यं भविष्यति।
तदाऽस्मभ्यं प्रदातव्यं वाञ्छितं भो नरेश्वर!॥134॥

एवमस्त्विति तेनोक्तं भू: भुजाभद्रचेतसा।
सन्तोन विस्मरन्त्येव परोपकृतिमंजसा॥135॥

ततस्तत्पुरसानिध्ये शुभे सौम्यशिलोच्चये।
एकदाकम्पनाचार्यो मुनिसंघसमन्वितः॥136॥

श्रीमज्जिनेन्द्रसद्धर्मोपदेशामृतवर्षणैः।
तर्पयन् भव्यसस्योपधान् समागत्य स्वलीलया ॥137॥

योगमातापनं धृत्वा संस्थितो मेरु: निश्चलः।
पूजाद्रव्यादिभिर्भव्याः कुर्वन्ति स्म प्रभावनाम्॥138॥

स बली निर्जतो मंत्री पुरा तेन मुनीशिना।
सारस्याद्वादवादेन विद्वज्जनसभान्तरे॥139॥

लज्जितो मानभंगेन तदा ज्ञात्वा च तं मुनिम्।
हन्तु कामो दुराचारी प्राह पद्मरथं नृपम्॥140॥

स्मृत्वा वर प्रभो! देहि राज्यं सप्तदिनानि मे।
दत्तं तेन तृणं मृत्वा राज्ञा सप्तदिनानि तत्॥141॥

तस्मै सोऽपि समादाय मन्त्री दुष्टाशयस्तदा।
गिरिं समं ततः पापी यागं प्रारब्धवान् भ्रशम्॥142॥

तदा देशात्तदा विप्रैर्वेदपाठैर्निरन्तरम्।
हत्वा पशून् पुनर्हुत्वा वह्नौतच्छेषकं तथा॥143॥

भुक्तोच्छिष्टसरावाद्यैस्ताडितास्ते मुनीश्वराः।
तथा दुर्गन्धधूमाद्यैरुपसर्गं सुदारणम्॥144॥

मुनयः सहमानास्ते जैनतत्त्वविदां वराः।
तिष्ठन्ति स्म यदा तापयोगे निश्चलमानसा॥145॥

तदा मेघरथो नाम साधुस्त्रिज्ञानलोचनः।
मुनिर्विष्णुकुमारश्च सुस्थितो गिरिकन्दरे॥146॥

रात्रौ श्रवणनक्षत्रं कम्पमानं विलोक्य च ।
विष्णुर्मुनिर्जगादोच्चैर्ज्ञानिनं जनकं मुनिम्॥147॥

स्वामिन् श्रवणनक्षत्रं कम्पते केन हेतुना।
वायुना स्वच्छपत्रं वा तन्निशम्य पितामुनिः॥148॥

स च प्राह तदा ज्ञानी श्रृणु त्वं भो! मुने वचः।
हस्तिनाख्यपुरे पापी बली मन्त्री करोत्यलम्॥149॥

पीडामकम्पनाचार्यप्रमुखानां मुनीशिनाम्।
साधुपीडात्र सर्वेषां भवेत् सन्तापकारिणी॥150॥

तस्मादिदं च नक्षत्रं कम्पते व्योम्नि निश्चयात्।
इत्याकर्ण्य पुनर्विष्णुकुमारो मुनिरब्रवीत्॥151॥

अहो स्वामिन्! कथं तेषामुपसर्गः प्रशम्यति।
गुरुर्मेघरथोऽवादीत्संज्ञानत्रयमण्डितः।।152।।

तवास्ति विक्रियर्द्धिश्च तया शीघ्रं स यास्यति।
अंधकार च यो याति भास्करस्योदये यथा।।153।।

ततो विष्णुमुनिः सोऽपि साधूनां वत्सलो[1] महान्।
प्राप्तः पद्मरथस्याशु: समीपं भक्तितस्तदा।।154।।

तं प्रणम्य नृप प्राह किं कार्यं भो महामुनेः!।
येन श्रीमद्भिरागत्य सेवकोऽहं पवित्रितः।।155।।

ततो मुनिर्जगावित्थं कस्मात्ते मन्त्रिणः खराः[2]।
मुनीनां क्रियते कष्टं तत्त्वया वार्यते स च।।156।।

तदाकर्ण्य नृपेणोक्तं भो मुने! वचनं छलात्।
वञ्चिते न मया तेन पापिना दुष्टचेतसाम्।।157।।

दत्तं सप्तदिनान्यस्मै राज्यं सर्वन्तु निश्चयात्।
तस्माद्वारयितुं नैवं शक्यतेऽयं मया मुनेः।।158।।

ततः स्वामिन्! भवन्तो हि समर्थाः कार्यसिद्धये।
अन्धकारविनाशार्थं समर्थो भानुमान् यथा।।159।।

इत्याकर्ण्य मुनिः शीघ्रं समुत्थाय ततो महान्।
सुधीर्वामनविप्रस्य रूपमादाय लीलया।।160।।

कुर्वन् वेदध्ध्वनिं दिव्यं रञ्जयन् विदुषां मनः।
समीपं बलिनो गत्वा स्वस्तिवादेन तं जगौ।।161।।

त्वं दातृणां महादाता भो नरेन्द्र! प्रवर्तसे।
त्वामुद्दिश्य समायातो देहि मे याचितं विभो।।162।।

---

1. वत्सलोद्यतः इति ब प्रतौ
2. मंत्रीणा खरम् इति ब प्रतौ

तस्य दिव्यध्वनिं श्रुत्वा सन्तुष्टो मानसेतराम्।
मन्त्री प्राह मया दत्तं यत्तुभ्यं रोचते वद॥163॥

स द्विजः सञ्जगादोच्चैर्भूमेः पादत्रयं प्रभो!।
मह्यं देहीति तच्छ्रुत्वा बली किं याचितं त्वया॥164॥

तथापि यत्तवाभीष्टं महीपादत्रयं शुभम्।
स्वेच्छया त्वं ग्रहाणेति तत्करे सजलं ददौ॥165॥

तदा विष्णुमुनिः सोऽपि विक्रियर्द्धिप्रभावतः।
भूत्वा महान् क्षणार्द्धेन मानुषोत्तरपर्वते॥166॥

पादमेकं द्वितीयं च ददौ मेरुमहीधरे।
उक्षिप्तश्च तृतीयोऽपि पादस्तेनैव विष्णुना॥167॥

क्षेत्राभावे[1] प्रकोपेण चालितश्च नभांगणे।
तदासुरनरेन्द्राणां संक्षोभश्च महानभूत्॥168॥

देवविद्याधराधीशैर्भूचराद्यैः समन्वितैः।
समागत्य तदा सर्वैर्भो गुणे! करूणार्णवः॥169॥

त्यक्तकोपं वराकाणामस्माकमुपरि ध्रुवम्।
विधाय करुणां स्वामिन् स्वपादौ संहर द्रुतम्॥170॥

गीतसंगीतसंस्तोत्रैः वीणानादादिभिस्तराम्।
संस्तुतः स मुनिः पादौ विष्णुनामा समाहरत्॥171॥

तदा सुधाशिनो भक्त्या मुनेः पादाम्बुजार्चने।
वीणां घोषां सुघोषाख्यां महाघोषां[2] वसुन्धराम्॥172॥

तथाघोषवतीं वीणां ददति स्म प्रमोदतः।
द्वे द्वे विद्याधरेभ्यश्च भूचरेभ्यो यथाक्रमम्[3] ॥173।

1.क्षेत्रे भावे इति ब-स प्रतयोः
2.महोघोषां इति ब प्रतौ
3.भूचरेभ्यतथातिमाम् इति स प्रतौ

ततो विष्णुमुनिश्चापि पापिनो बालिनः[1] प्रति।
रे रे दुष्टदुराचारिन्! वृथा त्वं प्रार्थितो मया।।174।।

स्थानं तृतीयपादस्य विद्यते नैव मे ध्रुवम्।
इत्युक्त्या वचनैर्हत्वा कृत्वा तन्निग्रहं पुनः।।175।।

मुनीनामुपसर्गं तं निराकृत्य सुभक्तितः।
वात्सल्यं स सुधीश्चक्रे परमानन्ददायकः।।176।।

तथा पद्मरथ: राजा महाकोपेन पापिनाम्।
मन्त्रिणं बलिनं हन्तुं कष्टतः स समुद्यतः।।177।।

सुधीर्विष्णुमुनिस्तत्र त्वं निवार्य नृपं द्रुतम्।
स्वपादपद्मयोर्लग्नं मन्त्रिणं भक्तितस्तदा।।178।।[2]

श्रीमज्जिनेन्द्रसद्धर्मे नीत्वा तं बलिनं मुदा।
कृत्वा प्रभावनां चेति स्वामी स्वस्थानकं ययौ[3]।।179।।

ता सुघोषवती वीणा भवद्वंशे समागता।
सा समानीय देया जगच्चित्तानुरञ्जिनी।।180।।

इत्यादिकं समाकर्ण्य वसुदेवोदितं वचः।
सन्तुष्टा मानसे गाढं कन्याद्यास्ते विचक्षणाः ।।181।।

तस्मै समर्पयामासुः वीणां घोषवतीं शुभाम्।
कुमारस्तां समादाय कार्यसिद्धिविधायिनीम् ।।182।।

स तया गीतनादाद्यैः सतां चेतोनुरञ्जनम्।
कृत्वा संदर्शयामास स्वविद्यां चातुरीं शुभाम्।।183।।

तदा गन्धर्वदत्तापि मत्वा तं सद्गुणाकरम्।
कण्ठे तस्याशु सन्तुष्टां रत्नमालां चकार सा।।184।।

---

1. पापिनं बलिनं इति ब प्रतौ

2.पद्मयोर्भक्त्या मंत्रिणं पतितं तदा इति स प्रतौ

3. यजौ इति ब प्रतौ

सत्यं पुण्यवतां पुंसां सर्वत्र सुखसम्पदाः ।
यशःकीर्त्तिर्जयो विद्या भवन्ति गुणशालिनाम्॥185॥

चारुदत्तस्तदा[1] श्रेष्ठी सन्तुष्टस्तु महोत्सवैः ।
कन्यागन्धर्वदत्तां तां वसुदेवाय सन्ददौ॥186॥

तत्र स्थित्वा दिनैः कैश्चित्तया सार्द्धं सुखं पुनः[2]।
वसुदेवकुमारोऽसौ विजयार्द्धगिरिं गतः॥187॥

तत्र विद्याधरश्रेण्यां प्रोल्लसत् सारसम्पदि ।
कन्याः सप्तशतान्युच्चैर्विद्याधरसमुद्भवाः॥188॥

महोत्सवशतैश्चापि परिणीय गुणोज्ज्वलाः।
समागत्य महीभागं नाम्नारिष्टपुरे तथा॥189॥

हिरण्यवर्मणो राज्ञः पद्मावत्यां समुद्भवा।
रूपसौभाग्यसंयुक्ता रोहिणी नाम कन्यका॥190॥

तस्याः स्वयंवरायोच्चैः कुमारान् मिलितान् बहून्।
तत्र तान् पाठयन्नुच्चैर्भूत्वोपाध्यायकः स्थितः॥191॥

ततः स्वयंवरारम्भे जरासन्धादिभूमिपाः।
समायाताः प्रतापेन भास्कराः वा महीतले॥192॥

तदा सा रोहिणी कन्या सर्वाभरणभूषिता।
त्यक्त्वा सर्वान् महीपालान् जरासन्धादिकान् परान्॥193॥

सर्वलक्षणसम्पूर्णसर्वविद्यागुणास्पदम्।
वसुदेवं समालोक्य सन्तुष्टा मानसेतराम्॥194॥

सती सम्भावयामास रत्नानां मालया श्रुतम्।
तद्विलोक्य तदा राज्ञां संक्षोभो मानसेऽभवत्॥195॥

1.चारुदत्तादयश्चित्ते इति स प्रतौ

2. सार्द्धं स्वलीलया इति स प्रतौ

तदा सहनशीलेन जरासन्धेन भूभुजा।
तामाहर्तुं समादिष्टाः समुद्रविजयादयः।।196।।

तैः सन्द्धैस्तदापूर्वं भाषितः स महीपतिः।
हिरण्यवर्मा भो! राजन्न !योग्यं त्वया किं[1] कृतम्।।197।।

यत् त्रिखण्डेश्वरादीश्च परित्यज्य स्वगर्वतः।
वैदेशिकोऽर्चितो रत्नमालया निजलीलया।।198।।

मालतीपुष्पसन्माला गन्धाकृष्टमधुव्रता।
क्षिप्यते मर्कटस्योच्चैर्गले किं रे जडाग्रणिन्।।199।।

यावद्राजा जरासन्धो न विरूद्धस्तवोपरि।
तावत् त्वं देहि तां कन्यां वृथा किं म्रियसे त्वकम्।।200।।

श्रुत्वा हिरण्यवर्मापि तेषां वाक्यं सुदुत्सहम्[2] ।
सुधीः प्राह वचो यूयं भो! श्रुण्वन्तु महीभुजः!।।201।

सर्वदेवेन्द्रचन्द्रार्कैः समर्चितपदद्वयः।
आदिदेवो जगादोच्चैमार्गमेतं जगद्धितम्।।202।।

स्वयंवरे निजेच्छातो मालयालंकृतो हि यः।
कन्याया स वरो लोके चर्चितस्तद्वचो मया।।203।

यूयं सर्वेऽपि पश्यंतो पश्यतः प्रेरितास्तकैः।
युष्माकं तु भटालापैर्न बिभेमि कदाचन।।204।

किं खद्योतभयेनोच्चैर्भीतो नोदयते रविः।
न दीयते मया कन्या परस्मै तं विना ध्रुवम्।।205।।

इत्यादिकं समाकर्ण्य ते सर्वे प्रेरितास्तदा।
जरांसधाज्ञया चक्रुर्महायुद्धं सुदुःसहम्।।206।।

---

1. त्वय का इति ब प्रतौ
2.सदुःसहं इति स-द प्रतयोः

हिरण्यवर्मणः पक्षे तदा भटशिरोमणिः ।
सुवर्णरथमारूढो वसुदेवः स्वबान्धवैः॥207॥

कुर्वन् युद्धमजानन् सन् मुञ्चन् बाणं सुदारुणम्।
तदा पुण्योदयेनाशु ज्ञात्वा ज्येष्ठं स्वबान्धवम्॥208॥

ततः स्वबाणविद्यायाश्चातुर्या चतुरोत्तमः।
समुद्रविजयेनोच्चैर्मुक्तान् बाणान् स्वबाणकैः॥209॥

छिन्दन् बाणान् शनैर्मुञ्चन् संस्मरन् बन्धुतां हृदि।
कृत्वा युद्धं कियत्कालं विनोदने प्रसन्नधीः॥210॥

स्वनामालंकृतं बाणं मित्रं वा शर्मकारकम्।
समुद्रविजयाधीशः पादपद्माग्रतोऽक्षिपत्॥211॥

तं विलोक्य समादाय तदा शौर्यपुराधिपः।
वाचयामास तत्पत्रं यस्त्वया जनजल्पनैः॥212॥

धृतो ग्रहेऽपि निर्गत्य रात्रावुत्थाय वेगतः ।
कोपेन गतवान् क्वापि कुमारःश्रीमतां प्रियः॥213॥

संवत्सरशतं नीत्वा भवत्पुण्यप्रसादतः।
आयातो वसुदेवोऽहं त्वं देह्यालिंगनं प्रभो!॥214॥

इत्यालोक्याक्षराण्याशु समुद्रविजयप्रभुः।
अष्टभिर्बान्धवैर्युक्तः परमानन्दनिर्भरः॥215॥

सत्यं समागतोऽप्यत्र वसुदेवो गुणोज्वलः।
प्रीत्या सन्मानितो रत्नमालया कन्यया तया॥216॥

संविचार्येति वेगेन दुष्टान् सर्वान् निवार्य[1] च।
संग्रामं तं निषिध्योच्चैरवतीर्य रथादपि ॥217॥

1.विचार्य इति अ प्रतौ, निवार्य्य इति द प्रतौ

आगत्य सन्मुखं शीघ्रं तं पतन्तं स्वपादयोः।
वसुदेवं समालिंग्य कनिष्ठं निजबान्धवम्॥218॥

सञ्जगादेति भो वत्स! संपूर्णा मे मनोरथाः।
त्वद्दर्शनात्तथा चाद्यफलितः पुण्यपादपः॥219॥

सर्वो यादववंशश्च सद्ध्वजेनैव शोभितः।
त्वयैकेन यथाकाशं चन्द्रणैकेन शोभते॥220॥

बलवानहमेकोऽत्र सञ्जातोऽस्मि त्वयाधुना।
सत्यं शौर्यपुरं जातं त्वया शूरेण मण्डितम्॥221॥

इत्यादिमधुरालापैर्जगच्चेतोनुरञ्जनैः।
सानन्दोऽभूत्कुमारो वा रवेः पद्माकरकरैः॥222॥

वसुदेवोऽपि सन्तुष्ट सम्प्रणम्य परानपि।
बान्धवान् भक्तिभारेण चकार विनयं शुभम्॥223॥

ततः श्रीवसुदेवस्य रोहिण्या सह शर्मदः।
महाविभूतिभिर्जातो विवाहविधिरुत्तमः॥224॥[1]

तथा भूखेचराः[2] सर्वे स्वकीयाः कन्यकाः शुभाः।
परिणीताः कुमारेण याः पुरा परमादरात्॥225॥

तास्ताः सर्वाः समानीय सारसंपद्विराजिताः।
अर्पयामासुरुच्चैस्ते कुमारस्य गुणोज्ज्वलाः॥226॥

ततो महोत्सवैः सर्वे समुद्रविजयादयः।
वसुदेवादिभिर्युक्ताः प्रापुः शौर्यपुरं शुभम्॥227॥

तत्र तेषां दशार्हाणां पूर्वपुण्यप्रसादतः।
महोत्सवशतेनोच्चैः काले गच्छति धीमताम्॥228॥

---

1. स प्रतौ अनुपलब्धः
2. भूषेचरा इति अ प्रतौ

एकदा वसुदेवस्य रोहिण्यां प्रिययोषिति।
महाशुक्रात् समागत्य शंखाख्यो यः परामुनिः।।229।।

सुमुहूर्ते शुभे लग्ने पद्मनामा सुतोऽभवत्।
नवमो बलदेवोऽसौ पुण्यपुंजो यथोज्जवलः ।।230।।

सर्वलक्षणसंपूर्णः कलागुणसमन्वितः।
सज्जनानां समाह्लादी शोभते स्म स चंद्रवत्।।231।।

एवं ते पुत्रपौत्राद्यैर्मण्डिताः पूर्वपुण्यतः।
तिष्ठंति स्म यथा सौख्यं समुद्रविजयादयः।।232।।

पुण्यं श्रीमज्जिनेन्द्राणां पादपद्मद्वयार्चनम्।
पुण्यं सुपात्रदानं च पुण्यं शीलोपवासकम्।।233।।

(मालिनी)

सकलगुणसमुद्रः सर्वदेवेन्द्रवंद्यस्त्रिभुवनसुखकर्ता पापतापैकहर्त्ता।।
सकलविमलबोधो ध्वस्तमोहांधकारो, रविरिव वचनौघैर्नेमिनाथोवताद्वः।।।234।।।

इति त्रिभुवनैकचूडामणिश्रीनेमिजिनपुराणे भट्टारकश्रीमल्लिभूषणशिष्याचार्यश्रीसिंहनामांकिते ब्रह्मनेमिदत्तविरचिते वसुदेवकुमारमहाकन्यालाभपूर्वकसमागमनपद्मनाम नवमबलदेवोत्पत्तिव्यावर्णनो नाम चतुर्थोऽधिकारः ।।4।।

पञ्चमोऽधिकारः

अथ प्रणम्य तीर्थेशं नेमिनाथं जगद्धितम् ।
कंसस्य वृत्तकं वक्ष्ये यथागमानुरूपितम्[1] ॥1॥

नानापुष्पफलाकीर्णे नानावृक्षशतान्विते[2] ।
गंगागन्धवतीनद्योः संगमे सुविराजिते॥2॥

तापसानां महापल्ल्यां बसिष्ठो नाम तापसः।
सर्वेषां नायकस्तेषां पञ्चाग्नितपसि स्थितः॥3॥

तत्र श्रीगुणभद्राख्यवीरभद्रौ महामुनी।
चारणौ द्वौ समायातौ तं दृष्टा प्राहतुर्वचः॥4॥

इदं तपो महाकष्टमज्ञानिजननिर्मितम्।
तन्निशम्य महाकोपात् स तयोरग्रतः स्थितः॥5॥

उक्तवानहमज्ञानी कथं भो! ब्रूत साम्प्रतम्।
ततो ज्येष्ठमुनिः स्वामी गुणभद्रो जगाद तम्॥6॥

पश्य भो! प्रस्फुरद्वह्निज्वालायां ते पतंगकाः।
पतित्वा निधनं यान्ति काष्ठे कीटादिजन्तवः॥7॥

नित्यस्नानेन शिरोदेशे केशपाशे च मत्स्यकान्।
पश्यैतांश्च[3] गतप्राणान् कुतो जीवदया तव ॥8॥

धर्मो जीवदयामूलो नास्ति धर्मो दयां विना।
धर्मं विना कुतः स्वर्गो मोक्षसौख्यं च ते कुतः॥9॥

1.यथागमनिरूपियतां इति ब प्रतौ

2.शताम्वितै इति ब प्रतौ

3.पशैतां तत स्थाने इति ब प्रतौ

तस्मादज्ञानकं चेति तपस्ते भद्रमानसः।
हिंसाप्रसंगतो नित्यं कर्मबन्धस्य कारणम्॥10॥

श्रीमज्जिनेन्द्रचन्द्रोक्तो धर्म्मो हिंसाविवर्जितः।
तेन स्वर्गश्च मोक्षश्च प्राप्यते भव्यदेहिभिः ॥11॥

इत्यादिभूरिदृष्टान्तैर्बोधितस्तेन तापसः ।
वसिष्ठस्तत् परित्यज्य मुनिर्भूत्वा दिगम्बरः॥12॥

ततस्तीव्रं तपः कुर्वन् मासे मासे च पारणम्।
महातापनयोगं च सञ्चकार मुनिस्तदा॥13॥

तपो माहात्म्यतस्तस्य न पुरारावसंयुताः।
समागत्य नमस्कृत्य सप्तव्यन्तरदेवताः॥14॥

तं जगुर्भो मुने! स्वामिन्! वयं सिद्धास्तपोबलात्।
किं कुर्मस्ते वयं[1] कर्म देह्यादेशमिति स्थिताः॥15॥

तदा सोऽपि मुनिः प्राह वीक्षिताः[2] रूपमण्डिताः।
साम्प्रतं नास्ति मे कार्यं यूयं गच्छत देवता॥16॥

जन्मान्तरे तु कर्त्तव्यं युष्माभिः प्रेषणं मम।
इत्युक्ते लोभस्तेन तं नत्वा देवताः ययुः॥17॥

सोऽपि कुर्वंस्तपोघोरं सम्प्राप्य मथुरान्तिकम्।
स्थितो गिरौ महातापयोगमादाय निश्चलः॥18॥

मासोपवासिनं तत्र तं विलोक्य च भूपतिः।
उग्रसेनः सुमुग्धात्मा दापयामस घोषणम्॥19॥

1.कर्मस्ते इति ब प्रतौ

2.विक्षिता इति ब प्रतौ, वीक्ष्यता इति अ-स-द प्रतीनाम्

अहमेव प्रदास्यामि दानमस्मै तपस्विने।
नापरः पत्तने कोऽपि दानमस्मै ददात्विति[1] ॥20॥

ततो मासोपवासान्ते प्रविष्टो मथुरां पुरीम्।
वसिष्ठः स मुनिर्भिक्षानिमित्तं कर्मयोगतः॥21॥

वह्निसमुत्थितो राजमन्दिरे तं निरीक्ष्य[2] सः।
निराहारः समागत्य संस्थितः स्वतपस्थितौ॥22॥

पुनर्मासोपवासान्ते सम्प्राप्ते पारणादिने।
पुरीमध्ये समायातो भिक्षार्थं स मुनिस्तथा॥23॥

तस्मिन् दिने महायागहस्ती सन्तापयन् जनान्।
निर्गतस्तस्य संक्षोभो राजा व्यग्रोऽभवत्तराम् ॥24॥

अन्यः कोऽपि महाभर्त्तुराज्ञाभंगभयान्नरः।
दानं नैव ददाति स्म तस्मै तत्र तपस्विने॥25॥

तथा मुनिर्निवर्त्याशु मत्वा लाभं स्वमानसे।
मासोपवासकं कृत्वा पुनर्भिक्षार्थमागतः॥26॥

पत्तने च तदा यातं जरासंघमहीपतेः।
लेखपत्रं समाकर्ण्य भूपतिश्चोग्रसेनो वाक्॥27॥

अभूत् समाकुलः सोऽपि क्षुधातृष्णाप्रपीडितः।
क्षीणदेहे विनिर्गच्छन् पत्तनात् स मुनिस्तदा॥28॥

तथाभूतं समालोक्य मुनिं कष्टाश्रितं परम्।
दयालुभिश्च तदा प्रोक्तं प्रव्यक्तं नागरैर्जनैः॥29॥

1.ददान्विति इति स प्रतौ

2.नीरिक्ष्य इति ब-द प्रतयोः

अहो! महीपतिर्दानं स्वयं नैव ददाति च।
परान्निवारत्येष न विघ्नः किं करिष्यति।।30।।

वृथायं पीडितः स्वामी तपस्वी शीलमण्डितः।
इत्याकर्ण्य मुनिःसोऽपि वसिष्ठः पापकर्मणा।।31।।

सन्तप्तो मानसे गाढः तत्त्वज्ञानविवर्जितः।
महातपफलेनाहं भूत्वा पुत्रोऽस्य भूपतेः।।32।।

दुर्मतेरुग्रसेनस्य दानविघ्नविधायिनः।
राज्यं चास्य समादाय संकरिष्यामि निग्रहम्।।33।।

कृत्वा निदानकं चेति पतित्वा स महीतले।
मृत्वा पद्मावतीगर्भे समागत्य स्थितो यदा ।।34।।

तदा वैरानुभावेन सापि पद्मावती प्रिया।
विदार्य भूपतेर्वक्षस्थलं गृह्णामित्यलम्।।35।।

इत्यार्त्तध्यानतप्तापि जाता तद्वक्तुमक्षमा।
दुर्बला स्वशरीरेऽभूत्तन्मत्वा तस्य मन्त्रिणः ।।36।।

कृत्रिमं कारयित्वा तं स्वबुद्ध्या भूपतिं तदा।
दौहृदं पूरयामासुस्तस्यास्ते चतुरोत्तमाः ।।37।।

कैश्चिन्मासैस्तया सोऽपि जनितः पुत्रशत्रुकः।
तन्मुखालोकनं कर्तुमुग्रसेनो यदा प्रभुः।।38।।

गतस्तदा स बालोऽपि दष्टौष्टं भीषणाननम्।
कृत्वा क्रूराकृतिर्गाढं सञ्चक्रे मुष्टिबन्धनम्।।39।।

तदा तत्पितरौ ज्ञात्वा दुष्टोऽयं बालकस्तराम्।
धृत्वा तं वेगतः कंसं मंजूषायां स लेखकम्।।40।।

कालिन्दीतीरणो तोयप्रवाहे मुञ्चतः स्म तौ।
सत्यं यो मूलतो नष्टस्तं त्यजन्त्येव सज्जनाः ॥41॥

कौशाम्बीनगरीं प्राप्ता मञ्जूषा जलवेगतः।
कल्पपालप्रिया तत्र नाम्ना मन्दोदरी तदा॥42। ।

तां विलोक्य समादाय तत्रस्थं तं च बालकम्।
कंसोऽयं सेति सम्प्रोक्ता पालयामास सादरम्॥43॥

वृद्धिं प्राप्य ततः सोऽपि स्वभावात् क्रूरमानसः।
चप्पटादिप्रहारैश्च हन्त्युच्चैः परपुत्रकान्॥44॥

यत्र यत्र प्रयात्येव क्रूरः प्राणी परानपि।
तप्तायस्पिण्डवत्तत्र[1] सन्तापयति दुर्मतिः॥45॥

तेषां पूत्कारमाकर्ण्य नित्यं निर्विघ्नमानसा ।
गृहान्निर्वारयामास सापि मन्दोदरीतकम्॥46॥

सोऽपि निर्गत्य कौशाम्ब्याः प्राप्तः शौर्यपुरं परम्।
वसुदेवमहीपस्य सेवकोऽभून्महाभटः ॥47॥

एवं यावत्स्थिस्तत्र तावद्वक्ष्ये कथान्तरम्।
रम्ये राजग्रहे राजा त्रिखण्डेशः प्रर्वतते॥48॥

जरासन्धाख्याख्यातः कुर्वन् राज्यं स्थितोऽपि च।
तस्य शत्रुः सुरम्याख्ये विषये पोदने पुरे॥49॥

राजा सिंहरथो नाम्ना त्रिखण्डेशात् परान्मुखः।
मनः पीडां करोति स्म चक्रिणस्तस्य शल्यवत्॥50॥

एकदा स त्रिखंडेशो जरासन्धः सभान्तरे।
तेन सम्पीडितः प्राह पोदनाख्यपुराधिपम्॥51॥

1.पिंडव तत्र इति अ प्रतौ

नाम्ना सिंहरथं दुष्टं युद्ध्वा बुद्ध्वा रणांगणे।
यो मे ददाति चानीय ममाज्ञाविमुखं खलम्।।52।।

तस्मै दास्यामि देशार्द्धं पुत्रीं जीवद्यशोऽभिधाम्।
इत्युक्त्वा प्रेषयामास भूपालान् प्रतिः पत्रिकाः ।।53।।

तथा पत्रं समायातं विलोक्य वसुदेववाक्।
समुद्रविजयाधीशं नत्वा पृष्ट्वा सुभक्तितः।।54।।

चतुरंगबलोपेतस्तेन कंसेनसंयुतः।
पोदनाख्यपुरं प्राप्तो महाशूरशिरोमणिः ।।55।।

निजाश्वान् सिंहमूत्रेण भावयित्वा विचक्षणः ।
तैराकृष्टरथारूढः प्रौढः संग्रामसंकटे।।56।।

युद्ध्वा सिंहरथे नामा चिरं हत्वा च तद्बलम्।
सुभद्रातनयो जित्वा तं रिपुं क्रूरमानसम्।।57।।

कंसेन बन्धयित्वा च समानीय महीपते।
जरासंधस्य सान्निध्ये तं नत्वा प्राह भो प्रभो! ।।58।।

सोऽयं सिंहरथः शत्रुः समानीतस्तवान्तिकम्[1] ।
त्रिखण्डाधिपतिः सोऽपि तच्छ्रुत्वा तुष्टमानसः।।59।।

वसुदेवं प्रति प्राह त्वया भो! द्योतितस्तराम्।
यादवानां महावंशश्चन्द्रेणेव नभोगणम्।।60।।

अस्मिन् कार्यविधौ शूरस्त्वमेव सुभटाग्रणी।
यथा प्रकाशने भानुः समर्थः कमलाकरे।।61।।

गृहाण वाञ्छितं देशं कन्यां जीवद्यशोऽभिधाम्।
जातां कालिन्दसेनायां रूपेण जितदेवताम्।।62।।

1.तवंतिकम् इति ब प्रतौ

वसुदेवोऽपि स ज्ञात्वा कन्यायाः दुष्टलक्षणम्।
तं नत्वा भूपतिं तत्र सञ्जगौ चतुराशयः।।63।।

भो नरेन्द्र! मया नैव बद्धोऽयं बलवान् रिपुः।
भृत्येनैतेन कंसेन बद्धोऽसौ पोदनाधिपः।।64।।

पौरूषेणार्जितं राजन्! परकीयं यशोधनम्।
नैव गृह्णामि भो देव! तस्मादस्मै मनःप्रियम्।।65।।

सर्वं संदीयतामुच्चैरित्याख्याद्रोहिणी प्रियः।
न मुह्यन्ति कदा सन्तः कार्याकार्यविचारणे।।66।।

जरासन्धस्तमालोक्य पृच्छति स्म कुलं वद।
सोऽपि कंसो जगादैवं श्रूयतां भो नरेश्वरः! ।।67।।

कौशाम्बीपत्तने रम्ये कल्पपालप्रिया सती।
मन्दोदरीति मे माता तीव्रोऽहं परपुत्रकान्।।68।।

क्रीडायाः ताडयाम्युच्चैस्तदा सा लोकजल्पनैः।
अन्यजन्मांसुनिर्विण्णा तस्मादागत्य वेगतः।।69।।

सारं शौर्यपुरं नत्वा वसुदेवं गुणोज्ज्वलम्।
समाश्रित्य धनुर्विद्यामहाभ्यासे च संस्थितः।।70।।

ततोऽहं गुरुणानेन सार्द्धं गत्वा रणांगणे।
बद्धानीय रिपुञ्चैनं दत्तवान् भवते प्रभो! ।।71।।

तदा प्रभुस्तदाकारं संविलोक्य स्वमानसे।
नायं नीचकुलोत्पन्नः किं तु क्षत्रियसम्भवः।।72।।

शुभाकृतिर्वदत्येव नराणां सुकलादिकम्।
क्षत्रियेण विना नेदं कर्म कर्त्तुं क्षमं परम्[1] ।।73।।

1.क्षमः परः इति अ प्रतौ

इत्याकल्य्य कोशाम्ब्यां मन्दोदर्याः समीपकम्।
दूतं सम्प्राहिणो शीघ्रं तदागमनहेतवे ।।74।।

मन्दोदरी तमालोक्य पापी तत्रापि किं पुनः।
चकार कलहं सत्यं सम्भीत्वा चेतीमानसे।।75।।

तां मञ्जूषां समादाय तत्रागत्य नृपोऽग्रतः ।
क्षिप्त्वास्याः पुत्रकः सोऽयं नैव मे भो महीपतेः!।।76।।

मंजूषायां स्थितो देव कंसमय्यां समागतः।
नद्याः प्रवाहतो नीत्वा कंस नाम्नेति वर्द्धितः।।77।।

लघुत्वेऽपि सुदर्पिष्टो[1] हन्ति नित्यं परात्मजान्।
लोकापवादतो गेहान्मया निर्धारितो द्रुतम्।।78।।

सम्प्राहेति तदाकर्ण्य मंजूषास्थितपत्रकम्।
वाचयित्वोग्रसेनस्य पद्मावत्याः सुतोऽप्ययम्।।79।।

पितुर्विरुद्धभावत्वात्त्यक्तोऽयमिति तत्सुतेः ।
तुष्टस्त्रिखण्डभूमीशो दत्वा कन्यां महोत्सवैः ।।80।।

तं जगादात्र या तुभ्यं रोचते च महीतराम्।
तां गृहाण तदा सोऽपि कंसो नद्यां विमोचनात्।।81।।

महावैरं वहन् पित्रोर्गृहीत्वा मथुरापुरीम् ।
गत्वा तत्र महायुद्धं पित्रा सार्द्धं विधाय च।।82।।

पश्चात्तत्करिकुम्भाग्रे पादं दत्वा प्रकोपतः ।
अग्रस्थं सुभटं हत्वा धृत्वा तातं सुनिर्दयः।।83।।

पद्मावतीयुतं बद्धो नागपाशेन पापधीः।
असिपञ्जरके क्षिप्त्वा स्थापयामास गोपुरे।।84।।

1.सदर्पिष्टो इति अ-ब प्रतयोः

यथा वने समुत्पन्नो वह्निर्दहति काननम्।
तथा कुपुत्रो लोकेऽस्मिन् स्वपित्रोर्दाहको भवेत्॥85॥

ततः स्वयं समादाय पितुराज्यं स कंसवाक्।
गौरवेण समानीय वसुदेवं स्वपत्तनम्॥86॥

देवकीं नामतः कन्यां कांश्चित्कन्यां सुरांगनाम्।
महोत्सवैर्ददौ तस्मै सोऽपि सार्द्धं तया स्थितः॥87॥

भुञ्जन् भोगान् मनोऽभीष्टान् वसुदेवो नरेश्वरः।
चक्रे श्रीमज्जिनेन्द्राणां धर्मशर्माकरं परम्॥88॥

अथान्येद्युः[1] पितुर्मानभंगे कंसस्य बांधवः।
अतिमुक्तको नामापि विरक्तो योऽभवन्मुनिः॥89॥

कुर्वन् घोरं तपो जैनं सुरासुरसमर्चितम्।
तत्र राजालयं प्राप्तो भिक्षार्थं स मुनीश्वरः॥90॥

जीवद्यशोऽभिधा तत्र कंसभार्या मदोद्धतां।
गृहीत्वा देवकी पुष्पं वस्त्रं हासेन तं जगौ॥91॥

एतद्वस्त्रेण भो योगिन्! प्रकाशयति देवकी।
स्वस्याः सञ्चेष्टिती चेती धिग् विमूढं विचेष्टितम्॥92॥

तन्निशम्य मुनिं प्राह क्रुधा भो! मुग्धमानसे।
किं हासेन वृथा पापमहाबन्धविधायिना[2] ॥93॥

देवकीभाविपुत्रश्च भर्त्तारं ते हनिष्यति ।
श्रुत्वेति तत्र कोपेन तद्वस्त्रं सा द्विधाऽकरोत्॥94॥

1.अथानेद्युः इति अ प्रतौ

2.महापापविधायिना इति अ प्रतौ

सञ्जगाद मुनिः सोऽपि यथा वस्त्रं द्विधाकृतम्।
त्वया ते जनकं चापि स द्विधा संकरिष्यति॥95॥

तद्वस्त्रं च तया कोपात् पादाभ्यां तत्र मर्दितम्।
तद्विलोक्याऽवदत् सोऽपि भो बाल! देवकीसुत! ॥96॥

आसमुद्रखण्डं च स त्रिखण्डं महीतलम्।
पादाक्रान्तं विधायोच्चैः पालयिष्यति सर्वथा॥97॥

इत्युक्तो भाविकं वस्तु कृत्वाऽलाभं गतो मुनिः।
अतिमुक्तको नामा च स्वस्थानं भावितत्ववित्॥98॥

मदैरष्टभिराविष्टः कुज्ञानी पापकर्मणा।
कृत्वात्र साधुसन्तापं तत्फलं याति दुःसहम्॥99॥

ततोऽष्टधा सदाऽगर्वो न विधेयो विचक्षणैः।
श्रीमज्जिनेन्द्रतत्वज्ञैः पण्डितैर्द्धर्मसिद्धयेः॥100॥

ततः सर्वं समाकर्ण्य मुनिप्रोक्तं सुदुःखिता।
गत्वा वा च स्वभर्त्तारमेकान्ते कंसकामिनी ॥101॥

प्रिया वचः स च श्रुत्वा भीत्वा मृत्योः स्वमानसे।
असत्यं न मुनेर्वाक्यमिति मत्वापि कंसकः ॥102॥

जीविताशा[1] तुरो गत्वा वसुदेवं प्रणम्य च।
तं प्रोवाच प्रभो! सत्यं वचनाम्भोधिचन्द्रमा ॥103॥

यदा रणांगणे बद्धो मया सिंहरथः रिपुः।
तदा मह्यं वरो दत्तः श्रीमद्भिः पुण्यशालिभिः ॥104॥

सोऽत्र मे[2] दीयतां देव! स्मृत्वा वाचां स्वचेतसि।
देवक्यास्तनयेनाहं हन्तव्यः केनचित् प्रभोः! ॥105॥

1.जीवित्वाशा इति ब-द प्रतयोः

2.सोत्रमां इति अ प्रतौ

स्ववाचां गुप्तिभंगेन स्वतिमुक्तकयोगिना।
प्रोक्तं मे पीडितेनोच्चैर्भार्यया[1] गर्वचेतसा ।।106।।

ततोऽहं देवकीजातान् मारयाम्यत्र पुत्रकान्।
प्रसूतिसमये सा च त्वद्वाक्यादेतुं मद्गृहम् ।।107।।

अहो! तृष्णातुरः प्राणी परदुखं न वेत्त्यसौ।
स्वार्थमेकं हि जानाति दुर्जनो राक्षसो यथा ।।108।।

वज्रश्रृंखलया बद्धः सिंहो वा वासुदेववाक्।
वाचां श्रृंखलया बद्धः स्वीचक्रे तेन जल्पितम् ।।109।।

श्रुत्वा तद्देवकी प्राह महादुःखाकुला तदा।
वसुदेवं प्रति स्वामिन्! सन्ति ते भूरि योषितः।।110।।

पुत्राश्च बहवस्तासां का ते हानिर्महीपतेः।
जानाम्येहं महाकष्टं पुत्रसम्भूतिसंभवम्। ।।111।।

हन्यन्ते तनया कष्टं पश्य ते स्वेन चक्षुषा।
सन्तोषं प्राप्य ते शत्रुर्हा कष्टं गृह वासता। ।।112।।

पुत्राणां मारणे दुःखं भो स्वामिन्! सोढुमक्षमा।
ततो मां मुञ्च गृह्णामि तपोऽहं जिनभाषितम्। ।।113।।

तदाकर्ण्य प्रियावाक्यं वसुदेवो जगाद ताम्।
भो प्रिये! तस्य चेद्धंतु न ददामि स्वपुत्रकान् ।।114।।

तदालोके भवाम्युच्चैः सत्यसन्धानवर्जितः।
दीयन्ते तनयाः हन्तुं चेत्तद्दुःखं च दुःसहम्। ।।115।।

अतो भोगान् परित्यज्य पञ्चेन्द्रियसमुद्भवान्।
प्रात:काले गृहीत्वा वा दीक्षामावां जिनेशिनाम् ।।116।।

1.पीडितेनोच्चैभार्याया इति ब प्रतौ

पश्चात् कंसो दुरात्माऽसौ कस्य पुत्रान् हनिष्यति।
तस्मात्तद्दुःखमस्माकं नैव कान्ते भविष्यति। ।117।।

संविचार्येति तौ तत्र दम्पती सुखत: स्थितौ ।
द्वितीये दिवसे सोपी भिक्षार्थं देवकीगृहम्[1] ।।118।।

अतिमुक्तको योगीन्द्र: समायातो दृढव्रत:।
तं विलोक्य महाभक्त्या वसुदेवश्च देवकी ।।119।।

समुत्थाय तदा शीघ्रं नमस्कृत्य पुन: पुन:।
इत्यादिनवभि: पुण्यैः दत्वा तस्मै शुभाशनम् ।।120।।

दत्वाशीर्वचनं तत्र सुस्थितं मुनिपुंगवम् ।
तं तौ प्रणम्य सम्प्रीत्या पृच्छत: स्म महामुने:।।121।।

आवयोरत्र भो स्वामिन्! दीक्षा स्याद्वा न वा वद।
तदा स ज्ञानवान् प्राह मुनीन्द्रो भुवि तत्ववित् ।।122।।

देवक्याः सप्त पुत्राः ये भविष्यन्ति न संशयः ।
तन्मध्ये षट् पुत्रास्ते परस्थाने शुभोदयात् ।।123।।

चरमांगधरा वृद्धिं संप्राप्य सुखतस्तराम् ।
जरामरणनिर्मुक्तां मुक्तिं यास्यन्ति निश्चयात् । ।124।।

सप्तमस्ते सुतः सोऽपि कृष्णाख्यो नवमो हरि:।
हत्वा कंसजरासन्धौ त्रिखंडेषो भविष्यति। ।125।।

गदित्वेति मुनि: स्वामी स्वस्थानकं ययौ।
सन्तोषं सुतरां प्राप्य तौ द्वौ सौख्येन सुस्थितौ ।।126।।

ततः काले गलत्युच्चैस्त्रीन् वारान् सा च देवकी।
प्रसूतयमकान् पुत्रांश्च रमांगधरा शुभान् ।।127।।

1.गृहे इति ब प्रतौ

ज्ञात्वेन्द्रेण तदादिष्टो नैगमाख्यः सुरोत्तमः ।
भद्रिलाख्यपुरे रम्ये वणिग्भार्याऽलकाख्यया ॥128॥

तन्निक्षिप्य पुरस्तस्याः लात्वा तस्याश्च तान् मृतान् ।
देवकीं पुरतः शीघ्रं ढौकयामास गूढतः ॥129॥

तान् मृतान् वीक्ष्य कंसोऽपी किमेतैर्गत चेतनैः ।
मुनेर्वाक्यमसत्यं च सञ्जातमिति मानसे ॥130॥

भावयन्नपि भीतस्तान् शिलापीठे सुनिर्दयः।
क्रमादास्फालयामास धिग्विमूढविचेष्टितम् ॥131॥

ततः सा सप्तमे मासे देवकी निजमन्दिरे ।
निर्नामिकचरं देवं महाशुक्रात् समागतम् ॥132॥

सर्वलक्षणसम्पूर्णशत्रुसन्दोहमर्दनम् ।
नन्दनसुखतो लेभे कृष्णाभं नवमं हरिम् ॥133॥

कंसात् प्रच्छन्नभावेन वसुदेवबलौ तदा।
नन्दगोपगृहे बालो वृद्धिं प्राप्नोतु सौख्यतः ॥134॥

संविचार्येति देवक्या सार्द्धं मंत्रं विधाय च।
रात्रावेव तमादाय बालकं छत्रमण्डितम् ॥135॥

निर्गतौ मन्दिरात्तौ द्वौ तदा तत्पुण्ययोगतः ।
महाशृंगारसंलग्नप्रोल्लसद्रत्नदीपिका ॥136॥

तदग्रे वृषभाकाराः समभूत् पुरदेवता ।
पूर्वपुण्येन जन्तूनां को न स्यादुपकारकृत् ॥137॥

पुरप्रतोलिकां प्राप्य तौ स्थितौ च यदा तदा ।
बालकस्य चरणाङ्गुष्ठस्पर्शमात्रेण वेगतः ॥138॥

तत्कपाटद्वयं तत्र प्रोद्घाटितमभूत्तराम् ।
यादृशं विहितं पूर्वं सामग्री तादृशी भवेत् ॥139॥

गोपुरस्थस्तदावोच्दुग्रसेन: सबंधन:।
कपाटोद्घाटनं चक्रे रात्रौ केनेति सम्भ्रमामः[1] ॥140॥

तन्निशम्य सुधी: प्राह सपद्माख्यो बलो महान् ।
तूष्णीं तिष्ठ महाभाग! यस्त्वां सम्मोचयिष्यति ॥141॥

तेनेदं विहितं कर्म तदाकर्ण्य सन्तोषत:।
एवमस्तु चिरंजीयादित्याशीर्वचनं ददौ ॥142॥

ततो निर्गत्य तौ द्वौ च प्रापतुर्यमुनातटम्।
शापितस्य प्रभावेण द्विधाभावमुपागता ॥143॥

जडाशयानदी चापि ददौ मार्गं तदा तयोः ।
सत्यपुण्यवतां पुंसां कः सहायो न भूतले ॥144॥

तौ प्रणम्य तदावोचन्नंदगोपोऽपि भद्रधी:।
भो स्वामिनौ[2]! समाराध्य गन्धपुष्पाद्यपूपकै: ॥147॥

भार्यया मेऽभवद्दास्या पुत्रार्थं पुरदेवता।
अद्य रात्रौ सुतां प्राप्य कोपेन किल जल्पितम् ॥148॥

पश्चात्प्रदीयतामेषा देवतायै तु कन्यका।
ततोऽहं दातुमायातस्तस्यै सम्प्रेषितस्तया ॥149॥

इत्याकर्ण्य वचस्तस्य तौ द्वौ सन्तुष्टमानसौ ।
प्रोक्तं तद्वृत्तकं सर्वं गृहीत्वा तस्य कन्यकाम् ॥150॥

1.संभ्रमात् इति अ-द प्रतयोः
2.स्वामिन्नौ इति अ प्रतौ

भावि त्रिखण्डचक्रेश मे तत्वं[1] विद्धि बालकम्।
दत्वा तस्य करे गूढं सम्प्राप्य मथुरां पुरीम् ।।151।।

अर्पयामासतुः कन्यां देवक्याः पुरस्तदा।
बुद्धिः सञ्जायते शीघ्रं नित्यं पुण्यवतां सताम्।।152।।

नन्दगोपोऽपि सन्तुष्टस्तं समादाय बालकम्।
गत्वा गृहं प्रिये तुभ्यं देवता हृष्टमानसा।।153।।

ददौ पुत्रं जगच्चित्रं त्वं गृहाणेति संवदन्।
तस्याः समर्पयामास यशोदायाः सुबालकम्।।154।।

सापि मुग्धा समादाय तं पुत्रं लक्षणान्वितम्।
सत्यं देवतायाः दत्तः पुत्रोऽयं मे प्रसन्नया। ।155। ।

सन्तुष्टा मानसे गाढं पालयामासुस्तं सुखम्।
युक्तं प्रमुग्धनारीणां मानसे का विचारणा।।156।।

इतो दुराशयः कंसो देवक्याः पुत्रिकाऽभवत्।
श्रुत्वेति शीघ्रमागत्य देवकी मन्दिरं तदा।।157।।

दृष्ट्वा पुत्रीं स पापात्मा स्वहस्तेन च निर्दयः।
तन्नासाभञ्जनं चक्रे कुकर्मनिरतः खलः।।158।।

ततो भूमिग्रहे मात्रा दयामोहेन सा सुता।
पोषिता वर्द्धिता नित्यं सत्यं माता सुता हिता।।159।।

सम्प्राप्य यौवनं सापि स्वनाशां विकृतेस्तराम्[2]।
सुव्रताख्यार्यिकापार्श्वे दीक्षां लात्वा[3] विरक्तधीः ।।160।।

1.त्रिखंशचक्रेशमेत्तंत्त्वं इति ब प्रतौ

2.विकृतेसूराम् इति अ प्रतौ

3.लीत्वा इति ब प्रतौ

विन्ध्याद्रिकानने घोरे कायोत्सर्गं समाश्रिता।
ध्यायन्ती श्रीजिनं चित्ते सुस्थिता शुभ्रवस्त्रिका॥161॥

निश्चलां तां तदालोक्य मेरोर्वा चूलिकां दृढाम्।
देवतेयमिति ज्ञात्वा सम्पूज्य कुसुमादिभिः ॥162॥

गतेषु वनभिल्लेषु सा ततः कर्मयोगतः।
व्याघ्रेण भक्षिता शीघ्रं स्वर्गलोकं गता शुभम्॥163॥

व्याघ्रादुद्धरितं तस्याः वीक्ष्य हस्तांगुलिं त्रयम्।
तद्देशवासिभिर्व्याधैर्देवतेति समर्चितम्॥164॥

ततः कैश्चिद्धीनैर्नष्टं तस्याश्चांगुलिकं त्रयम्।
लोहकाष्ठमयं कृत्वा संस्थाप्य नगरादिषु॥165॥

भिल्लाद्याः पूजयन्ति स्म गन्धपुष्पादिभिस्तदा[1] ।
अद्यापि तत्त्रिशूलं च दृश्यते मूढकल्पितम्॥166॥

अथ नन्दगृहे तत्र कृष्णो नामांतिमो हरिः[2]।
यशोदादिभिरित्युच्चैः गोपनारीभिरादरात्॥167॥

कराम्बुजैर्महाप्रीत्या लालितः सोऽपि बालकः।
शोभते स्म स्वपुण्येन यथा कामद्रुमांकुराम्॥168॥

गोपांगना मनः पद्मविकसनदिवामणिः।
स राजितस्तदा बालः कृष्णवर्णो यथामणिः॥169॥

यदा वृद्धिं समाप्नोति स बालस्तत्र लीलया।
बालक्रीडाशतं कुर्वन् रञ्जयन् जनतामनः ॥170॥

1.गंधपुष्पादिभिः सदा इति ब-द प्रतयोः
2.हरे इति अ प्रतौ

तदा कंसपुरीमध्ये नक्षत्रपतनं महत्।
भूमिकम्पनदिग्दाहावुत्पाता बहवोऽभवन् ॥171॥

कंसो नैमित्तिकं प्राह वरुणाख्यं भयाकुलः।
किमेतेषां फलं भावि ब्रूहिं भो! भावितत्त्ववित्॥172॥

तदा नैमित्तिकश्चाह श्रुणु त्वं भो महीपते! ।
शत्रुस्तव समुत्पन्नो महानिति निशम्य तम्॥173॥

महाचिन्ताग्निसन्तप्तः स कंसो निजमानसे।
तीव्रे शत्रौ समुत्पन्ने कस्य चिन्ता न जायते॥174॥

कंसं चिन्तातुरं ज्ञात्वा ताश्च सप्ताऽपि देवताः।
समागत्य जगुः स्वामिन्! किं कुर्मो दासिका वयम्॥175॥

कंसो जगौ समुत्पन्नो यत्र कुत्रापि मे रिपुः।
गत्वा तत्र स हन्तव्यो भवतीभिरिति द्रुतम्॥176॥

तत्समाकर्ण्य तं ज्ञात्वा विभंगज्ञानतस्तदा।
पूतना देवता पूर्वं तं हन्तुं सा सुनिर्गता॥177॥

यशोदारूपमादाय स्वयं भूत्वा विषस्तनी।
पयो दातुं प्रवृत्ता सा तत्पानसमये तदा॥178॥

अन्या काचित्समागत्य देवता कृष्णपुण्यतः।
पूतनास्तनयोर्युग्मं पीडयामास[1] निष्ठुरम्॥179॥

तत्पीडामक्षमां सोढुं पापिनी पूतना तदा।
कृत्वा क्रोशं कुधीर्नष्टा रात्रिर्वा प्रहरैर्हता॥180॥

द्वितीया शकटाकारं कृत्वा तस्योपरि क्रुधा।
धावन्ती तेन पादाभ्यां ताडिता निर्गता द्रुतम्॥181॥

1.पीडियामासाष्टु इति ब प्रतौ

अन्यदा तस्य सा माता बद्ध्वी कटाग्रमुदूखलम्[1] ।
जलार्थं निर्गता तस्य पृष्ठतः सोऽपि बालकः॥182॥

उदूखलने बद्धोऽपि चपलत्वाद्विनिर्ययौ।
अम्ब चाचेति[2] सञ्जल्पन् मार्गे सम्मोहयन्परान्॥183॥

तदा भूत्वा सुरीभेदौ तुंगौ ककुम्भपादपौ।
तं निपातयितुं प्राप्तौ संपदं तौ निजोपरि॥184॥

वसुदेवस्तदा बालो मूलादुर्हत्यतौ नगौ।
तृणवद्वेगत: क्वापि न्यक्षिपन्निजलीलया॥185॥

ततो निर्गमने तस्य सम्प्राप्ता देवतापरा।
तालवृक्षाकृतिं धृत्वा पातयन्ती फलानि च॥186॥

तन्मस्तके तदा सोऽपि कराभ्यां कन्दुकानि वा।
संगृह्णन् क्रीडया तस्मै निर्भयःपथिबालकः॥187॥

तत्क्षणे देवता चान्या खरीभूत्वा समागता।
तं हन्तुं रासभीतां च धृत्वा पादे स माधवः॥188॥

तं तरुं ताडयामास निष्ठुरं कोपतस्तराम्।
ते देवते तदा नष्टे पूत्कृत्य तडितौ यथा॥189॥

तथा तुरंगमाकारा देवी तं मारणेच्छया।
समायाता तदा विष्णुर्गले धृत्वा स्वलीलया॥190॥

ग्रीवाभंगं विधायोच्चैस्तां देवीं जयति स्म स:।
गता सा प्राणसन्दोहात्तुरंगाकारधारिणी ॥191॥

1.कद्यामुदूखलं इति ब-स-द प्रतीनाम्
2.वेति इति अ प्रतौ

एवं सर्वाश्च संभूत्वा निरर्थाः देवतास्ततः।
कंसाभ्यर्ण्यं समागत्य तं हन्तु न क्षमा वयम्॥192॥

इत्याख्याय गताःशीघ्रं यथा विद्युल्लता क्वचित्।
सत्यं पुण्यवतां पुंसां न समर्थाश्च देवताः॥193॥

तत्सर्वं तत्र संवीक्ष्य पुरनारीभिरादरात्।
गत्वा तत्तीरिणीतीरे तन्मातुः कथितं जवात्॥194॥

भो मुग्धे! ते सुतो मार्गे महावृक्षाश्च गर्दभैः।
पीडितोऽसौ त्वया बालो बद्धश्चोदूखले दृढम्॥195॥

इत्याकर्ण्य तदागत्य यशोदा व्यग्रमानसा।
पुत्र पुत्रेति जल्पन्ती तं समादाय वेगतः ॥196॥

स्पृष्ट्वा[1] तस्य वपुः प्रीत्या समालिंग्य च बालकम्।
गृहं[2] नीत्वा महायत्नैः पालयामास सा सती॥197॥

अन्यदा तत्र रथ्यायां क्रीडां कुर्वन्निजेच्छया।
संस्थितो वासुदेवोऽसौ निर्जिताखिलदेवता ॥198॥

यावत्तावत्समायातः कंसेन प्रेषित कुधी[3] ।
अरिष्टाख्यः सुरः कोऽपि तं निपातयितुं द्रुतम्॥199॥

प्रोत्तुंगवृषभाकारः सिंहो वा भयदायकः।
कुर्वन्नादं महातीव्रं तत्रायातो दुराशयः॥200॥

वासुदेवेन सन्धृत्वा ग्रीवाभंगेन पीडितः।
स वृषो निर्मदो जातो दन्ती वा दंतवर्जितः॥201॥

1स्पृष्टा इति अ प्रतौ
2.गृही इति अ प्रतौ
3.क्रुद्धा इति अ-स-द प्रतीनाम्

महानपि वृषः सोऽपि तदग्रे दुर्बलोऽभवत्।
बलवद्भिः सहयासे को न वा स्वमदं त्यजेत्।।202।

निर्जिते वृषभाकारे तस्मिन् देवे कृतारवे।
कोलाहलं समाकर्ण्य किं जातमिति भीवशा[1] ।।203।।

तत्रागत्य च तन्माता यशोदा प्राह वो सुत।
त्यज! त्वं चेष्टितं चेदं वृषाद्यैः[2] सह भण्डनम्।।204।।

तुरंगमैः खराद्यैश्च करोसि कलहं सदा।
पुत्र! त्वं राक्षसः किं वा वारयामास सेवितम्।।205।।

इत्यादिपौरुषं श्रुत्वा तथा तस्य च लोकतः।
देवकी वसुदेवश्च वीक्षितुं तं समुत्सुकौ।।206।।

गोमुखीनामधेयोपवासव्याजेन[3] गोकुले।
बलदेवैर्युक्तौ च तत्रायातौ प्रमोदतः।।207।।

तदा विलोक्य तं कृष्णं ग्रीवाभंगेन निर्जितम्।
वृषभं तं समालम्ब्य सुस्थितं निजलीलया।।208।।

गंधपुष्पादिभिः प्रीत्या पूजयित्वा सुतं मुदा।
भूषयामास तु दिव्यभूषणैः कुलभूषणम्।।209।।

ततः प्रदक्षिणां प्रीत्या कुर्वत्याः स्तनयोर्युगात्।
देवक्याः पतितं विष्णोर्मस्तके सुपयस्तदा।।210।।

पद्मोबलस्तदालोक्य मन्त्रभेदभयात्सुधीः।
उपवासपरिम्लानः सम्ब्रुवन्निति मूर्छितः[4] ।।211।।

1.भीवसा इति अ प्रतौ

2.वृखाद्यैः इति अ-स प्रतयोः

3.गोमुखानामध्ये योपवास इति ब प्रतौ

4.मूत्छिता इति अ प्रतौ, मूछिता इति ब प्रतौ

पयः कुंभसमादाय सोऽभ्यषिंचच्च देवकीम्।
भवन्ति चतुरालोके महान्तः पुण्ययोगतः॥212॥

ततो गोपालकान् सर्वान् सन्मान्यवसनादिभिः ।
कृष्णादीन् भोजयित्वा तौ स्वयं भुक्तापुरीमितौ॥213॥

ततो विष्णुस्तदा रेजे वृद्धिं गच्छन् स्वपुण्यतः।
द्वितीया चन्द्रवन्नित्यं जनयन् प्रीतिमद्भुताम्॥214॥

एकदासौ महावृष्टौ दृष्ट्वा व्यग्रं स्वगोकुलम्।
हरिगोवर्द्धनं नाम पर्वतं निजलीलया॥215॥

समुद्धृत्य गवां चक्रे छत्रोद्धरणवत्तराम्।
आपदागतजन्तूनामुद्धारो हि सतां प्रियः॥216॥

तदा तत्कीर्तिसद्वल्ली सज्जनानन्ददायिनी।
जगन्मण्डपमासाद्यसद्यो विस्तीर्णतामिता॥217॥

अथैकदा पुरे तत्र मथुराख्ये जिनेशिनाम्।
चैत्यालयस्य सान्निध्ये पूर्वदिग् देवताग्रहे॥218॥

सर्पशय्या धनुः शंखो रत्नत्रितयमुत्तमम्।
देवतारक्षितं[1] तत्र समुत्पन्नं हरेः शुभात्॥219॥

तानि कंसः समालोक्य नीत्वा नैमित्तकं जगौ।
किमेतेषां समुत्पत्तेः फलं भावीति मे वद॥220॥

तन्निशम्य स च प्राह वरुणाख्यो विचक्षणः।
श्रृणु त्वं भो महीनाथ! नाथशय्यामिमां ध्रुवम्॥221॥

1.देवतारक्षतं इति द प्रतौ

समारूह्य करेणोच्चैः शंखं य पूरयत्यहो।
पुनर्द्वितीयहस्तेन[1] चापमारोपयत्यलम्।।222।।

स ते भूमिपतेः शत्रुः प्राणहारी न संशयः।
अर्द्धचक्री च सम्भावी जरासन्धं विना सकृत्।।223।।

श्रुत्वा तद्वचनं कंसो जीविताशोतिदुर्मतिः।
स्वयं तत्त्रितयं कर्म तदाकर्तुं समुद्यतः।।224।।

असमर्थस्तदा जातः स कंसस्तत्र कर्मणि।
असाध्यं साध्यते केन विना पुण्येन भूतले ।।225।।

मानभगन्तरां प्राप्य स तदा मथुरापतिः।
ततः शत्रुं परिज्ञातुं दापयामास घोषणाम्।।226।।

यः शास्त्रोक्तप्रकारेण कर्मणि संकरिष्यति।
तस्मै वीराय दास्यामि स्वकन्यामिति पत्तने।।227।।

तदाकर्ण्य तदा सर्वे राजानः समुपागताः।
तथा राजगृहाच्चापि चक्रिपुत्रः सुभानुवाक् ।।228।।

भानुना निजपुत्रेण सहागच्छन् स्वसम्पदा।
गोदावनमहानागसम्बंधिः सरसस्तटे।।229।।

स्थातुं वाञ्छन् समाकर्ण्य तदा गोपालजल्पनैः।
अस्मान्नागतडागाच्च तोयमानेतुमक्षमः ।।230।।

परः कोऽपि विना कृष्णं तस्मात्सोऽपि महीपतिः।
यशोदासुतमाहूय सैन्यं तत्र निवेशयन्।।231।।

कुत्र भो! गम्यते राजन्! कृष्णेनेति प्रजल्पितः।
सुभानुर्भूपतिः प्राह तत्कार्यं विस्तरेण च।।232।।

1.पुनर्दितीहस्तेन इति ब प्रतौ

मथुरापत्तने जैनप्रासादस्य[1] समीपगे।
पूर्वदिग् देवतागारे रत्नत्रितयमुत्तमम्॥233॥

नागशय्याधनुः शंखं देवताधिष्ठितं महत्।
उत्पन्नो यः समारूह्य तां शय्यां सुभटाग्रणीः॥234॥

चापमारोपयत्युच्चैः शंखं सम्पूरयत्यलम्।
तस्मै कंसमहीशेन स्वकन्या दीयते द्रुतम्॥235॥

तत्कर्मकर्त्तुमायाताः बहवस्ते महीभुजाः।
अस्माभिश्चापि तत्कार्यं विधातुं तत्र गम्यते॥236॥

श्रुत्वा तद्वचनं विष्णुः प्राहैवं निजलीलया।
अस्मादृशैः प्रभो! चैतत् किं कर्तुं कर्म शक्यते॥237॥

इत्युक्ते विष्णुना तेन सुभानुर्नामभूपतिः।
दृष्ट्वा तत् रूपमत्यन्तसुन्दरं निजमानसे॥238॥

अहो पुण्याधिकः कोऽपि कालोऽयं महिमान्वितः।
संविचार्येति भो भद्र! समर्थश्चेद्भविष्यसि॥239॥

त्वं तत्र कर्मणीत्येहि तं समादाय सत्वरम्।
सम्प्राप्य मथुरां तत्र युक्त्या कंसं ददर्श सः॥240॥

कृष्णोऽपि तत्र संवीक्ष्य तत्कर्म करणोद्यतान्।
भूपतीनसर्मथांश्च ततोऽसौ सुभटाग्रणीः॥241॥

धनुः[2] धृत्वा समीपे च शय्यामारूह्य लीलया।
चापमारोप्य निःशंकः पूरयामास कम्बुकम्॥242॥

1.जैनप्रसादस्य इति ब प्रतौ

2.भानुधृत्वा इति अ-ब प्रतयोः

तदा तत्त्रयनादेन विद्युत्पातप्रहारिणा।
चचाल भूतलं सर्वं ससमुद्रः सपर्वतः[1] ॥243॥

सुभटाः प्राणसन्देहं संप्रापुस्ते भयाकुलाः।
पौराः सर्वेऽपि सन्त्रस्ता गजाद्यैः पशुभिः समम्॥244॥

तदा सुभानुभूपेन नेत्रोत्क्षेपेण वेगतः।
समादिष्टो हरिः सोपि सञ्जगाम स्वगोकुलम्॥245॥

तदा कैश्चिन्नरैः प्रोक्तं गत्वा कंसमहीपतेः।
भानुनैतत् कृतं कर्म्म कैश्चिन्नन्दसुतेन च॥246॥

श्रुत्वेति कंसभूपालो विज्ञातुं[2] स्वस्य वैरिणम्।
येनेदं विहितं कर्म महासाहसशालिना॥247॥

किंकुलः कस्य पुत्रोऽसौ किं नाम कुत्र संस्थितिः।
तस्मै प्रदीयते कन्या मया सौन्विषयतां द्रुतम्॥248॥

इत्युक्त्वा प्रेषयामास किंकरान् गूढमानसः[3]।
युक्तं पापात्मकः प्राणी चित्ते वाचि पृथक् पृथक्॥249॥

तथा पुत्रकृतं कर्म स श्रुत्वा नन्दगोपवाक्।
भीत्वा गोकुलमादाय नष्ट्वा क्वापि व्रजन्नपि॥250।

मार्गे कंसनिदेशेन क्रियमाणः प्रवर्त्तते॥
आवासस्तत्र पाषाणमहास्तंभो भटोत्तमः॥251॥

समुद्धृत्तुं प्रवृत्ताश्च बभूवुर्न सर्मथकाः ॥
तान् विलोक्य तदा तेन कृष्णेन भुजशालिना॥252॥

1.निसर्पवतम् इति अ प्रतौ

2.विज्ञातं इति ब-द प्रतयोः

3.मूढमानसः इति ब-द प्रतयोः

समुद्धृतो महास्तंभः कन्दुको वा स्वलीलया।।
तदा ते तं समालोक्य सर्वे सन्तुष्टमानसाः।।253।।

दिव्यवस्त्रप्रभूषाद्यैः पूजयन्ति स्म माधवम्।।
न तच्चित्रं भवेल्लोके सपुण्यः कैर्न पूज्यते।।254।।

नन्दगोपापि सन्तुष्टः सत्यस्मिन्नन्दनोत्तमे।।
कस्मादपि भयं नो मे संविचार्येति चेतसि।।255।।

पश्चादागत्य निःशंकः स्ववज्रं सुखतः[1] स्थितः।।
एकेनापि सुपुत्रेण पितुः किं न शुभं भवेत्।।256।।

एकदा कंसभूपोऽपि कर्मैतद्विष्णुना कृतम्।।
इति ज्ञात्वापि सन्देहविनाशाय समुद्यतः।।257।।

महानागसरो जातं सहस्त्रदलपंकजम्।।
शीघ्रं समानय त्वं मे नन्दगोपेति तं प्रति।।258।।

दूतं सम्प्रेषययामास श्रुत्वा तन्नन्दगोपतिः।।
शोकं चकार भो! भूपाः प्रजानां प्रतिपालकाः।।259।।

प्रोक्ताः पापादिदानीं तु हन्तारस्तेऽभवन् क्षितौ।।
इत्यादिकं तदा दुःखं कृत्वा कृष्णं जगाद च।।260।।

याहि भो! पुत्र पद्मानि महानागसरोवरात्।
आनीय कंसभूपस्य देयानीति त्वया ध्रुवम्।।261।।

तदाकर्ण्य कुमारोऽसौ किमेतदिति सम्ब्रुवन्।
तान्यानयामि वेगेन पद्मान्युच्चैर्विनिर्गतः।।262।।

गत्वा सर्वसरो विष्णुः सम्प्रविष्टश्च निर्भयः।
तं प्रविष्टं समालोक्य स नागः कोपकम्पितः।।263।।

1.सुषतः इति अ प्रतौ

कुमारं ग्रसितुं प्राप्तः सन्मुखं क्रूरमानसः।
चलज्जिह्वा द्वयेनोच्चैर्यमस्यापि भयंकरः।।264।।

प्रज्वलद्गरलज्वाला सहस्त्रैर्विकृतानन[1]ः।
फणारत्नप्रभाभारा द्योतिताखिलदिग्मुखः।।265।।

आरक्तलोचनद्वंदो वक्रदंष्ट्रो दुराशयः।
तमालतरुकालांगो यमो वा प्राणनाशकृत्।।266।।

आपतन्तं[2] तमालोक्य हरिर्वा हरिरुद्धतः।
पीतवस्त्रं समुद्धृत्य स्वकीयं जलपूरितम्।।267।।

वज्रपातोपमं तस्य मस्तके घातमुत्कटम्।
पातयामास निःशंको भाविलक्ष्मीप्रियापतिः।।268।।

तस्य पुण्यप्रभावेण भीत्वा नागो भयानकः।
गत्वा तत्र विले क्वापि प्रविष्टः कीटको यथा।।269।।

ततः कृष्णश्चिरं तत्र जलक्रीडां निजेच्छया।
कृत्वा पद्मानि निर्मूल्य शीघ्रं शत्रुकुलानि वा।।270।।

समानीय ततस्तस्मै प्रेषयामास सत्वरम्।
सोऽपि कंसः समालोक्य नानापद्मकदम्बकम्।।271।।

सन्तप्तो मानसे शंकुर्हतो वाह्लादिकेनचित्[3]।
निश्चयात्तं रिपुं ज्ञात्वा नन्दगोपसुतं ततः।।272।।

निजैर्मलैः सहागच्छ नन्दगोपेति सत्वरम् ।
तन्नामश्रवणादेव[4] नन्दगोपोपि निर्गतः।।275।।

1.सहश्रैर्विकृताननः इति ब प्रतौ

2.आपतं इति अ प्रतौ

3.हृदो वा हृदये स्वरः इति स प्रतौ

4.तन्नामश्रवणादेवे इति द प्रतौ

कृष्णादिभिर्महामल्लैर्मण्डितो निर्भयाशयः।
सिंहविक्रमपुत्रेण क्व भयं च पितुर्भवेत्।।276।।

कृष्णादयस्तदा मल्लाः कृष्णवर्णमदोद्धताः।
शोभन्ते स्म महानादं कुर्वन्ति वा घनाः घनाः ।।277।।

तन्मध्ये स हरिः प्रौढो बद्धकक्षोलसद्युतिः।
चन्दनाद्यर्चितो रेजे वीरलक्ष्मी वरोऽथवा।।278।।

स्वभुजास्फालनं तीव्रं कुर्वन्तस्ते निरंकुशाः।
प्रोच्छलन्तो नभोभागे कृष्णमुख्यारणेच्छया।।279।।

सम्प्रापुर्मथुरां यावत्तावत्तेषां परस्परम्।
महाकोलाहलं श्रुत्वा गजेन्द्रः रुद्रघोषणः।।280।।

आम्लानं स्तम्भमुन्मुल्य कुर्वन् क्षोभं च पत्तने।
सम्प्राप्तः सन्मुखं धावन् मदोन्मत्तो निरंकुशः।।281।।

तदा हरिस्तमालोक्य हरिर्वा निष्ठुराशयः।
गत्वा तत्सम्मुखं तस्य दन्तमेकं स्वशक्तितः।।282।।

समुत्पाद्य तदा तेन दन्तेनैव महागजम्।
ताडयामास वेगेन गतः सोऽपि गजः क्वचित्।।283।।

तेनैकेन प्रहारेण स गजो निर्जितः कथम्।
यथा स्याद्वादवादीशवाक्येनैव कुवादकृत्।।284।।

पूर्वमत्र जयो जातः सन्तुष्टश्च वदन्निति।
गोपकान् स हरिः प्राप्तः कंसराजसभान्तरम् ।।285।।

यत्र कंसमहीशस्य निदेशेन समागताः।
भटाश्चाणूरमल्लाद्याः युद्धार्थं क्रूरमानसाः।।286।

तत्र श्रीवसुदेवोऽपि ज्ञात्वा कंसस्य दुष्टताम्।
सावधानः स्वसैन्येन तदैकान्ते स्थितः सुधीः[1] ॥287॥

यदा कंसाज्ञया सर्वे मल्लाः पक्षद्वयोद्भवाः।
परस्परं महायुद्धं विधातुं ते समुद्यताः॥288॥

तदा पद्मबलः सोऽपि समुत्थाय कृतध्वनिः।
मायया हरिणा सार्द्धं युद्धं कुर्वन् विचक्षणः॥289॥

कंसं दुराशयं हन्तुं प्रस्तावस्तेऽद्य वर्तते।
इत्याख्याय शनैर्मन्त्रं तत्कर्णे[2] निर्गतं भवेत्॥290॥

विष्णुपक्षास्तदा मल्लाः सर्वे ते गोपपुत्रकाः ।
बद्धकक्षायमाकाराः निष्ठुरा रावसंयुताः॥291॥

नानावादित्र निर्घोषैर्विस्फुरं[3] तोरणांगणे।
पादप्रहारतो भूमिमधः कुर्त्तुमिवोद्यताः॥292॥

कृष्णवर्णाः महातुंगाः सिन्दूराद्यैरलंकृताः।
इतस्ततो भ्रमन्तश्च युवानो दंतिनो यथा॥293॥

आवर्त्तनैस्तथा शीघ्रं निवर्तनं शतैरपि।
बलानैः प्लवानैश्चान्यैः करणैस्ते मदोद्धताः॥294॥

कृष्णनायकमासाद्य तिरस्कृतजगद्भटाः।
संग्रामकांक्षिणस्तत्र तिष्ठन्ति स्म कृतोद्यमाः॥295॥

कंसमल्लाश्च तत्रैव चाणूरप्रमुखास्तथा।
रणांगणे स्थितास्तेऽपि कृतयुद्धाः विरोधिभिः॥296॥

1.ससंस्थिति इति स प्रतौ

2.ततकर्ण्ये इति अ प्रतौ, तत्कस्मै इति ब प्रतौ

3.विस्फरं इति अ प्रतौ

तदा तत्र महामल्लाः संघटे चरणांगणे।
हरिवीराग्रणीः प्राप्तो मल्लयुद्धजयोत्कराः।।297।।

कटिबद्धमहापीतवस्त्रोलंकारमण्डितः।
प्रस्फुरत्तेजसा दिव्यो द्वितीयो वा दिवाकरः।।298।।

वज्रकायो महातुंगश्चलन् वा नीलपर्वतः।
उत्पतन्निपतन् भूमौ विद्युत्पातोपमश्चलः।।299।।

सिंहनादेन सिंहो वा प्रज्वलन् कोपवह्निना।
आपदं तदादेशान्मल्लं चाणूरसंज्ञकम्।।300।।

हरिर्वा मत्तमातंगं तं समुद्धृत्य लीलया।
निहत्य प्रेषयामास वेगतोऽसौ यमालयम्।।301।।

तद्वीक्ष्य मरणं तस्य कंसभूपो महाक्रुधा।
स्वयं समुत्थितो हन्तुं माधवः कालचोदितः।।302।।

आगच्छन्तं तमालोक्य कंसं वा कंसभाजनम्।
संघृत्वा चरणे गाढं कोपात् कृष्णो महाबली।।303।।

आकाशे भ्रमयन्नुच्चैराक्षिपन् वा बलिं यमे।
आस्फालय धरापीठे प्रापयेच्च यमान्तिकम्।।304।।

कृष्णेन स हतः कंसः प्राणनाशं गतो जवात्[1] ।
रागद्वेषगतो जन्तुः को न यातः क्षयं क्षितौ।।305।।

तस्माद्भव्याः समुत्सृज्य रागद्वेषौ सुदूरतः।
श्रीमज्जिनेन्द्रसद्धर्मे मतिं कुर्वन्तु शर्मदे।।306।।

1.जावत् ब प्रतौ

तदा कृष्णोपरि प्रीत्या[1] देवाः सन्तुष्टमानसाः।
जयनन्दानकध्वानैः पुष्पवृष्टिं प्रचक्रिरे॥307॥

तदा पद्मबलो हर्षाज्जयनन्दादिघोषणैः ।
आलिगनां ददौ तस्मै निःशंकं सर्ववीक्षितम्॥308॥

वसुदेवोऽपि भूपालान् दुष्टान् सर्वान् निवार्य च।
एष मे तनयः कृष्णो भटानामग्रणीर्महान्॥309॥

देवक्याः कुक्षिसंजातो रत्नं वा रत्नभूमितः।
प्रच्छन्नं नन्दगोपस्य गोकुले वृद्धिमाप्तवान्॥310॥

सर्वशत्रुकुलध्वंसी मित्रपद्माकरे रविः ।
वसुंधरा महाभारधरणे धवलोत्तमा ॥311॥

इत्यादिकं समाख्याय सर्वेषामग्रतः सुधीः।
स्वीचकार सुतं कृष्णं विख्यातं सर्वभूभुजाम्॥312॥

तदाकर्ण्य नृपाः सर्वे सम्बधं सुमनोहरम्।
वसुदेवं वासुदेवं तं नमस्कृत्य सुभक्तितः॥313॥

वस्त्राभरणसन्दोहैः सारमुक्ताफलादिभिः।
पूजयन्ति स्म सद्भावात् सपुण्यः कैर्न पूज्यते॥314॥

इत्यादिकं यशोराशिं सम्प्राप्य स हरिस्तदा।
भक्ताः तद्बंधनं शीघ्रं प्रियैर्वाक्यैर्महोत्सवैः॥315॥

श्रीजिनेन्द्रपदाम्भोजः सेवनैकमधुव्रतम्।
उग्रसेनं प्रियायुक्तं तत्रैव मथुरापुरे॥316॥

राज्ये संस्थापयामास युक्तः सन्तो महीतले।
कल्पवृक्षोपमा नित्यं परेषामुपकारिणा ॥317॥

1.परिप्रत्या इति ब प्रतौ

तथा स नन्दगोपोऽपि गोपालाद्यैः समन्वितः।
नानावस्त्रसुवर्णाद्यैर्दुःखदारिद्रहारिभिः।।318।।

पूजितो विष्णुना तेन प्रियवाक्यशतैरपि[1]।
यावन्निःशेषशत्रूणां प्रलयं संकरोम्यहम्।।319।।

तावत्तिष्ठन्तु सौख्येन भवन्तो हितकारिणः।
इत्यादियुक्तिभिर्नन्दगोपाद्यास्ते विसर्जिताः।।320।।

कारणेन विना सन्तः परोपकृतितत्पराः।
विस्मरन्ति कथं लोके जन्मनः प्रतिपालनाम्।।321।।

ततोऽसौ वसुदेवेन पित्रा भ्रात्रा बलेन च।
अन्यैश्च बन्धुभिः सार्द्धं महाप्रीतिसमन्वितैः।।322।।

विभूत्या सर्वसैन्येन मण्डितो बन्दिभिः स्तुतः।
गत्वा शौर्यपुरं रम्यं ध्वजाद्यैः परिशोभितम्।।323।।

समुद्रविजयादींश्च नत्वा भक्त्या मुहुर्मुहुः।
महोत्सवशतैः कृष्णः स्वपुण्येन सुखं स्थितः।।324।।

सत्यं श्रीमज्जिनेन्द्रोक्तं स्तोकं पुण्यमपि श्रितम्।
ददाति विपुलं सौख्यं किं पुनस्तत्त्रिधा कृतम्।।325।।

(शार्दूलविक्रिडित)
यः श्रीदेवनिकायपूजितपदः सम्प्रार्थितार्थप्रदो।
भव्यानां भवसागरैकतरणे पोतायमानो दृढः ।।
बालब्रह्मनिधिः प्रसिद्धमहिमासत्केवलोद्योतकः।
स श्रीनेमिजिनो जगत्त्रयगुरुर्दद्यात्सतां वाञ्छिताम्।।326।।

इति श्रीत्रिभुवनैकचूड़ामणिश्रीनेमिजिनपुराणे भट्टारकश्रीमल्लिभूषणशिष्याचार्य श्रीसिंहनंदिनामांकितेब्रह्मनेमिदत्तविरचिते कृष्णनामनवमनारायणोत्पत्तिकंसचाणूर मल्लपराजयव्यावर्णनो नाम पञ्चमोऽधिकारः ।।5।।

1.प्रियवाक्यैशतैरपि इति ब प्रतौ

षष्ठोऽधिकारः

अथ वक्ष्ये[1] जिनं नत्वा तत्पुराणं यथाभवत्।
श्रृण्वन्तु सुधियो भव्याः गणीन्द्रैः परिकीर्त्तितम्।।1।।

स्वभर्तृमरणोत्पन्नदुःखदावकदर्थिता।
सन्त्रस्ता वा मृगी नष्टा जाता जीवद्यशोऽभिधा।।2।।

सर्वालंकारनिर्मुक्ता[2] प्रस्खलन्ती पदे पदे।
सा तदा निर्गता गेहान् कथा वा कुकवेर्वृथा।।3।।

गत्वा स्वतातसान्निध्यं रुदंति च स्थिता पुरः[3]।
तां विलोक्य प्रभुः प्राह जरासन्धोऽतिदुःखिताम्।।4।।

किं कारणं सुते केन कृत्वा त्वं चातिदुःखिनी।
तदा पुत्री जगादैवं श्रृणु राजन्! गदाम्यहम्।।5।।

वसुदेवसुतो देवः कृष्णनामा महाबली।
प्रच्छन्ननन्दगोपस्य गोकुले वृद्धिमापय ।।6।।

लघुत्वेऽपि प्रभो येन निर्जिता[4] पूतनासुरी।
समाकृष्य स्तनद्वन्दं निर्दयं[5] कालमूर्त्तिना[6]।।7।।

पादेनास्फालिता येन देवी शकटरूपिणी।
मायां वृक्षद्वयं येन मूलास्फान्मूलितं[7] द्रुतम्।।8।।

1.वक्षे इति ब-द प्रतयोः
2.सर्वालंकानिर्मुक्ता इति ब प्रतौ
3.संस्थितापुरः
4.निर्ज्जिता इति स प्रतौ
5.निर्द्दयं इति अ-ब प्रतयोः
6.कालमृष्टिना इति अ प्रतौ
7.मूलस्फान्मूलितं इति अ प्रतौ

तडागा[1] कृती देवी च धृत्वा पादेषु रासभीम् ।
ताडिता येन चापल्याद्गते ते द्वे च देवते॥9॥

तथाऽश्वगोपती[2] येन निर्जितौ यमसंनिभौ।
ग्रीवाभंगेन वेगेन[3] तौ गतौ यत्प्रतापतः॥10॥

प्रावृट्[4] काले गलत्तोये गोकुलं व्याकुलं महत्।
धृत्वा गोवर्द्धनं येन पर्वतं रक्षितं हि तत्॥11॥

नागशय्यां समारूह्य चापमारोप्य लीलया।
शंखमापूर्य[5] नादेन चालितं येन भूतलम्॥12॥

समुद्धृत्य शिलास्तंभं भुजाभ्यां येन हेलया।
प्राप्ता सद्वस्त्रभूषाद्यैः कृता पूजा महाभटैः॥13॥

कालसर्पं यमाकारं येन निर्जित्य[6] धीमता।
समानीतानि पद्मानि महानागसरोवरात्॥14॥

चूर्णीकृतः क्षणाद्येन मल्लश्चाणूरसंज्ञकः।
यादवानां[7] कुलोद्योतः कारिणा बलधारिणा॥15॥

क्रुद्धेन हरिणा देव हरिणा कुंजरो यथा।
तव जामातृकस्तेन मारितस्तु रणांगणे॥16॥

इत्याकर्ण्य सुतावाक्यं सन्तप्तःकोपवह्निना।
जरासन्धो नृपः पुत्रान् प्राहिणोद्यादवान्[8] प्रति॥17॥

1.तडाणा इति अ प्रतौ, ताडागा इति द प्रतौ

2.गौपती इति ब-द प्रतयोः

3.इति पदं द प्रतौ नास्ति

4.प्राविट् इति ब प्रतौ

5.संखमापूर्य्य इति ब प्रतौ

6.निर्जिता इति ब प्रतौ

7.यावदवानां इति ब-द प्रतयोः

8.प्राहिणोय् इति स प्रतौ

तेऽपि सर्वे पितुर्वाक्यं समासाद्य मदोद्धताः।
गत्वा शौर्यपुरं[1] रुद्धाः भूरिसैन्य[2] समन्विताः॥18॥

स्थिता यावत्तदा शीघ्रं कृष्णपक्षाः भटोत्तमाः।
समुद्रविजयाद्यास्ते दशार्हाः श्रीविभूषिताः॥19॥

अश्वैर्गजै रथैस्तुंगैः पदातिशतसंयुतैः।
सन्नद्धास्ते विनिर्गत्य पत्तनात्सम्मुखं स्थितः॥20॥

परस्परं तयोस्तत्र सैन्ययोरुभयोरभूत्।
महायुद्धं चिरं कालं नानाशास्त्रशतैरपि॥21॥

केचिज्जाताः गतप्राणाः केचित् कण्ठगतां शुकाः।
शूरास्ते शूरतां प्रापुः कातरास्तत्र नष्टताम्॥22॥

ततो घोरे रणे तस्मिन् स कृष्णस्तीक्ष्णशायकैः।
कृत्वा युद्धं महाशूरो जयति स्म स्वशत्रुकान्॥23॥

श्रीमज्जिनेन्द्रपादाब्ज[3] सेवनैकमधुव्रताः।
केचित्सन्यासमासाद्य प्रापुः स्वर्गादिकं बुधाः ॥24॥

केचिद्दुराशयास्तत्र कृत्वार्त्तध्यानरौद्रकम्।
संग्रामे जनसंहारे दुर्गतिं पापतो गताः ॥25॥

तदा चक्रिसुता सर्वे भंगं गत्वा विनिर्ययुः[4]।
यथा सिंहमहानादैः तर्जिताः मत्तकुञ्जराः॥26॥

तान् विलोक्य जरासन्धो मानभंगं गतान् सुतान्।
युद्धार्थं प्रेषयामास स्वपुत्रमपराजितम्॥27॥

1.सौर्यपुरं इति ब प्रतौ

3.भूरिसेन्य इति अ प्रतौ

3.पादाब्जे इति ब प्रतौ

4.विनिर्युयुः इति ब-द प्रतयोः

सोऽपि कोपारुढ़स्तत्र समागत्य सुवेगतः।
शौरीपुरं समावेष्ट्य सर्वसैन्यसमन्वितः॥28॥

समं यादवभूपालैः समुद्रविजयादिभिः।
षट्चत्वारिंशता सार्द्धं युद्धानां च शतत्रयम्॥29॥

कृत्वापि भंगमासाद्य निर्गतश्चापराजितः।
सत्यं पुण्यविहीनानां कुतो लक्ष्मीः कुतो जयः॥30॥

ततो बुधाः प्रकुर्वन्तु पुण्यं श्रीजिनभाषितम्[1]।
पात्रदानं जिनेन्द्रार्चां व्रतं सम्यक्त्वपूर्वकम्॥31॥

पश्चाद् गतेषु ते तस्मिन्नपराजितसंज्ञिके।
निरर्थे स महीनाथः प्रेषयामास सत्वरम्॥32॥

कालादियवनं पुत्रं काललीलाविधायकम्।
पित्रादेशं[2] समासाद्य सोऽपि कोपारूढेक्षणः॥33॥

यादवान् प्रतिसञ्चक्रे प्रस्थानं बहुसैन्यकः।
यदा तदा चरेणाशु तन्मत्वा यादवेश्वराः॥34॥

सर्वे स्वमन्त्रिभिः सार्द्धं मन्त्रं कर्तुं समुद्यताः।
तदा तैर्मन्त्रिभिः प्रोक्तं स्वामिनः श्रूयतामिह॥35॥

बलवद्भिर्विरोधेऽत्र प्रशान्तिर्द्विविधा मता।
तेषामेव गतिर्वोच्चैर्देशत्यागोऽथवा मतः॥36॥

पूर्वो यस्तु प्रतीकारः सोऽस्माकं नाद्य युज्यते।
ततो देशान्तरे यानं सम्प्राप्तं दृश्यते शुभम्॥37॥

1.श्रीजिभाषितं इति ब प्रतौ, श्रीजिनभाषितां इति द प्रतौ

2.पित्रादेसं इति ब प्रतौ

अद्यापि बालकत्वाच्च न समर्थो हरिस्तथा ।
ततः संग्रामकालोऽयं वर्तते नास्य साम्प्रतम् ।38।।

इत्याकर्ण्य वचस्तेषां मन्त्रिणां भाविवेदिनाम्।
समुद्रविजयाद्यास्ते सर्वेऽप्यागमवेदिनः[1]।।39।।

मानसे संविचार्य्याशु मन्त्रिवाक्यं सुनिश्चलम्।
प्रमाणं चक्रिरे सत्यं राजानो मन्त्रिमार्गगाः।।40।।

तदा कृष्णोपि तच्छ्रुत्वा मंत्रिवर्गैः प्रजल्पितम्।
प्रोवाच वचनं तत्र भटकोटिः शिरोमणिः।।41।।

बालकोऽपि समर्थोऽहं मुञ्च मां देव! साम्प्रतम्।
समुद्रविजयाधीशः किं कार्यं भूरिजल्पनैः।।42।।

एकाकीचन्द्रवत् कुर्वे विपक्षतिमिरक्षयम्[2]।
श्रीमत्पादप्रसादेन नैवाहं कार्यबालकः।।43।।

इत्येवं स हरिर्जल्पन् बलान् वा वैरिकुञ्जरम्।
तदा पद्मबलेनोक्तो जिनेन्द्रागमवेदिना।।44।।

सत्यं कृष्णसमर्थोऽसि त्वं सदा शत्रुखण्डने।
त्वत्समोऽत्र त्रिखण्डेषु बली नाद्य परो नरः।।45।।

किन्तु भो श्रूयतां मित्र! मद्वचो हितकारणम्।
अद्य ते शमनं बन्धोः हरेर्वा वैरिमारणम्।।46।।

इत्यादियुक्तितस्तेन बलदेवेन धीमता।
निवार्य स हठात् कृष्णश्चालितो बलवानपि।।47।।

1.सर्वस्यागमवेदिनः इति अ प्रतौ
2.विपक्ष्यतिमिरक्षयम् इति ब प्रतौ

ततः शौर्यपुरं हस्तिनाख्यं च मथुरापुरम्।
त्यक्तास्ते यादवाधीशाः भावितत्त्वविदांवराः॥48॥

पाण्डवाद्यैश्च संयुक्तास्तथा सर्वपरिच्छदैः।
अश्वैर्गजै रथैस्तुंगैः समं सुभटकोटिभिः॥49॥

निर्ययुर्भूरिभाण्डारा नानारत्नादिमण्डिता ।
स्वसैन्यबहुभारेण कम्पिताखिलभूतला ॥50॥

निर्गतेषु तदा तेषु वेगतः कियदन्तरम् ।
तदा यादवभूपानां रक्षार्थं कुलदेवता ॥51॥

मार्गमध्ये ज्वलज्ज्वालाकलापैस्तीव्रपावकम् ।
विधाय यादवादीनां कुलं सर्वं सभूषणम् ॥52॥

कृत्वा ज्वालाशते तस्मिन् पावके निजमायया।
शीघ्रं तथा पुरस्त्रीणां रुदन्तीनां समं ततः॥53॥

धृत्वा रूपाणि कष्टेन महाशोकयुतानि च।
स्वयं तत्र महावृद्धा नारी भूत्वा च सा स्थिता ॥54॥

तदा क्रुद्धो यमो वोच्चैः सकालो यवनो नृपः।
पृष्ठतो यादवेन्द्राणां लग्नस्तत्र समाययौ ॥55॥

हा हा यादवभूपाल! समुद्रविजयप्रभो!
किं जातं ते महाकष्टं सर्वभूपशिरोमणे! ॥56॥

सुधीरक्षोभ भूनाथ! हा हास्तिमितसागर!
हा हिमवन्नराधीश! विजयाचल सुप्रभो! ॥57॥

प्रजासन्धारणे धीर! हा हा धारणपूरण!
अभिनन्दन भूपाल! वसुदेव गुणोज्वल! ॥58॥

अहो पद्म गत छद्मन्! हा हा रे पूतनारिपो!
उग्रसेन महाराज देवसेननराधिपः! ।59॥

महासेन महीनाथ! गुणरत्नाकरक्षिते।
हा हा पाण्डवभूपालाः! पालिताखिलभूतलाः! ॥60॥

किं जातं भवतां कष्टं महाशर्मविधायिनाम्।
भवतः क्वात्र पश्यामो हताशा दुःखिता वयम्॥61॥

इत्यादियादवादीनां नामग्रहणपूर्वकम्।
महाशोकं प्रकुर्वाणा वीक्ष्य ताः पुरपोषिताः॥62॥

चक्रिपुत्रो महैश्वर्यं गत्वा स्थित्वेति पृष्ठवान्।
किं कारणं मृताः केऽत्र प्रज्वलद्वह्निसञ्चये॥63॥

तन्निशम्य तदा देवी वृद्धस्त्रीरूपधारिणी।
तं जगाद जरासन्धे संक्रुद्धे चक्रवर्तिनि ॥64॥

आवीक्ष्य[1] शरणं कञ्चिद्भो सुधीर्यादवेश्वराः[2]!।
पतित्वा पावके चात्र सकुटुम्बाः[3] क्षयं गताः॥65॥

सज्जनाः ये प्रवर्त्तन्ते परोपकृतितत्पराः।
येन केन प्रकारेण[4] परेषां ते हितप्रदाः॥66॥

तत्समाकर्ण्य भूभर्तुः स कालयवनसुतः।
मद्भयाच्छत्रवः सर्वे सत्यं प्रापुर्यमाननम्॥67॥

1.अवीक्ष्य इति अ-द प्रतयोः
2.सुधीयादवेश्वरा इति अ प्रतौ
3.सुढंबाः इति ब प्रतौ
4.केनापि कारेण इति स प्रतौ

इत्येवं मानसे गर्वं प्रकुर्वन् पितुरन्तिकम्।
पश्चाद्गत्वा जगादैवं[1] भो प्रभो सर्वयादवाः! ॥68॥

भवतो भयभीतास्ते कृत्वा वह्निप्रवेशनम्।
कुटुम्बैर्मरणं प्राप्ताः शीघ्रं वा शुष्कपादपाः॥69॥

श्रुत्वा तच्च जरासन्धो महामुग्धो जिनोदिते।
कृत्वानन्दं सुखं तस्थौ परविघ्नो रताः खलाः॥70॥

इतस्ते यादवाधीशाः ससैन्याः सपरिच्छदाः।
गच्छन्तो वारिधेस्तीरं सम्प्रापुः शर्मदायकम्॥71॥

वासुदेवेन सन्दृष्टः कुर्वन्निर्घोषमुच्चकैः।
सागरो निजकल्लोलहस्तैर्वा स्वं समाह्वयन्॥72॥

समागच्छन्तु भो देवाः! भवन्तः पुण्यसाधनाः।
अत्र तिष्ठन्तु मत्तीरे विनयेनेति वाऽब्रुवन्॥73॥

समुद्रविजयाधीशो यादवानां शिरोमणेः।
निदेशेन[2] तदा सैन्यं स्थापितं तत्र भूमिपैः ॥74॥

विस्तीर्णे निर्मले तत्र सतां वा मानसे शुभे।
सागरस्य महातीरे नानावृक्षफलान्विते॥75॥

राज्ञां वस्त्रगृहास्तत्र प्रोत्तुंगा रेजिरे तदा।
पञ्चवर्णगुणोपेताः सत्पताकादिमण्डिताः॥76॥

तेषां मध्ये तु ये शुभ्रास्तेतरां रेजिरे ग्रहाः।
तेषामेव नरेन्द्राणां पुण्यानां राशयो यथा॥77॥

1.जगादेवं इति ब प्रतौ
2.निदेसेन इति अ प्रतौ

तत्तीरे[1] तत्र ते सर्वे समुद्रविजयादयः।
पश्यन्तो दुर्गमं स्थानं वासार्थं सुस्थिता सुखम्।।78।।

गतेषु केषुचित् तत्र दिवसेषु ततोऽन्यदा।
समुद्रविजयाद्यैस्तैर्जैनागमविदांवरैः।।79।।

कृत्वा मन्त्रं हरिः प्रोक्तो विष्णो त्वं पुण्यवांस्तरां।
चित्ते यद्वांच्छसि व्यक्तं तदुच्चैर्भवति ध्रुवम्।।80।।

तस्मात् त्वया सुधीःपुत्र तथात्र क्रियते जवात्।
यथा समुद्रपानीयं शीघ्रं मार्गं ददाति न ।।81।।

तदाकर्ण्य सुधीः कृष्णस्तं नत्वा यादवेश्वरम्।
समुद्रविजयाधीशं तथेति प्रतिपद्य च।।82।।

तत्कर्तुं कार्यमादाय शीघ्रमष्टोपवासकम्।
सुस्थितो दर्भशय्यायां शास्त्रोक्तविधिमन्त्रतः।।83।।

तदा रात्रौ समागत्य सुपुण्यात्तुरंगाकृतिः।
नैगमाख्यः सुरः कोऽपि भक्त्यर्थं माधवं जगौ।।84।।

अहो स्वामिन्! जिनं नत्वा सर्वसम्पद्विधायकम्।
समारूह्य सुधीः[2] पृष्ठे मदीये शर्मदायिनि।।85।।

गच्छन्तस्ते पयोराशौ पुरं द्वादशयोजनम्।
भविष्यति सुपुण्येन तत्समाकर्ण्य माधवः।।86।।

समुत्थाय प्रहर्षेण महाभटशिरोमणिः।
तदा भेरीनिनादेन जयकोलाहलस्वनैः।।87।।

1.तात्तीरे इति स प्रतौ
2.सुधाः इति अ प्रतौ

रत्नपर्याणसंयुक्तं चलच्चामरशोभितम् ।
तं हयं स समारूढो निर्ययौ परया मुदा॥88॥

शोभते स्म हरिस्तत्र दिव्याश्व समधिष्ठितः ।
निर्गच्छन् भूषणोपेतो भाविलक्ष्मी वरोऽथवा॥89॥

तस्मिंस्तुरंग मे तत्र गच्छति स्वस्य लीलया।
सारवादित्र निर्घोषैहरिः पुण्यप्रभावतः॥90॥

महाकल्लोलकोटिभिस्तिरस्कृतजलद्विपे।
छादयत्यपि चन्द्रादीन् सागरे ध्वनिसंयुते[1]॥91॥

द्विधा भागो लसत्तोयं भूरिभारोऽभवत्तदा।
तत्र तेषां महामार्गः सञ्जातः सुकृतोदयात्॥92॥

दिव्याश्वः स तदागच्छत्तस्मिन्मार्गे निजेच्छया।
शुद्धभूमौ यथा सौख्यं गम्यते सकलैर्जनैः॥93॥

तस्यानुमार्गतस्तत्र चचाल सकलं बलम्।
परमानन्दसम्पन्नं निराबाधं लसद्युतिम्॥94॥

तदैव भावितीर्थेशः श्रीमन्नेमिजिनेशिनः।
पुण्यप्रभावतस्तत्र कृष्णस्यापि शुभोदयात्॥95॥

सौधर्माधिपतिर्ज्ञात्वा निजैश्चिह्नैर्जगद्धितम्।
जिनेन्द्रागमनं पूतं सञ्जगौ धनदं मुदा॥96॥

अहो कुबेर यक्षेश![2] श्रृणु त्वं पुण्यकारणम् ।
जम्बूद्वीपे पवित्रेऽत्र क्षेत्रे भरतसंज्ञके॥97॥

नानासत्सम्पदोपेते सागरे चलद्यौ तथा।
समुद्रविजयाधीशो हरिवंशशिरोमणिः॥98॥

1.ध्वनिसंयुतं इति स प्रतौ

2.यक्षेस इति अ प्रतौ

दाता भोक्ता विचारज्ञो वर्त्तते सपरिच्छदः[1]।
तस्य देवी महासाध्वी शिवदेवीति विश्रुता॥99॥

रूपसौभाग्यसंयुक्ता पूर्वपुण्यविराजिता।
ज्ञानविज्ञानसम्पन्ना सा सती वा सरस्वती॥100॥

तस्याः गर्भे जगत्स्वामी षण्मासेषु गतेषु च।
भावितीर्थंकरो देवो जयन्तादागमिष्यति॥101॥

विमानादहमिंद्रो वै जगदानन्ददायकः।
ततस्त्वं[2] याहि वेगेन सागरे श्रीकृतादरे॥102॥

तयोश्च भुवनैश्वर्य[3]कारिणीं भव्यधारिणीम्।
सत्पुरी कुरुतो भव्यः जगत्तापनिवारिणीम्॥103॥

शक्रादेशमिति श्रुत्वा विधाय करकुड्मलम्।
एवमस्तीति[4] सम्प्रोच्य[5] कुबेरो मण्डितः सुरैः॥104॥

समागत्य पयो राशौ रत्नैर्बद्ध्वा महीतलम्।
आदर्शस्य तलं वोच्चैर्विस्तीर्णं[6] चाति निर्मलम्॥105॥

सहस्रशिखरोपेतं पूर्वं कृत्वा जिनालयम्।
हेमरत्नमयं तुंगं ध्वजाद्यैः प्रविराजितम्॥106॥

भव्यानां चिच्चमत्कारं कारकं भव्यहारकम्।
जिनेन्द्रप्रतिमोपेतं कारणं स्वर्गमोक्षयोः ॥107॥

1.सपरिछदिः इति स प्रतौ
2.ततः स्त्वं इति ब प्रतौ
3.भुवनाश्चर्य इति स प्रतौ, भुवनौश्वर्य इति स प्रतौ
4.एवमस्त्विति इति अ-द प्रतयोः
5.संप्रोक्त्वा इति पाठः ब प्रतौ
6.तोस्चै विस्तीर्णं इति ब प्रतौ

ततो द्वारवतीं नाम पुरीं परमपावनीम्[1]।
चकार परमानन्दात् सुधीर्द्वादशयोजनाम्॥108॥

यां पुरीं कृतवान् भव्यः कुबेरो जिनभक्तिभाक्।
सा कथं वर्ण्यते भव्या मया भो तुच्छमेधसा! ॥109॥

वप्रप्राकारखाताभिर्गोपुरै[2] रत्नतोरणैः।
या पुरी हसति स्मोच्चैः पुरन्दरपुरीमिव॥110॥

यस्याः पुर्याश्चतुर्दिक्षुः सरो वापीवनादिषु।
देवाः देव्यः समागत्य क्रीडन्ति स्म निरन्तरम्॥111॥

प्रोत्तुंगाः पादपाः यत्र रेजिरे सुमनोहराः ।
नानाफलशतैर्नम्राः[3] कल्पवृक्षातिशायिनः॥112॥

पद्माकराः[4] विभान्ति स्म स्वच्छतोयाः जलाशयाः।
यत्र तत्रस्थभव्यानां पुण्यनामकरा यथा॥113॥

तस्यां मध्ये विधायोच्चैः प्रोत्तुंगं राजमन्दिरम्।
नानारत्नसुवर्णाद्यैर्मणिमुक्ताफलादिभिः॥114॥

राजधानीं समारभ्य प्रोत्तुंगग्रहपंक्तयः।
सप्तसप्तमहीयुक्ताः स्र्वणरत्नैर्विनिर्मिताः॥115॥

पंचवर्णध्वजव्रातैर्विलसद्रत्नतोरणैः।
जनानां पुण्यपाकेन देवादीनाह्वयन्ति वा॥116॥

रत्नानां प्रांगणेषूच्चैर्यत्र पंकस्तु कौंकुमः।
धूलिः कर्पूरः जानीरन् चन्द्रकान्तिशिलोद्भवम्॥117॥

1.पावनाम् इति स-द प्रतयोः

2.वप्रप्रकार इति ब प्रतौ

3.नाम्राः इति स प्रतौ

4.पद्माकारा इति ब प्रतौ

यत्रापणास्तु भव्यानां सम्भृतास्ते सदैव च।
कर्पूरागुरुकाश्मीरः[1] चन्दनादिसुवस्तुभिः॥118॥

पट्टकूलादिभिर्दिव्यमणिमुक्ताफलादिभिः।
जनानां रञ्जयन्ति स्म निधानानीव मानसम्॥119॥

नाना चतुःपथैः रम्यैः सारवस्तुसमन्वितैः।
या भवत्सर्वसौख्यानां खनिर्वा पुण्यदेहिनाम्॥120॥

इत्यादिभिर्धनैर्धान्यैः सज्जनैश्चित्तरञ्जनैः।
श्रीमज्जिनेन्द्रचन्द्रोक्तधर्मकर्माणि तत्परैः॥121॥

वस्त्राभरणसन्दोहैः स्वशीलादि[2]गुणोन्नतैः।
नारीजनैर्जगच्चेतो हारिभिर्याति शोभिता॥122॥

तां पुरीं परमानन्ददायिनीं यादवेश्वरः।
समुद्रविजयाधीशः सम्प्रविश्य जयस्वनैः॥123॥

सद्धटैर्भ्रातृभिः सार्द्धं महावादित्र सद्रवैः।
निश्छद्मसद्मपद्माख्यबलदेवेन धीमता॥124॥

कृष्णेन संयुतः सर्वः शत्रुसन्दोहहारिणा ।
अन्यैश्च यादवाधीशैर्मण्डितः स्वपरिच्छदैः॥125॥

सुखेन सुस्थितो यावत्पूर्वपुण्यप्रसादतः।
भुञ्जन् भोगान् मनोऽभीष्टान् परमानन्दनिर्भरः॥126॥

तावत्तस्यैव भूपस्य समुद्रविजयप्रभोः ।
चारु काश्यपगोत्रस्य हरिवंशशिरोमणेः॥127॥

1.कास्मीर इति ब प्रतौ
2.स्वलीलादि इति अ प्रतौ

राज्ञी सारगुणोपेता शिवदेवीति विश्रुता।
सा सती तेन यक्षेण कुबेरेण सुभक्तितः॥128॥

रत्नवृष्ट्यादिभिर्नित्यं पूजिता परमादरात्।
या भावी तीर्थकृन्माता सा सती कैर्न पूज्यते॥129॥

पतन्ती प्रांगणे तस्या रत्नानां वृष्टिराबभौ।
भाविपुत्रस्य पुण्यानां वृष्टिर्वा शर्मकारिणी॥130॥

तथा श्री ह्री धृतिः कीर्तिर्बुद्धिर्लक्ष्मीर्मनोहरा।
एताभिः सारदेवीभिरन्याभिश्च सुभक्तिः॥131।

गर्भशोधनकर्मादिनियोगेन यथागमम्।
सेविता परया प्रीत्या सा तदा जगदम्बिका॥132॥

एवं सा शिवादेवी[1] वै सुरस्त्रीवृन्दसेविता।
षण्मासा वासितो शुक्ले कार्त्तिके मासि पक्षके॥133॥

उत्तराषाढनक्षत्रे षष्ठीरात्रौ गुणोज्वला।
रत्नहर्म्ये सुखं सुप्ता पल्यं के मणिमंडिते॥134॥

निशान्ते षोडशस्वप्नान् पृथग्भूतान् व्यलोकतः[2]।
अनुक्रमेण तानुच्चैर्वक्ष्येऽहं श्रृणुतोत्तमा॥135॥

पूर्वं मे रावणो हस्ती समागच्छन् स्वसन्मुखम्।
शुभ्रः कैलाशश्रृंगो वा विगलन्मदः[3] निर्झरः[4]॥136॥

द्वितीये तु तया दृष्टः स्वप्ने वृषभसत्तमः।
श्रृंगाग्रभिन्नभूभागः कुर्वन्नादं मनोहरम्॥137॥

1.शिवदेवी इति ब-स-द प्रतीनाम्

2.विलोकतः इति ब प्रतौ , व्यलोलोकत इति स प्रतौ

3.विगल्मदः इति अ प्रतौ

4.निर्ज्जरः इति स प्रतौ

कण्ठी रवो महाव्योम्नि प्रोच्छलद्विमलद्युतिः।
निर्घोषेण समायुक्तः शुभ्रो[1] वाऽसौ घनाघनः ॥138॥

सुवर्णकलशैः सारतोयपूर्णैः सुनिर्मलैः।
कुर्वन्ती वीक्षिता लक्ष्मीः स्नानं लीलासमन्विता॥139॥

कल्पवृक्षोद्भवं दिव्यं पुष्पदामद्वयं शुभम्।
लम्बमानं नभो भागे सुगन्धैर्भ्रमरैः श्रितम्॥140॥

पूर्णचन्द्रः कलारुद्धं स्वकान्त्या भुवनोत्तमः।
द्योतयन्निखिलं लोकं सुपुत्रो वा जगद्धितः॥141॥

भास्करो भासयन् विश्वं सहस्रकिरणैः शुभैः।
मिथ्यातमो हरन्तूच्चैर्जैनवादीव निर्मलः॥142॥

मत्स्ययुग्मं जले स्वच्छे स्वेच्छया विलसन्मुदा।
दृष्टं तया महादेव्या सुखेन स्थितमुत्तमम्॥143॥

पूर्णकुम्भद्वयं चारुचर्चितं चन्दनादिभिः।
मुखे पद्मसमायुक्तं न निधानं वा गृहागतम्॥144॥

विस्तीर्णः स्वच्छपानीयः सम्भृतःकमलाकरः।
कः सरो निर्मलो गाढं सतां वैमानसोपमम्॥145॥

सागरो विलसद्रत्नैः[2] संयुतो घोषमण्डितः।
निराकुर्वन्मलम्भूरि कल्लोलैर्वा मुनीश्वरः॥146॥

महाहाटकनिर्माणं साररत्नैर्विराजितम्।
सिंहासनं समुत्तुंगं मेरोर्वा श्रृंगमुत्तमम्॥147॥

1.शुभ्रोभो इति स प्रतौ
2.विमल सद्रत्नैः इति अ प्रतौ

देवेन्द्रस्य महादिव्यविमानं रत्नभासुरम्।
मुक्तामालादिभिर्युक्तं देवदेवीविराजितम्।।148।।

फणीन्द्रभवनं चारु भुवं भित्वा विनिर्गतम्।
धरणेन्द्रादिभिर्युक्तं समागच्छदि[1]होन्नतम्।।149।।

पञ्चप्रकाररत्नानां राशिसारशिखोज्वलः।
तेजसा द्योतयन् गाढं दिशा नारी मुखाम्बुजम्।।150।।

अग्निर्ज्वाला शतोपेतः प्रज्वलन् प्रविलोकतः।
भाविपुत्रप्रतापो वा कर्मारातिनिवर्हणः।।151।।

ततस्तया महादेव्या दृष्ट्वा स्वप्नांश्च षोडश।
पश्चान्निजं मुखाम्भोजं प्रविशन् वीक्षितो गजः।।152।।

तदैवासौ पुरा प्रोक्तो जयन्ताख्यविमानतः।
अहमिन्द्रः समागत्य गजरूपेण निर्मलः।।153।।

तस्याः गर्भे शुचौ मातुः सुधीः कमलकोमले।
निराबाधं स्थितःस्वामी त्रैलोक्यानुग्रहक्षमः।।154।।

प्रातःकाले तदा माता वन्दिवृन्दजयस्वनैः।
प्राभातिकमहाभेरी निनादेन प्रबोधिता।।155।।

प्रमोदेन समुत्थाय मंगलस्नानपूर्वकम्।
शिवदेवी समादाय दिव्यवस्त्रादिभूषणम्।।156।।

कुंकुमगुरुकर्पूरपुष्पमालादिशोभिता।
छत्रचामरदासीभिर्मण्डिता परया मुदा।।157।।

नृपं सिंहासनारूढं सेव्यमानं परैर्नृपैः।
गत्वा कृत्वा नतिं चारु विकसन्मुखपंकजाः ।।158।।

1.समागछहि इति अ प्रतौ

पत्युराज्ञां समासाद्य स्थित्वा चार्द्धासने सती।
ये स्वप्नान् वीक्षिताःपूर्वं तान् क्रमाद्भूपतिं जगौ।।159।।

भो स्वामिन्! पश्चिमे भागे निशायाः वीक्षिता मया।
एते स्वप्नाः फलं चैषां निरूपय विशिष्टधीः ।।160।।

इत्याकर्ण्य प्रभुः प्राह समुद्रविजयो महान्।
श्रुतागमः[1] सुधीश्चित्ते संविचार्य प्रिये! श्रृणु।।161।।

गजेन्द्रदर्शनात्पुत्रो भविष्यति तवोत्तमः।
सुधीस्तीर्थकरो देवो देवदेवेन्द्रवन्दितः।।162।।

गोपतेर्दर्शनात्पुत्रो जगज्ज्येष्ठो जगद्गुरूः।
इन्द्रनागेन्द्रचन्द्रार्कसमर्चितः पदद्वयः।।163।।

सिंहेन वीक्षितेनोच्चैः[2] सुतस्तेऽनन्तवीर्यभाक् ।
बलेन यत्समः कोऽपि न भूतो न भविष्यति।।164।।

लक्ष्मीदर्शनतो विद्धि स स्वामी महिमास्पदः ।
जातमात्रोऽपि सन्मेरौ स्नाप्यते[3] सुरसत्तमैः।।165।।

पुष्पदा मद्वयेनात्र धर्मतीर्थप्रकाशने।
शुभ्रकीर्तिमहावल्ली विस्तारं तस्य यास्यति।।166।।

पूर्णचन्द्रस्त्वया दृष्टस्तत्फलेन शुभानने।
चन्द्रवज्जगदाह्लादी सुतस्ते तापनाशकः।।167।।

भास्करस्योदयादत्र सूर्यकोटिप्रभाधिकः।
स भावी भावितीर्थेशो जनानां लोचनप्रियः।।168।।

1.सुतागमः इति अ प्रतौ, श्रुत्वागमःइति द प्रतौ
2.वीक्षितोन्नोच्चैः इति स प्रतौ
3.स्नापते इति स प्रतौ

मीनयुग्मं जले क्रीडां सुखं कुर्वद्विलोकितम्।
यत्तत्सनन्दनो नित्यं सत्यं सत्सौख्यभाजनम्।।169।।

पूर्णकुम्भद्वयेनोच्चैस्त्वया दृष्टेन निश्चितम्।
निधानाधीश्वरः सोऽपि भविष्यति सुतस्तव।।170।।

पद्माकरेण ते पुत्रे पवित्रेष्टशतं ध्रुवम्।
लक्षणानि शतान्युच्चैर्व्यजनानि नवप्रिये।।171।।

महाकल्लोलसंयुक्तः समुद्रस्य विलोकनात्।
पुत्रस्ते केवलज्ञानी लोकालोकप्रकाशकः।।172।।

सिंहासनेन ते स्वप्ने वीक्षितेन भवेद् ध्रुवम्।
सुतस्त्रैलोक्यसाम्राज्यं लक्ष्मीभोक्ता जगाद्धितः।।173।।

स्वविमानेन[1] नाकाग्रादागमी स गुणाकरः।
रूपसौभाग्यसत्पुण्यपण्यरञ्जितसत्सुरः।।174।।

नागलोके क्षणादेव गर्भस्थोऽपि तवात्मजः।
त्रिज्ञानलोचनोपेतस्त्रिलोकैकशिखामणिः।।175।।

रत्नानां राशितो नित्यं स स्वामी ते तनूद्भवः[2]।
पवित्रगुणरत्नानां साररत्नाकरः स्थिरः[3]।।176।।

वह्नेः सन्दर्शनात् सोऽपि तपोध्यानहुताशने।
दग्ध्वाष्टकर्मकाष्ठानि मुक्तिगामी भविष्यति।।177।।

मुखाब्जं प्रविशन् दृष्टो यस्त्वयोच्चैर्गजः प्रिये।
सोऽहमिन्द्रः समागत्य स्वर्गाग्राग्त्ते[4] शुभोदयात्।।178।।

1.स्वरविमानेन इति अ प्रतौ

2.तनूद्भवः इति ब-द प्रतयोः

3.स्थितिः इति ब प्रतौ

4.स्वग्राग्राते इति अ-स प्रतयोः

तदैव सुस्थितो गर्भे कोमले निर्मले शुभे।
इत्याकर्ण्य प्रभोर्वाक्यं सा सन्तोषमगात्तराम्॥179॥

तदैवागत्य देवेन्द्रः स्वस्वचिह्नैः सुभक्तितः।
रत्नसिंहासने तत्र समारोप्य महोत्सवैः ॥180॥

समुद्रविजयाधीशं शिवदेवीसमन्वितम्।
तीर्थतोयभृतैः कुम्भैर्हेमरत्नविनिर्मितैः॥181॥

देवैश्चतुर्विधैः सार्द्धं खेचरैर्भूचरैरपि।
गीतसंगीतवादित्रैः सुरस्त्रीभिः समन्विता॥182॥

महाभक्त्या विधायोच्चैरभिषेकं तयोर्द्वयोः।
वस्त्राभरणसन्दोहैः सम्पूज्य पितरौ प्रभोः॥183॥

त्वं त्रैलोक्यपितुर्देव पिता परमपावनः।
विशुद्धं गुणरत्नानां सागरो भो नरेश्वर! ॥184॥

त्वत्समो न प्रभुः कोऽपि लोकेऽस्मिन् भो प्रजापते! ।
यत्सुतो भावितीर्थेशो जगत्त्रयगुरुर्महान्॥185॥

यथा मेरुश्च सर्वेषु पर्वतेषु महानहो ।
सागरेषु यथा क्षीरसागरो महिमास्पदः॥186॥

तथा त्वं देवभूपालो समुद्रविजयप्रभो।
सर्वक्षत्रियभूपानां[1] प्रसिद्धस्तिलकोपमम्॥187॥

त्वं मातस्त्रिजगन्माता शिवदेवी[2] जगद्धिता ।
यस्याः पुत्रो जिनो भावी संसाराम्भोधितारकः॥188॥

1.सर्वक्षित्रियभूपानां इति ब प्रतौ
2.शेवदेवी इति अ प्रतौ

यथा मुक्ताफलोत्पत्तिर्भवेच्छुक्तौ सुनिश्चयात्।
तथा तीर्थकरोत्पत्तिस्तव कुक्षौ शुभानने॥189॥

इति स्तुत्वा शुभैः स्तोत्रैः स नृत्यैस्तौ प्रणम्य च।
गर्भावतारकल्पाणामेवं कृत्वा जिनेशिनः॥190॥

महापुण्यं समासाद्य परमानन्दनिर्भरा।
सर्वे ते न किनाथाद्या: स्वं स्वं स्थानमुपागमन्[1] ॥191॥

पुनस्तदा कुबेरोऽसौ मासान्नव निरन्तरम्।
रत्नवृष्टिं जगत्तुष्टिं चक्रे तत्प्रांगणे शुभे॥192॥

तथा शक्राज्ञया देव्यः सर्वाभरणभूषिताः।
तां देवीं शिवदेव्याख्यां[2] जगन्मातरमुत्तमाम्॥193॥

तां भजन्ते स्म चात्यन्तप्रीत्या स्वैः स्वैर्नियोगकैः।
काश्चित्स्नानं महादेव्याः कारयन्ति स्म सज्जलैः॥194॥

पादप्रक्षालनं काश्चित् कुर्वन्ति स्म सुभक्तितः।
ददति[3] स्म विचित्राणि[4] काश्चिद् वस्त्राणि यत्नतः॥195॥

काश्चित् सुगन्धकर्पूरचन्दनागुरु[5] कुंकुमैः।
तस्याः विलेपनं चक्रुर्मातुर्गात्रे मनोहरे॥196॥

काश्चिच्छृंगारयन्ति स्म हेममाणिक्यभूषणैः।
भोजनादौ च तां देवीं सेवते स्म सुभक्तितः॥197॥

काश्चित् सुरांगनास्तस्यै नाना ताम्बूलमुत्तमम्।
ददाति स्म जिनेन्द्रस्य मात्रे प्रीत्या मनोहरम्॥198॥

1.स्थानमुपागमात् इति ब-द प्रतयोः

2.शिवदेव्याव्यां इति द प्रतौ

3.ददाति इति अ प्रतौ

4.विचात्राणि इति ब प्रतौ

5.चंदनादि गुरू इति ब प्रतौ

काश्चिद्देव्यो महाशय्या रत्नासननियोगिकाः।
अभिप्रायं विजानानाः सम्भजन्ते स्म तां सतीम्॥199॥

दर्शयन्ति स्म चादर्शं काश्चिच्चामरधारिकाः।
दिव्यात् पत्रधारिण्यस्तां भजन्ति स्म देवताः॥200॥

क्वचिद्दिव्यकथावार्ता विनोदैस्तां शुभोदयाम्।
रञ्जयन्ति स्म सद्भक्त्या परमानन्दनिर्भराम्॥201॥

एवं सुरांगनां नित्यं शिवदेवीं लसद्द्युतिम्।
सत्प्रीत्याऽऽराधयन्ति स्म गुणरत्नाकरक्षितिम्॥202॥

तस्मिन् गर्भे स्थिते मातुर्वेदना कापि नाऽभवत्।
रत्नादर्शे यथा रूपे विशुद्धे प्रतिबिम्बिते॥203॥

आकाशस्फाटिके गेहे कर्पूरपरिपूरिते।
मातुर्गर्भे सुखं सोऽपि सुस्थितो मणिवत्तदा॥204॥

ज्ञानात्त्रितयः[1] तेजस्को विशुद्धमहिमाकरः।
पावनैकमहामूर्तिस्तीर्थकृन्नाम भावतः[2]॥205॥

इत्यादिसुखतस्तस्याः शिवदेव्याः सुपुण्यतः।
सम्पूर्णनवमासास्ते स्थिते गर्भे जिनेशिनि॥206॥

(शार्दूलविक्रीडित)

यस्योच्चैः सुरनायकाः सुरवरैः सम्भूय सार्द्धं मुदा।
नानारत्नसुवर्णवृष्टिभिरलं गर्भावतारे शुभे।
संस्नाप्यामृतवारिभिश्च पितरौ सम्पूजयन्ति स्म वै।
सद्वस्त्राभरणादिभिः सः नितरां नेमीश्वरो वोवतात्॥207॥

इति त्रिभुवनैकचूड़ामणिश्रीनेमिजिनपुराणे भट्टारकश्रीमल्लिभूषणशिष्याचार्य श्रीसिंहनन्दिनामांकिते ब्रह्मनेमिदत्तविरचिते स्वामिनो गर्भावतारप्रथमकल्याणकव्यावर्णनो नामषष्ठोऽधिकारः ॥

1.ज्ञानत्त्रितय इति अ प्रतौ

2.भावनाः इति स प्रतौ

सप्तमोऽधिकारः

अथ श्री श्रावणे मासे[1] शुक्लपक्षे[2] मनोहरे।
षष्ठिदिने शुभे चित्रानक्षत्रेण विराजिते ।।1।।

ज्ञानत्रितयसंपन्नः शिवदेव्याः शिवप्रदः ।
स स्वामी जनितो मात्रा परमानन्ददायकः।।2।।

शुद्धरत्नाकरक्षोणी यथा रत्नं मनोहरम्।
तथा सा सूत तं पुत्रं पवित्रं सुगुणाकरम्।।3।।

कवेर्मतिर्यथा काव्यं सर्वलक्षणसंयुतम्।
तथा स उत्पादयामास तं सुतं लक्षणैर्युतम्।।4।।

लक्षणैर्व्यंजनैर्गात्रं प्रभोस्तस्य विराजितम्।
पुष्पैर्वा पूजितं भक्त्या देवेन्द्राद्यैर्मनोहरम्।।5।।

आकस्मिकस्तदानन्दः सञ्जातो भुवनत्रये।
भव्यानां जनयन् सौख्यं कविवाचामगोचरम्।।6।।

आसनानि सुरेन्द्राणां कम्पितानि तदा क्षणे।
तीर्थकृन्नामसत्पुण्यवायुना शर्मदायिना।।7।।

सूचयन्ति स्म वा तेषां युष्माकं नैव युज्यते।
उच्चैःस्थातुं स्थिते भूमौ जिने त्रैलोक्यनायके।।8।।

नमन्ति स्म किरीटानि[3] स्वयं तेषां सुधाशिनां ।
कथयन्ति स्म वा यानं जिनेन्द्रभवनं प्रति।।9।।

सर्वाः दिशस्तदाभूवन् विशुद्धाः शर्मदायिकाः।
जिनेन्द्रजन्मनः काले भव्यानां वा प्रवृत्तयः।।10।।

1.मासि इति स प्रतौ
2.पष्पे इति अ प्रतौ.
3.तिरीटानि इति ब-द प्रतयोः

स्वर्गस्थाः कल्पवृक्षाश्च कुसुमानि स्वयं तदा।
किरन्ति स्म प्रभोर्वोच्चैः समुत्पत्तेः प्रहर्षतः।।11।।

नाकिलोके महाघंटाटंकारः समजायत।
जिनेन्द्रजन्मकल्याणं त्रिलोक्यां वा प्रघोषयन्।।12।।

ज्योतिष्काणां च गेहेषु सिंहनादोऽभवत्तराम्।
अकस्मात्स्वामिनो जन्म नाकिनां सोऽपि सूचयन्।।13।।

व्यन्तराणां गृहेषूच्चैः पट्टहध्वनिराययौ।
बोधयन् वा निजेन्द्रादीन् जिनेन्द्रोत्पत्तिमुत्तमम्[1]।।14।।

नागालयेषु सन्नद्धो निर्गतः शंखसम्भवः।
सम्ब्रुवन् वा फणीन्द्राणां कारणं तज्जगद्धितम्।।15।।

इत्येवं सर्वदेवेन्द्राः सामराः साप्सरोगणाः[2]।
स्वैः स्वैश्चिह्नैस्तदा ज्ञात्वा जन्म श्रीमज्जिनेशिनः।।16।।

जय त्वं देव नन्देति परमानन्दनिर्भराः।
परोक्षे तं प्रणम्योच्चैरत्रायातुं कृतोद्यमाः।।17।।

शक्राज्ञया तदा यक्षःकुबेरः कृतवान् कृती।
ऐरावतं गजं सज्जं विकसन्मुखपंकजम्।।18।।

कीदृशः स गजश्चेति वक्ष्ये संक्षेपतोऽप्यहम्।
तत्स्वरूपं मुनिप्रोक्तं श्रृण्वन्तु सुधियो जनाः ।।19।।

महामानो महाध्वानो महायानो महाकरः।
शुभ्रं शैलोपमस्तुंगः[3] पर्यटन्निजलीलया।।20।।

महानादं प्रकुर्वाणो महाघंटायुगान्वितः।
लक्षयोजनमानोऽसौ तर्जयन् वा घनाघनम्।।21।।

1.जिनेन्द्रोत्पत्तिमुत्तमाम् इति स-द प्रतयोः

2.साभरोगणाः

3.शैलोपमः स्तुगः इति ब प्रतौ

द्वात्रिंशद्वदनोपेतो[1] वक्रे वक्रे रदाष्टकम्।
दन्ते दन्ते सरः पूर्णं स्वच्छतोयैर्मनोहरम्।।22।।

सरोवरं प्रति प्राह रे! कामे काञ्चपद्मनिभम्।
ज्ञानिनो मुनयो धीराः जैनागमविदां वराः।।23।।

एकैकस्यां च पद्मिन्यां पद्मा द्वात्रिंशदुत्तमा।
द्वात्रिंशत् स्फारपत्राणि पद्मं पद्मं प्रतिध्रुवम्।।24।।

पत्रे पत्रे च नृत्यन्ती सम्बभौ सुरनर्त्तकी।
एकैका हावभावाद्यासविलासा सविभ्रमा।।25।।

मोहयन्ती सुरेन्द्राणां मानसं पश्यतामपि।
श्रीमज्जिनेन्द्रचन्द्रस्य महाभक्तिपरायणा।।26।।

एवमैरावतो नाग: प्रोल्लसद्रत्नकक्षया ।
राजते स्म यथा मेघ: शारदस्ताडितान्वित: ।।27।।

स्वर्णपर्याणकोपेतश्चामराद्यैरलंकृतः।
क्षुद्रघण्टाशतैर्युक्तो मोहयन् जगतां मनः।।28।।

सौधर्मेन्द्रस्तमारूढो देवदेव्यादिमण्डितः।
वितान[2]चामरछत्रैर्विचित्रैः प्रविराजितः।।29।।

तथा नागेन्द्रचन्द्रार्कव्यन्तरेन्द्रादयः सुराः।
अश्वैर्गजैर्विमानैश्च मयूरैः कीरकादिभिः।।30।।

स्वैः स्वैः सुवाहनैस्तुंगैः समागत्य मनःप्रियैः।
सर्वे सम्भूय देवेन्द्राः सौधर्मेन्द्रपुरस्सराः।।31।।

तालकंसालभेर्यादिमहावादित्रकोटिभिः।
पुष्पवृष्टिं प्रकुर्वन्ति[3] परमानन्दनिर्भराः।।32।।

1.द्वात्रिसत् इति अ प्रतौ. द्वात्रिंशन् इति द प्रतौ
2.वित्रान इति द प्रतौ
3.प्रकुर्वंतः इति स प्रतौ

गीतनृत्यविनोदैश्च[1] जयकोलाहलस्वनैः।
महास्तौत्रैर्जगत्सर्वं कुर्वद्भिः शब्दसम्भृतम्[2]।।33।।

चतुर्निकायदेवोघैः सुरस्त्रीणां च कोटिभिः।
पुरीं द्वारावतीं प्राप्य त्रिःपरीत्यलसद्ध्वजाम्[3] ।।34।।

तां समावेष्ट्य सर्वत्र सुस्थिताः सुरसैन्यकाः ।
सौधर्मेन्द्रस्तदा रुद्रैः देवेन्द्राद्यैः समन्वितः।।35।।

नृपाल यं प्रविश्योच्चैर्विलसद्रत्नतोरणम्।
प्रांगणे शिवदेव्याश्च जयकोलाहलस्वनैः।।36।।

स्थित्वा शचीं महादेवीं शिवदेवीनिकेतनम्।
प्रेषयामास सा तत्र परमानन्दसंयुता।।37।।

गत्वा सूतिगृहस्यान्तं विलोक्य जिनमातरम्।
स पुत्रां शिवदेवीं तां कल्पवल्लीमिवोज्जवलाम्।।38।।

त्वं मातस्त्रिजगत्स्वामिमाता त्रैलोक्यपूजिता।
सर्वस्त्रीसृष्टिसन्दोहमण्डनैकललामिका[4] ।।39।।

यथा रत्नसमुत्पत्तेः कारणं सुखनिर्मिता।
तथा श्रीजिनरत्नस्य खनिस्त्वं त्रिजगद्धिता।।40।।

त्वं सती त्रिजगत्पूता त्वं सौभाग्यवती[5] सदा।
यस्याः कुक्षौ समुत्पन्नः पुत्रस्त्रैलोक्यभूषणम्।।41।।

इति स्तुत्वा च तां देवीं प्रणम्य परया मुदा।
सुखनिद्रां विधायोच्चैर्मायाबालं समर्प्य च।।42।।

1.गीतिर्वाद इति स प्रतौ
2.सब्दसंभृतं इति ब प्रतौ
3.परित्याल इति स प्रतौ
4.लमालिका इति स प्रतौ
5.सौभाग्यती इति अ प्रतौ

तस्यास्तं बालकं दिव्यं जिनत्रैलोक्यनायकम्।
सञ्जग्राह कराभ्यां सा विकसन्मुखपंकजम्।।43।।

स्वामिनः स्पर्शमात्रेण सा शची प्रीतिनिर्भरा।
सन्तोषं कमपि प्राप कविवाचामगोचरम्।।44।।

तं समानीय दिव्यांगं प्रसूतिगृहतो मुदा।
करे समर्पयामास स्वभर्तुर्बालकं जिनम्।।45।।

शक्रः सोऽपि समालोक्य तं जिनं जगदुत्तमम्।
प्रणम्योच्चैर्महाभक्त्या जयदेवेति घोषणैः।।46।।

स्तुत्वादाय कराब्जाभ्यां निधानमिव निर्मलम्।
निजांके स्थापयामास कोमले कमलाकरम्।।47।।

ईशानेन्द्रस्तदा छत्रं दिव्यं चन्द्रमिवोज्वलम्।
मस्तके जिननाथस्य धृतवान् भक्तितत्परः।।48।।

सनत्कुमारमाहेन्द्रसुरेन्द्रौ चामरान्वितौ।
सेवां सञ्चक्रतुर्देवे परमानन्दनिर्भरौ।।49।।

सर्वे देवाः परे चापि सर्वाः देवांगनाः मुदाः।
स्वं स्वं नियोगमासाद्य सेवन्ते स्म प्रभुं तथा।।50।।

तदा प्रथमनाकेशो जयकोलाहलस्वनैः ।
मेरुप्रस्थानमुद्दिश्य[1] हस्तसंज्ञां चकार च।।51।।

ततो गिरीन्द्रवत्तुंगो मातंगो महिमाकरः ।
पादांगुष्टेन शक्रेण प्रेरितः सञ्चचाल सः।।52।।

महावादित्रनिर्घोषैः जय नन्देति जल्पनैः।
देवांगना महानन्दगीतध्वनि[2] समन्वितैः।।53।।

1.मेरूप्रस्थानमुद्दिस्थ इति ब प्रतौ
2.गीतवादिध्वनि इति स प्रतौ

केचिद्गायन्ति नृत्यन्ति जल्पन्ति[1] स्म नभोङ्गणे।
केचित्सुराः प्रमोदेन प्रोज्वलन्ति स्म सम्भ्रमात् ।।54।।

केचिद्यशो जिनेन्द्रस्य चन्द्रकान्तिवदुज्वलं।
वर्णयन्ति स्म सन्तोषात् पठन्ति स्म स्तुतिं परे।।55।।

सत्यं देवगतेः प्राप्तं फलमस्माभिरुत्तमम्[2] ।
यत्प्रत्यक्षं भवान् दृष्टो नेत्राभ्यां भो जिनेश्वर ।।56।।

इति प्रीत्या वदन्ति स्म व्योममार्गे[3] सुधाशिनः।
तदग्रे परमानन्दान्निधाने वा करागते।।57।।

स्वभुजास्फालनं केचित्कुर्वन्ति स्म तदा क्षणे।
पुष्पवृष्टिं सुरा केचित्तन्वन्ति स्म समं ततः।।58।।

एवं तं श्रीजिनं नीत्वा सौधर्म्मेन्द्रः सुभक्तिभाक्।
सर्वदेवेन्द्रनागेन्द्रचन्द्रार्काद्यैः परिष्कृतः।।59।।

कुबेरनिर्मितं त्रेधा मणिसोपानं मार्गतः
ज्योतिर्लोकं[4] समुल्लंघ्य ततो नाम्ना सुदर्शनम्।।60।।

मेरुं प्रदक्षिणीकृत्य तस्योच्चैः पाण्डुके वने।
नानाद्रुमशताकीर्णे प्रसूनफलशोभिते ।।61।।

चतुर्दिक्षु जिनेन्द्राणां हेमप्रासादसंयुते।
तत्रेशानदिशाभागे पाण्डुकाख्यशिला शुभा।।62।।

अर्द्धचन्द्रसमाकारा स्वर्णभा सुमनोहरा।
सा पूर्वापरयोर्दीर्घा शतयोजनमानतः।।63।।

पञ्चाशद्योजनैर्मध्येर्व्याप्ता दक्षिणदिङ्मुखा।
अष्टयोजनकैस्तुंगा सुरासुरसमर्चिता ।।64।।

1.जल्पयंति इति ब प्रतौ

2.फलमसामाभिरुत्तमम् इति ब प्रतौ

3.मार्ग्रतः इति अ प्रतौ

4.ज्योतिलोर्कं इति अ प्रतौ

पवित्रा जिनमातेव श्रीजिनेन्द्रस्य धारणात्।
शोभते वनसद्वेदी रत्नतोरणमंगलैः।।65।।

तन्मध्ये जिनसम्बंधि सिंहासनमनुत्तरम्।
धनुः पञ्चशतैस्तुंगं वर्त्तुलाकारमुत्तमम्।।66।।

भूमिव्यासेन संयुक्तं तावता तच्च विष्टरम्।
मुखव्यासेन संशोभितदर्द्धेण बुधैर्मतम्।।67।।

तस्य सिंहासनस्यापि दक्षिणोत्तरपार्श्वयोः।
सौधर्मैशानदेवेशो रासने द्वे च सुन्दरे।68।।

मध्यसिहांसने तस्मिन् स्थापयामास तं जिनम्।
पूर्वदिक्सन्मुखं सर्वदुःखतापघनाघनम्।।69।।

भूत्वा स्वयं सहस्रोरुः बाहुस्तत्र शचीपतिः।
परमानन्दसंयुक्तो जिनभक्तिपरायणः।।70।।

इन्द्राग्नियमनैरुत्यवरूणादींश्च दिक्पतीन्।
यज्ञभागैर्यथास्थानं स्थापयामास युक्तिवित्।।71।।

स्थापितस्तत्र शक्रेण प्रोतुंगहरिविष्टरे।
स रेजे सत्प्रभोः बालो भास्करो चोदयाचले।।72।।

सुवर्णकलशस्तुंगैरष्टयोजनमानतः।
मुखे योजनविस्तारैर्नानारत्नप्रशोभितैः।।73।।

क्षीराम्भोधिपयः पूर्णैश्चन्दनप्रसवार्चितैः।
मुक्तामालादिभिर्युक्तैर्नभो लक्ष्म्यास्तनैरिव।।74।।

श्रेणीभूतामरैर्भक्त्या हस्ताद्धास्तं समागतैः।
बाहुशाखोद्धृतैर्दिव्यैः कल्पवृक्षफलैरिव।।75।।[1]

1.श्लोकोऽयं अ प्रतौ नास्ति

सहस्रगणनोपेतैः शोभाकोटिसमन्वितैः।
गम्भीरैर्वा सतां चित्तैर्भव्यानां वाञ्छितप्रदैः॥76॥

गीतसंगीतवादित्र कोटिभिः प्रविराजितैः।
जयकोलाहलोपेतैः शर्मदैर्दशनोपमैः[1]॥77॥

समुच्चार्य्य महामन्त्रं पवित्रं शास्त्रसूचितम्।
अभ्यषिञ्चज्जिनाधीशं[2] सुराधीशो जगद्धितम्॥78॥

तदा तज्जलपूरोऽसौ जिनांगे सम्बभौ पतन्।
इन्द्रनीलगिरौ प्रोच्चैरुज्वलो वाक्षरन् घनः॥79॥

पुनस्तज्जलपूरेण शुभ्रेण क्षालितस्तराम्।
जिनेन्द्रयशसा मेरुश्छादितो वा क्षणं बभौ ॥80॥

तस्मिन्महाजले तत्र सुरेन्द्राद्या मनोहराः ।
परस्परं तदा चक्रुः सिञ्चनं वापयो निधौ॥81।

सुरांगनाश्च तत्रैव चक्रिरे जलसञ्चये।
जिनांगसंगतश्चित्रे पवित्रे क्रीडनं मुदा॥82॥

स पूरः पयसां तत्र शक्राद्यैः सुरकोटिभिः।
अक्षीणर्द्धिप्रभावाद्वा वन्दितोऽपि महानभूत्॥83॥

प्रससार पयः पूरस्तत्र सर्वत्र भूधरे।
जिनेन्द्रसंगतेर्गाढं[3] सन्तोषादिव निर्लुठन्॥84॥

ततस्तस्मात् पयः पूरो निपतन्नपि शोभितः।
पवित्रीकर्तुं कामो वा भूतलं शीतलं महान्॥85॥

यः पवित्रोऽभवद्गाढं श्री जिनेन्द्रांगसंगमात्।
स पूरः पयसां सत्यं पवित्री कुरुते न कम्॥86॥

1.शर्मदैर्मदनोपमैः इति स प्रतौ

2.अभिषिंचज्जिनाधीशं इति ब-द प्रतयोः

3.सगर्तगाढं इति अ प्रतौ

इन्द्रेण यः कृतो मेरौ जिनेन्द्राभिषेकोत्सवः।
स कथं वर्ण्यतेऽस्माभिर्विना बुद्ध्या महानहो[1] ॥87॥

केचिन्मिथ्या दृशश्चापि यं विलोक्य महोत्सवं।
सन्त्यक्तनादिमिथ्यात्वं सुरास्ते सुदृशोऽभवन्॥88॥

इत्येवं परमानन्दैर्महोत्सवशतैर्जिनम्।
अभिषिच्य स देवेन्द्रः शच्यादिप्रमदान्वितः॥89॥

चन्दनागुरूकर्पूरैः सारकाश्मीरसद्रसैः।
स्वभावात्सौरभे देहे सञ्चक्रे लेपनं विभोः॥90॥

इन्द्रनीलप्रभुः स्वामी कुंकुमादिविलेपनैः।
रेजे नीलगिरिर्वोच्चैः सन्ध्यारागेण रञ्जितः॥91॥

ततः शक्रेण देवांगसारवस्त्रैरलंकृतः।
बहिरागत्य चाधिक्यात् सुश्रितो वा सुलेश्यया॥92॥

कर्णयोः कुण्डलद्वन्द्वं लसत्काञ्चनरत्नजम्।
रेजे तस्य बिभोर्बिम्बरवेर्वा सेवया गतम्॥93॥

मुक्ताफललसद्धारः सम्बभौ हृदये प्रभोः।
भावि केवल सल्लक्ष्मीलीलांदोलनवत्तराम्॥94॥

पञ्चप्रकारसद्रत्नैः सौवर्णं कटकद्वयम्।
बभौ विभोः करद्वन्द्वे तज्जीवस्योपयोगवत्॥95॥

लसत्काञ्चनमाणिक्यं कटिसूत्रं कटीतटे।
संशोभितं विभो तस्य बद्धर्थं जिनसूत्रवत्॥96॥

पादाम्भोजद्वये तस्य सशब्दं नूपुरद्वयम्।
पूज्यस्थानमिव प्राप्य सन्तोषात्सम्बभौऽब्रुवत्॥97॥

1.महानहौ इति अ प्रतौ. महानहे इति द प्रतौ

शचीदेव्याऽपि सद्भक्त्या सञ्चक्रे मण्डनं विभौ।
त्रैलोक्यमण्डनस्योच्चैर्ललामादिकमुत्तमम्॥99॥

इत्यादित्रिजगत्सारैर्भूषणाद्यैः सुभक्तितः।
समभ्यर्च्य जिनं बालं सम्प्रणम्य पुनः पुनः॥100॥

दशलक्षणसद्धर्मरथचक्रप्रर्वतने।
नेमित्वान्नेमिनाथोऽयमिति प्राह सुराधिपः॥101॥

तदा सर्वे सुराधीशाः देवदेवीशतान्विताः।
जय त्वं नेमिनाथेति चक्रिरे घोषणं मुदा॥102॥

तदोच्चैर्देवनिर्घोषैर्गर्जितो मेरुराबभौ।
जय श्रीनेमिनाथ त्वं सोऽपि वा चेति सम्ब्रुवन्॥103॥

ततः तस्मात्समानीय पूर्वरीत्या महोत्सवैः।
सौधर्मेन्द्रः सुरैर्युक्तः पुरीं द्वारवतीं जिनम्॥104॥

समुद्रविजयाधीशां शिवदेवीं जगद्धिताम्।
त्रिशुद्धया तौ प्रणम्योच्चैस्तां समर्प्य तयोः करे॥105॥

तयोरग्रे स्वयं भूत्वा तदा नाटकनायकः।
आनन्दनाटकं चक्रे परमानन्दनिर्भरः॥106॥

कृत्वा बाहुसहस्रं च लोचनानां सहस्रकम्।
मुखानां च शतान्युच्चैः पञ्चकृत्वा प्रमोदतः॥107॥

विधाय पेटकं सर्वं दिव्यरूपा सुरांगना।
नर्तयामास सद्गानैः रसैर्भावैः समन्विता॥108॥

सारवादित्र कोटीनां निनादैः पूरिताखिलम्।
नृत्यं चकार देवेन्द्रो जगच्चेतोनुरञ्जनम्॥109॥

क्षणादूर्ध्वं समुत्पत्य चन्द्रादीनपि ताडयन्।
पुनरागत्य भूभागं रञ्जयन् जगतां मनः॥110॥

नृत्यं कुर्वन् महापादप्रहारेण सुराधिपः।
कम्पयन् पर्वतादींश्च चालयन्नपि वारिधीन्।।111।।

स्वस्य हस्तांगुलीनां च सुधीरग्रेषु लीलया।
हावभावविलासाद्याः सुरनार्यः सविभ्रमाः।।112।

तत्र नर्त्तयति स्मोच्चैर्हैमीर्वा शालभञ्जिका[1] ।
नादेन त्रिजगच्चेतो रञ्जयन्तीः सुभक्तितः।।113।।

सभायां नायको यत्र समुद्रविजयः प्रभुः।
त्रिजगत्स्वामिनो नेमितीर्थनाथेन मण्डितः।।114।।

यत्रास्ते स महासत्या शिवदेव्या समन्वितः।
तथा च परमानन्दैर्यादवेन्द्रैः परिस्कृतः।।115।।

सौधर्मेन्द्रः स्वयं भक्तो नटाचार्यो विचक्षणः।
देवेन्द्राः यत्र कुर्वन्ति स सुराज्यघोषणाम् ।।116।।

देवांगनाश्च नर्त्तक्यो गन्धर्वाः सुरयो नमः[2]।
तन्नृत्यं वर्ण्यते केन जगदानन्ददायकम्।।117।।

इत्येवं स विधायोच्चैर्महानृत्यं सुराधिपः।
स्वसम्यक्त्वगुणं लोके सम्प्रकाश्य सुभक्तितः।।118।।

तं स्तुत्वा सम्प्रणम्योच्चैः श्रीनेमित्रिजगद्धितम्।
स्वर्गलोकं सुधीः प्राप स सुरेन्द्रः सहामरैः।।119।।

नमः[3] श्रीतीर्थनाथस्य सन्तानसमयस्थितः[4]।
पञ्चलक्षण[5]सम्प्रांते तदभ्यन्तरजीवितः।।120।।

1.शालभंजिका इति ब प्रतौ
2.गंधर्वाः स्युः सुरयोः इति स प्रतौ
3.नेमेःइति स प्रतौ, नमे इति ब प्रतौ
4.संतानसमयस्थितेः इति ब-द प्रतयोः
5.पंचलक्ष इति अ प्रतौ

समुत्पन्नो जिनो नेमिर्जगच्चूडामणिः प्रभुः।
सुधीः वर्षसहस्रायुः श्यामवर्णो गुणोज्ज्वलः॥121॥

समुद्रविजयः राजा पुनस्तत्र प्रमोदतः।
चकार सज्जनैर्युक्तः पुत्रोत्पत्तिमहोत्सवम्॥122॥

नानारत्नसुवर्णाद्यैर्वस्त्राभरणसंयुतैः।
ददौ दानं सुधीः कल्पः वृक्षो वा जनवाञ्छितम्॥123॥

तदा तस्य महादाने निधाने वा सुखप्रदे।
दुःखदारिद्र्योर्नाम विनाशमगमत्तराम्॥124॥

गृहे गृहे पुरे तत्र परमानन्दनिर्भराः।
पौराः सर्वैर्धनैः पूर्णाश्चक्रिरे सुमहोत्सवम्॥125॥

स्त्रियस्तत्र तदा सर्वाः गीतनृत्यादिकं मुदा।
कुर्वन्ति स्म प्रमोदेन जिनजन्ममहोत्सवे॥126॥

एवं तस्मिन् जिने जाते त्रैलोक्ये सर्वदेहिनाम्।
सञ्जातः परमानन्दः प्राप्तः चिन्तामणेरिव॥127॥

तथा महोत्सवे[1] स्वामी वृद्धिं सम्प्राप लीलया।
दानैर्मानैर्जगच्चेतः रञ्जनैः सज्जनैर्युतः॥128॥

तदा तं त्रिजगत्पूज्यं श्रीमन्नेमिजिनं मुदा।
देवेद्राद्याः सुराः सर्वे सर्वदेवांगनान्विताः॥129॥

नित्यं स्वर्गसमुत्पन्नैः सारवस्तुसमुच्चयैः।
वस्त्राभरणसन्दोहैः सेवन्ते स्म सुभक्तितः॥130॥

त्रिकालं किं करीभूता महाप्रीत्या जगद्गुरुम्।
फलाद्यैः[2] षड्तूत्पन्नैरगण्यैश्च नवैर्नवैः॥131॥

1.महोत्सवैः इति स-द प्रतयोः

2.फलोघैः इति स प्रतौ

रत्नानां प्रांगणे तत्र सोमदेवकुमारकैः।
नाना क्रीडां चकारोच्चैः स स्वामी सुखतस्तदा॥132॥

क्रीडां कुर्वन् जिनस्तत्र जगच्चेतोऽनुरञ्जनम्।
सञ्चक्रे सुतरां तात! मात्रादीनां च का कथा[1]॥133॥

रत्नकर्पूरधूलीनां मुष्टिं वध्वा स्वलीलया।
चक्रे देवकुमाराणां मस्तकेषु च स प्रभुः॥134॥

तदा देवाश्च सन्तुष्टास्ते सर्वे निजमानसे।
मे निरे सफलं जन्म स्वकीयं भुवनत्रये ॥135॥

नानामयूरकीरादि[2] रूपं कृत्वा मनोहरम्।
क्रीडयन्ति स्म सद्भक्त्या तं देवं ते सुरास्तदा॥136॥

इत्येवं परमानन्दैर्महोत्सवशतैरपि।
स्वामिनेमिकुमारोऽसौ बभूव नवयौवनः[3] ॥137॥

दशचापोन्नतः स्वामी दिव्यवस्त्रादिमण्डितः।
सम्बभः स महादाता जंगमो वा सुरद्रुमः॥138॥

नित्यं निस्वेदता गात्रे पवित्रे श्रीजिनेशिनः।
सूरिभिस्तस्य सम्प्रोक्ताः तीर्थकृन्नामपुण्यतः॥139॥

तप्तायसि यथा तोयबिंदुर्याति लयं[4] तथा।
आहारोऽपि[5] च तद्देहे मलाभावस्ततो मतः॥140॥

शरीरे रुधिरं तस्य क्षीरवद्गौरमुत्तमम्।
आद्याकृतिर्महादिव्या समचतुरस्रसंज्ञिका॥141॥

1.चकार कथा इति द प्रतौ
2.मयूरकारादि इति ब-स प्रतयोः
3.नवयौवनैः
4.यातिर्लयं इति ब प्रतौ
5.अहारोपि इति अ प्रतौ

आद्यं[1] संहननं दिव्यं स्वामिनः सुदृढन्तराम्।
शस्त्रसंघातकैश्चापि न भेद्यं भयवर्जितम्।।142।।

सौरूप्यं च विभोस्तस्य सञ्जातं भुवनोत्तमम्।
इन्द्रनागेन्द्रचंद्रार्कमनोहारिजगद्धितम्।।143।।

चन्दनागुरुकाश्मीरकर्पूरकुसुमोत्करः।
स्वभावात्[2] स्वामिसौरभ्यादकिंचनकरस्तराम्।।144।।

छत्रचामरपद्मादिलक्षणानां वभौर्बभौ।
अष्टोत्तरं शतं दिव्यं हस्तपादेषु शर्मदाम्।।145।।

शतानि नवदिव्यानि व्यञ्जनानि विरेजिरे।
स्वामिनस्तिलकादीनि शरीरे भुवनोत्तमे।।146।।

तथा च उक्तं

लक्षणं जन्मसम्बन्धमाजीवादिति निश्चितम्।
पश्चाद्व्यक्तिं व्रजेद्यत्तु तद्व्यंजनामिति स्मृतम्।।147।।

स्वामिनो हस्तपादेषु तीर्थकृत्पुण्ययोग्यतः।
लक्षणानां भवन्त्युच्चैर्नामानि मानितत्वतः।।148।।

श्रीवृक्षः शंखपद्मौ च स्वस्तिकं कुशतोरणम्।
चामरं छत्रसंयुक्तं सिंहासनमथध्वजः ।।149।।

मत्स्ययुग्मं कुम्भयुग्मं कच्छपश्च क्रमर्णवः ।
सरोवरं विमानं च भवनं नागनायकः।।150।।

नारी नरश्च सिंहश्च बाणश्चापः सुराचलः।
इन्द्रः सुरापगाचन्द्रः पुरं गोपुरमुत्तमम्।।151।।

भास्करश्च तथा वीणा व्यञ्जनं वेणुरुत्तमः।
मृदंगः पुष्पमाले च हट्टः पट्टं वरं शुभम्।।152।।

1.अद्यं इति ब प्रतौ
2.स्वभवात् इति अ प्रतौ

नानाभरणसन्दोहः कुण्डलादिकनामभाक्।
सुपक्वं कलमक्षेत्रं वनं फलविराजितम्।।153।।

रत्नदीपः पविभूमिर्लक्ष्मीदेवी सरस्वती।
कामधेनुर्वृषश्चूडामणिः कल्पतरोर्लता ।।154।।

निधिर्वनं[1] महाजम्बू तरुश्चाशोकपादपः।
उडूनिगरुडोराजसदनं तारकाः ग्रहाः।।155।।

अष्टौ श्रीप्रातिहार्याणि मंगलाष्टकमुत्तमम्।
ऊर्ध्वरेखादि[2] संयुक्तमिति चाष्टोत्तरं शतम्।।156।।

लक्षणानां जिनेन्द्रस्य भावितं भव्यदेहिनाम्।
करोति सारसम्पत्तिं सौभाग्यं च यशः सुखम्।।157।।

वीर्यं तस्य विभोर्दिव्यं ब्रह्मचर्यव्रतोद्भवम्।
त्रिकालोद्भूतशक्रादेरनन्तानन्तशक्तिभाक्।।158।।

मुखाब्जे भारती तस्य स्वामिनः सम्भवस्तराम् ।
वदन्ति सर्वजीवानां सत्प्रियं च हितं मितम्।।159।।

इत्यादिगुणरत्नानामाकरो जन्मनो बभौ।
सर्वदेवेन्द्रनागेन्द्रनरेन्द्राद्यैः समर्चितः।।160।।

यस्य तीर्थकरस्योच्चैः रूपसौभाग्यसंपदा।
गणीन्द्रैः शक्यते नैव व्याख्यातुं तत्र कः परः।।161।।

वितस्त्या व्योमसामुद्रं जलं चञ्चुलुकैर्यथा।
ज्ञातुं न शक्यते लोके तथा श्रीजिनसद्गुणाः।।162।।

वक्तुं नैवात्र शक्यन्ते परमानन्ददायिनः।
शरच्चन्द्रलसत्कान्ति समूहेभ्योऽपि निर्मलाः।।163।।

1.निधिर्द्वनं इति ब-द प्रतयोः
2.उद्धरेषादि इति अ-ब प्रतयोः

दातादयानिधिर्नित्यं निस्पृहेभ्योऽपि निस्पृही।
ज्ञानीलोकप्रियो धीरः सन्निधीकृतनिर्वृतिः।।164।।

एवं नेमिजिनः स्वामी कुमारः सुखतस्तराम्।
इन्द्राद्यैः सेवितो नित्यं प्रमोदकलिताशयैः।।165।।

सुस्थितोऽत्र सुधीर्यावज्जनयन् प्रीतिमुत्तमाम्।
मन्दिरे सम्पदा सारे तावदग्रे कथान्तरम्।।166।।

उक्तं च

स्वायुराद्यष्टवर्षेभ्यः सर्वेषां परतो[1] भवेत्।
उदिताष्टकषायाणां तीर्थेशां देशसंयमः।।167।।

तत्तेषां भोगवस्तूनां सा कल्पेऽपि जितात्मनां।
वृत्तिर्नियमितैवाभूदसंख्यगुणनिर्जरा ।।168।।

(वसन्ततिलका)

शक्राः स्नानविधायिनः सुरगिरः स्नानस्य पीठं पयः।
सिंधुर्यस्य सुकुण्डिकासुरगणास्ते किं कराः सादराः।।
सादराः नर्त्तक्योऽप्सरसः सुकीर्तिमुखांगगंधर्वः सन्नाकिनः।
जाताः जन्ममहोत्सवे स भवतां नेमीश्वरः संक्रियात्।।।169।।।

इति त्रिभुवनैकचूडामणिश्रीनेमिजिनपुराणे भट्टारकश्रीमल्लिभूषणशिष्याचार्यश्रीसिंहनन्दिनामांकिते ब्रह्मनेमिदत्तविरचिते श्रीजिनजन्माभिषेकद्वितीयकल्याणकव्यावर्णनो नाम सप्तमोऽधिकारः ।।7।।

1.पुरतो इति अ प्रतौ

अष्टमोऽधिकारः

अथैकदा वणिक्पुत्राः केचिन्मगधदेशजाः।
गत्वा समुद्रयात्रायां धनोपार्जनहेतवे॥1॥

नष्टमार्गं विधेर्योगात्प्राप्य द्वारावतीं पुरीम्।
पञ्चवर्णध्वजव्रातैर्हसन्तीं वा मरीं श्रियम्॥2॥

तां विलोक्य जगत्सारं संपदाभिर्विराजितम्।
गृहीत्वा दिव्यरत्नानि बहूनि परया मुदा॥3॥

गत्वा राजगृहं शीघ्रं जरासंधमहीपतेः ।
रत्नान्युपायिनीकृत्य[1] तं नमन्ति स्म सादरम्॥4॥

चक्रेशस्तानि संवीक्ष्य तांबूलादिप्रदानतः।
तेजसाक्रांतदिक्चक्रं कस्माद् रत्नकदंबकम्॥5॥

भवद्भिर्भो ! समानीतं तानित्याह[2] प्रमोदतः।
तन्निशम्यं वणिक्पुत्राः संजगुस्ते प्रणम्य तम् ॥6॥

श्रृणु त्वं भो ! महीनाथ ! वयं वारिपथं गताः।
दिग्विमूढास्तु पुण्येन सागरे महिमाकरे ॥7॥

पुरीं द्वारावतीं प्राप्ताः सम्पदासारसंभृताम्।
सारसौधाग्र[3]संलग्नध्वजव्रातैरलंकृताम् ॥8॥

जिनेन्द्रभवनोपेतां रत्नतोरणसंयुताम्।
नानावस्तुशतैर्युक्तां जगच्चेतोनुरञ्जिनीम् ॥9॥

समुद्रविजयाधीशो यादवानां शिरोमणिः।
राज्ञी तस्य जगन्मान्या शिवदेवीति विश्रुता ॥10॥

1.रत्नानुपायनि इति अ प्रतौ
2.तामित्याह इति स प्रतौ
3.सोधाग्र इति ब प्रतौ

तस्याः कुक्षौ समुत्पन्नः सुरासुरनमस्कृतः।
श्रीमन्नेमिजिनो देवो जगच्चूडामणिर्महान् ॥11॥

तस्य पुण्येन रत्नानां खनिर्वा याऽभवत्पुरी।
रूपनिर्जितदेवादिनरनारीमनोहरा ॥12॥

पद्माख्यबलभद्रेण बांधवेन विराजितः ।
कृष्णराजो विभात्युच्चैर्यत्र शूरशिरोमणिः ॥13॥

तयोर्द्वयोर्महातेजस्तिरस्कृतरिपून्नतिः।
नवयोजनविस्तारा दीर्घा द्वादशयोजनैः ।14॥

धनैर्धान्यैर्जनैः सर्वैः नित्यं पूर्णमनोरथैः ।
या पुरी शोभते देव ! संपूर्णा भव्यपुण्यतः ॥15॥

तस्या: पुर्याः[1] समानीतमेतद् रत्नकदंबकम्।
सर्वलोकमनोहारी पुण्यपुञ्जवदुज्ज्वलम् ।16॥

तदाकर्ण्य जरासंध: राजारुणविलोचनः[2]।
मुखं ज्येष्ठसुतस्याशु संविलोक्य जगौ रुषा ।17॥

अहो ! मच्छत्रवः सर्वे यादवा किं महीतले।
अद्यापि तेऽत्र जीवन्तस्तिष्ठन्तीह[3] महाद्भुतम् ॥18॥

मया ज्ञाता: च सर्वे ते मद्भयाद् यादवा द्रुतम्।
कृत्वा वह्निप्रवेशं च संप्राप्ता[4] यममंदिरम् ॥19॥

इदानीमेव तान् सर्वान् मारयामि मदोद्धतान् ।
इत्युक्त्वा कोपतः शीघ्रं त्रिखंडाधिपतिस्तदा ॥20॥

---

1. पूर्याः इति अ प्रतौ
2. विचनः इति ब प्रतौ
3. स्तिष्ठंती इति अ प्रतौ
4. सुप्रप्ता इति ब प्रतौ

दापयित्वा महाभेरी संग्रामरसदायिनीम् ।
महायोधशतेषूच्चैः[1] कोलाहलविधायिनीम् ।21।।

अश्वैर्गजै रथैस्तुंगैर्महासुभटकोटिभिः ।
विद्याधरैः सुरैश्चापि[2] संचचाल परिष्कृतः ।।22।।

युद्धार्थं भीषणे नामा द्रोणानाम्ना महीभुजा ।
कर्णेन प्रभुणा सार्द्धमश्वत्थाम्ना च रुक्मिणा[3] ।23।।

शल्यराजेन संयुक्तो वृषसेनेन भूभुजा ।
कृपेण भूमिनाथेन तथा च कृपवर्मणा ।24।।

रुधिराख्येन भूपेन सेंद्रसेनेन भूभृता ।
जयद्रथेन हेमप्रभेण दुर्योधनेन च ।।25।।

दुःशासनेन भूभर्त्रा दुर्मर्षणमहीभुजा।
दुर्द्धर्षणेन[4] संयुक्तो भगदत्तेन मंडितः ।26।।

अन्यैश्चापि महीपालैः चालिताखिलभूतलैः।
नानाशस्त्रसहस्रेण संयुतैः सुभटोत्करैः ।।27।।

एवं षडंगसैन्येन[5] मण्डितो मगधेश्वरः।
महाकोपप्रवातेन चालितो वाक्षयाम्बुधिः ।28।।

उद्दिश्य यादवानाशु[6] कुरुक्षेत्रं समागतः ।
अत्रान्तरे समागत्य नारदः कलहप्रियः ।29।।

संग्रामकारणं ज्ञात्वा स कृष्णं प्रत्यभाषत ।
भो हरे ! श्रुणु मद्वाक्यं कथं तिष्ठसि निर्भयः ।।30।।

---

1. शतेषुच्चैः इति अ प्रतौ
2. सुरैः श्चापि इति अ प्रतौ
3. रुक्मिणी इति द प्रतौ
4. दुर्मर्षणेन इति ब प्रतौ
5. खडंगसैन्येन इति ब,स, द प्रतीनाम्
6. यादवानांशु इति अ प्रतौ

जरासंधो मदादंधो[1] विरुद्धो बहुसाधनः ।
त्वां समुद्दिश्य संप्राप्तः कुरुक्षेत्रे स तिष्ठति । 31।।

वदत्येवं महाक्रोधे मारयामि हरिं ध्रुवम्।
कुटुम्बसहितं शीघ्रं कंसचाणूरनाशकम् ।32।।

नारदोक्तं समाकर्ण्य स कृष्णोऽपि तदा द्रुतम् ।
कुमारं नेमिमानम्य तं जगादेति भो प्रभो ।33।।

शत्रुः समागतः क्रुद्धो मगधेशो विरुद्धधीः ।
पुरीं पालय भो देव! भवत्पुण्यप्रभावतः । 34।।

तं जित्वाहं प्रवेगेण समागच्छामि निर्भयः ।
तन्निशम्य हरेर्वाक्यं नेमिनाथस्तदा मनाक्। 35।।

हसित्वा प्रोल्लसद्वक्रपंकजो मधुरेक्षणः ।
सावधिर्विजयं ज्ञात्वा हरेः पुण्यं च तादृशम् ।।36।।

विस्फुरद्दन्तसत्कांतिस्त्वं[2] हरिं संविलोक्य च ।
ॐ इति प्राह पूतात्मा सुरासुरसमर्चितः ।।37।।

तदा कृष्णोऽपि संतुष्टो मानसे तं प्रणम्य च ।
प्रभोः स्मिताद्यैः संज्ञात्वा स्वात्मनो जयमुत्तमम्।।38।।

बलभद्रेण संयुक्तः समुज्जेतुं विरोधिनम् ।
जयेन विजये[3] नामा सारणेनांगदेन[4] च ।39।।

धवाख्येनोद्धवेनापि सुमुखेनाक्षरेण[5] च ।
जराख्यभूमिपेनामा पंचभिः पाण्डवैः सह ।।40।।

---

1. महादंधो इति अ प्रतौ
2.विस्फुरदंतसत्कांतिस्तं इति ब प्रतौ
3.विजयो नामा इति स प्रतौ
4.सारणेनांगनेन च इति द प्रतौ
5. सुमखे इति ब प्रतौ

सत्यकेन समायुक्तो द्रुपदेन महीभुजा।
यादवेन्द्रैश्च सर्वैस्तु विराटाख्यैर्महाभटैः[1] ।।41।।

धृष्टार्जुनेन भूपेन सोग्रसेनेन भूभृता ।
अन्यैश्चापि नराधीशैर्मण्डितः शत्रुनाशकैः ।।42।

अश्वादिभिर्महासैन्यैः शस्त्रसंघातकैर्युतः ।
सन्नद्धो वैरिणं हन्तुं नदद्वादित्रकोटिभिः ।43।।

दिक्चक्रं सारवं कुर्वन् भटान् कुर्वंश्च सोत्सवान्।
कातरांस्त्रसयन्नुच्चैः[2] कृष्णवर्णो यमोपमः ।44।।

शत्रूणां प्राणनाशेच्छो बद्धकक्षो बलीमहान् ।
संग्रामसागरे शूरः कुरुक्षेत्रमुपागतः ।।45।।

तदा तत्र कुरुक्षेत्रे भटानां[3] प्राणनाशके ।
सैन्ययोश्च तयोर्युग्मे यमयोर्वा व्यवस्थिते ।।46।।

तदा कृष्णस्य सैन्येऽभूत्[4] दुंदुभीनां महारवः ।
तं श्रुत्वा सुभटाः केचिद् धार्मिकाः परमादरात् ।47।।

पूजयन्ति स्म सद्भक्त्या श्रीजिनं शर्मदायकम्[5] ।
केचिद्दानंददुर्द्धीराः केचिद्योग्यं व्रतं श्रिताः ।।48।।

ततस्तयोर्द्वयोर्मध्ये सैन्ययोर्भूमिपा जगुः ।
निजाधिकारिणः प्रोच्चैः सज्जीकुर्वन्तु वा जिना। 49।।

अहो प्रोत्तुंगमात्तंगा सन्नह्यतां मदोद्धताः।
ध्वाजाद्यैः शोभिताः शीघ्रं जंगमाः वा महीधराः । 50।।

---

1. विराटाख्यै महाभटैः इति ब प्रतौ
2.स्त्रासयन्त्वुच्चैः इति ब प्रतौ
3.भट्टानां इति अ प्रतौ
4.भून्येभू इति ब प्रतौ
5. शदायकं इति ब प्रतौ

सर्ववस्तुशतैः पूर्णाः संपूर्णा: वा मनोरथाः।
सद्रथाः क्रियतामाशु: तुरंगैः सह योजिताः ।51।।

धनुर्द्धरास्तथा[1] सर्वे चापानारोपयंत्वहो।
जयश्री कुण्डलाकारान् शत्रूणां प्राणलोलुपान् ।।52।।

सावधाना: भवन्तूच्चैर्भोभटाः शस्त्रपाणयः ।
प्रीणयन्तु रणे यूयं क्षुधासम्पीडितं यमम् ।।53।।

तदादेशं समासाद्य स्वप्रभूणां नियोगिनः ।
स्वस्वकार्येषु सन्नद्धाः संबभूवु: रणप्रिया: ।।54।।

तथा कृष्णनिदेशेन यथोक्तरचनान्वितम् ।
स्वसैन्यं चक्रिरे चित्रं भटास्ते युद्धहेतवे।।55।।

जरासंधोऽपि सैन्यं स्वं संग्रामावनिमध्यगः।
कारयामास तत्सज्जं षडंगं गर्विताशयः ।।56।।

एवं स्थिते तयोः सैन्ये क्षयन्ते तु परस्परम् ।
तदा महानकध्वानः समभूच्छूरसम्मत:[2] ।57।।

धनुर्धरास्तदा बाणान् मुमुचुस्ते परस्परम्[3] ।
तीक्ष्णान् प्राणप्रहारांश्च निर्घृणान्[4] दुर्जनोपमान् ।।58।।,

महाधानुष्को निर्मुक्तो बाणानां कोटिभिस्तदा ।
नभः सञ्छादितं तत्र मिथ्याध्वान्तेन वा जगत् ।।59।।

तैः संविद्धा भटाः केचिद्विगलद्रक्त[5] रंजिताः ।
दृश्यन्ते स्म पलाशागा यथा सम्पुष्पितास्तदा ।।60।।

1.ध्वनुर्द्धरास्तथा इति अ प्रतौ
2. इति संपूर्ण पंक्ति अनुपलब्धा स प्रतौ
3. इति संपूर्ण पंक्ति अनुपलब्धा स प्रतौ
4.निर्घणान् इति ब प्रतौ
5.केचिद्विलद्रक्तं इति अ प्रतौ

शरसन्ततिसंजाते तदांधतमसि स्थिताः।
भटाः स्वदृष्ट्यसंचारा: जाता मिथ्यादृशो यथा ।।61।।

क्षणं स्थित्वा ततस्तेऽपि पुनर्युद्धं प्रचक्रिरे।
धनुर्धरा: महसत्वाः प्रभोः सत्कारचेतसः ।।62।।

तथा क्रुद्धाः भटाः खड्गपाणयः प्राणहारिणः।
शत्रूणां खंडनं चक्रुर्भृत्या वा सर्वभक्षिणः ।।63।।

केचिच्छिन्नकरास्तत्र पाणिप्रसरवर्जिताः।
जाता: पुण्यविहीना: वा दरिद्रमनुजा: भुवि ।।64।।

भग्नपादद्वयाः केचित्पतितास्तत्ररणांगणे।
सुस्थानगमने भ्रष्टा: नरा: वा चरणोज्झिताः ।।65।।

इतस्ततो गजास्तुंगाः पतिताः प्राणनाशतः।
संग्रामे तत्र वा भ्रष्टा दृश्यन्ते स्म यथा नगा: ।।66।।

किं वर्ण्यतां रणं तत्र यत्र कीलालतीरिणी।
जाता वैतरणी वात्र जन्तूनां प्राणहारिणी ।। 67।।

केचित्प्रहारभिन्नागा: भटा मिलितलोचनाः।
न ब्रुवन्ति न गच्छन्ति ध्यानस्थाः वा तपोधना: ।।68।।

केचिद्वीरा: निजैः शस्त्रैः शत्रुशस्त्रसमुच्चयम्।
खण्डयन्तस्तदा लोके दर्शयन्ति स्म कौशलम् ।।69।।

सावधाना: भटाः केचिन्महासाहसशालिनः।
तस्मिन् रोद्रेऽपि संग्रामे शस्त्रभिन्नाङ्गयष्टयः।।70।।

सद्दृष्टयो जिनेंद्राणां चरणस्मृतितत्पराः।
कृत्वा सन्यासमत्युच्चैः स्वर्गलोकं ययुर्द्रुतम् ।।71।।

केचिन्मोहग्रहग्रस्ता: मिथ्यात्वविषदूषिताः।
शस्त्रघाताद्द्रुतं प्रापुर्दुर्गतिं पापकर्मणा ।।72।।

सन्मानिताः भटाः केचित् पोषिताः स्वस्वभूमिपैः ।
रुणं दातुमिवोद्युक्ताः सञ्चक्रुस्ते महारणम् ।।73।।

केचिद्भटत्वगर्वेण स्वजीवितवशेन च ।
कुर्वन्ति स्मरणगाढं शत्रूणां प्राणनाशकम् ।।74।।

तयोर्द्वयोश्च संग्रामो नानाशस्त्रशतैरपि ।
महानत्रापि संजातो रामरावणयोर्यथा ।।75।

इत्येवं तत्र संग्रामे शत्रुसैन्येन निर्जितम् ।
स्वसैन्यं वीक्ष्य कंसारिर्महाक्रोधेन कम्पितः ।।76।।

सर्वसैन्येन संयुक्तः कृतान्तो वा समुत्थितः ।
अश्वपादप्रहारोत्थः रजोभिश्छादयन्नभः ।।77।।

महाभेरीनिनादेन सर्वाः संपूरयन् दिशा ।
अश्वान्दिव्यान्गजान्क्रूरान्मारयन्सुभटोत्करान् ।।78।।

चूर्णीकुर्वन्रथांस्तुंगान्रिपूणां त्रासयन्मनः ।
स कृष्णः शत्रुसैन्यं तत्खण्डखण्डं चकार च ।।79।।

जैनवादी यथा शीघ्रं स्वविद्यायाः प्रभावतः ।
मिथ्यामतं तथा शीघ्रं जयति स्म स तद्बलम् ।।80।।

तदा वीक्ष्य जरासंधो महाक्रुधो जगाद तम् ।
वासुदेवं प्रतीच्छं च रे रे गोपालबालक ।।81।।

त्वं मत्तोऽसि करेंद्रो वा गोकुले दुग्धपानतः ।
ततस्त्वं नैव जानासि मत्प्रभावं मदोद्धतः ।।82।।

चापल्यत्वं विधायोच्चैः संप्रविष्टोऽसि सागरम् ।
साम्प्रतं जीवितो यासि कथं रे! पुरतो मम ।।83।।

याहि याहि कुलं शून्यं गवान्ते रटति ध्रुवम् ।
पतित्वा पादयोर्मेऽत्र चेद् वांछाप्राणरक्षणे ।।84।।

तन्निशम्य हरि: प्राह निर्भयो वा हरिर्महान् ।
रे रे चांधजरासंध! पश्यन्नपि न पश्यसि ॥85॥

कंसवद्ध्वंसितः कंशश्चाणूरश्चरितो द्रुतम् ।
येन सोऽहं कथं बालो गोपालोऽत्र भवाम्यलम् ॥86॥

त्वां कृत्वा खण्डशो नो चेत् प्रेषयामि यमालयम् ।
तदाहं बलदेवस्य नो पश्यामि पदांबुजम् ॥87॥

एहि चेद् वर्त्तते शक्तिर्जरासंध ममोपरि ।
किं वृथा च भटालापैर्विलापैरिव तेऽधुना ॥88॥

एवं परस्परं स्फीतिं ब्रुवन्तौ तौ रणांगणे ।
दामोदरजरासंधौ मत्तमातंगसंश्रितौ ॥89॥

यमं प्रति यमों वोच्चैः समायाति यथा तदा ।
तथा परस्परं बाणं युद्धं तौ चक्रतुस्तराम् ॥90॥

महासामर्थ्यमालोक्य जरासंधस्तदा हरेः ।
बाणान् सहमानश्च तीक्ष्णान् प्राणप्रहारिणः ॥91॥

विद्यां संस्मरति स्मोच्चै: स प्रभुर्बहुरूपिणीम् ।
तदा सापि समागत्य भूत्वा भूतकदम्बकम् ॥92॥

प्रोत्तुंगदंतमारक्तलोचनं भयदायकम् ।
पिंगोर्द्धकेशमत्युच्चैरट्टहासैश्च भीषणम् ॥93॥

नाना मया शतोपेतं नानारूपेण दुर्द्धरम् ।
पीडयामास कंसारेः सैन्यसर्वं सुदारुणम् ॥94॥

तद्विलोक्य महाशूरः स कृष्णो बलवान् भृशम् ।
मध्ये प्रविश्य भूतानां ताडयाम स वृंदकम् ॥95॥

तत्प्रभावेण सा देवी प्राणसन्देहधारिणी ।
रात्रिर्वा भास्करो द्योते सा नष्टा बहुरूपिणी ॥96॥

तदा क्रोधेन स प्राह त्रिखण्डेशो हरिं प्रति।
किमेतैश्च पलैर्भूतैर्गतैर्वा संस्थितैर्मम ।।97।।

प्रचंडभुजदंडाभ्यां कुर्वेऽहं खण्डनं तव ।
एहि गोपाल रे! कष्टं दुष्टं पश्य मया कृतम् ।।98।।

तदा दामोदरः क्रुद्धो विक्रमैकरसोद्धतः ।
तत्सन्मुखं द्रुतं प्राप्तो निर्भयो यमसन्निभः ।।99।।

जरासंधस्तदा क्रुधश्चक्रं वा कालचक्रकम् ।
परिभ्राम्य तमुद्दिश्यन्य क्षिपद्रक्तवर्णकम् ।।100।।

तच्चक्रं रत्नचक्रेण भासुरं चार्कमंडलम् ।
तं च प्रदक्षिणीकृत्य हरेः पुण्यात्करे स्थितम् ।।101।।

तदा तच्च क्रमादाय विस्फुरत्कान्तिसंयुतम् ।
हरिः प्राह जरासंध श्रुणु त्वं रे! वचो मम ।।102।।

अद्यापि देहि मे भूमिं याहि त्वं शरणं प्रभोः ।
निश्छद्म सद्म पद्मस्य बलदेवस्य पंकजम् ।।103।।

त्वं वृथा याहि मा कष्टं मृत्वा यमनिकेतनम् ।
भूरि प्राणि दशप्राणविनाशस्यैकभाजनम् ।।104।।

तन्निशम्य हरेर्वाक्यं जरासंधः क्रुधी वदत् ।
रे रे वराक गोपाल! विकरालस्य मे कथम् ।।105।।

सिंहस्य दर्शयस्येव श्रृंगालभयमद्भुतम् ।
कस्त्वं कस्तेऽपि ता क्षुद्रकस्ते लोके पितामहः ।।106।।

यतो दास्ये महीं तुभ्यं याचमानो न लज्जसे ।
चक्रं प्राप्य कथं तुष्टस्त्वं कुलाल वदत्र ते ।।107।।

करोमि प्रलयं शीघ्रं करालकरवालतः ।
यतस्त्वं निधनं यासि किं वृथा बहुजल्पनैः ।।108।।

इत्याकर्ण्य तदा कृष्णो महाकोपेन संज्वलन् ।
तस्य तेनैव चक्रेण छेदयामास तच्छिरः ॥109॥

हते तस्मिन् जरासंधे मदैरंधविशेषतः ।
जयकोलाहलो जातस्तदा कृष्णबले महान् ॥110॥

दुंदुभीनां महानादस्तदाऽभूत्तस्य सैन्यके
सज्जनानां मनः पद्मसमूहं प्रविकाशयन् ॥111॥

तथा कृष्णोपरि व्यक्तं नन्दजीवेति घोषणैः।
देवदेवीगणैश्चक्रे पुष्पवृष्टिर्मनोहरा ॥112॥

ततश्चक्रं पुरस्कृत्य बलदेवादिभिर्युतः ।
स चक्री कृष्णनामा च महाभेरी निनादतः ॥113॥

कुर्वन् दिग्विजयं सर्वान् साधयन् विजयान् सुधीः ।
नाना देशाधिपान् भूपान् वशीकुर्वन् सुवेगतः ॥114॥

गत्वा पीठगिरिं सर्वे यादवाद्यैर्नराधिपैः ।
मंडितखंडितारातिषडंगबलसंयुतः ॥115॥

तस्मिन् पीठगिरौ रम्ये नाम्ना कोटिशिलां शुभाम् ।
सर्वे ते बलदेवाद्या पूजयन्ति स्म भक्तितः ॥116॥

तत्र राज्ञां प्रतीत्यर्थं बलदेवाज्ञया हरिः ।
तां च कोटिशिलां दिव्यां वेगादुधृतवान् सुखम् ॥117॥

भुजाभ्यां वासुदेवेन सा शिला च समुद्धृता ।
प्रत्यक्षं शोभते स्मोच्चैश्छत्रशोभाविराजिनी ॥118॥

तदा तद्विक्रमं वीक्ष्य संतुष्टः पद्मनामभाक् ।
सिंहनादं चकारोच्चैर्बलदेवो गुणोज्ज्वलः ॥119॥

तन्निवासी सुनन्दाख्यो यक्षः संपूज्यतौ मुदा।
ददौ सौनन्दकं खंड्गं वासुदेवाय भक्तितः ॥120॥

तथा सर्वेऽपि भूपालाः देवविद्याधराधिपाः ।
महातीर्थजलैः पूर्णैः कुम्भैः कांचननिर्मितैः ॥121॥

अष्टोत्तरसहस्रेण नवमौ बालकेशवौ ।
अभिषिच्य महाप्रीत्या पूजयन्ति स्म वस्तुभिः ॥121॥

ततो गंगातटे गच्छन् स चक्री पूर्वसम्मुखम् ।
गंगाद्वारसमीपस्थे वने तत्र जयस्वनैः ॥122॥

सैन्यं संस्थाप्य सौख्येन रथमारुह्य चक्रिवत् ।
गोपुरेण प्रविश्योच्चैः समुद्रं भयवर्जितम् ॥123॥

स्थित्वा तत्र कियद्दूरं स्वनामसहितं शरम् ।
मागधा वा समुद्दिश्य मुक्तवांश्च कृतध्वनिम् ॥124॥

मागधोपि तमालोक्य बाणं व्यन्तरनायकम् ।
गर्जनां च विधायोच्चैर्ज्ञात्वा पुण्याधिकं हरिम् ॥125॥

रत्नहारं किरीटं च कुंडलद्वयमुत्तमम् ।
तं च बाणं समानीय ददौ तस्मै संस्तुवन् ॥126॥

अहो! समुद्रवासी च स्वयं देवोऽपि सद्बली ।
स हरेः किंकरो जातः किं न कुर्याच्छुभोदयः ॥127॥

ततो निर्गत्य संतुष्ट समुद्रात्परमोदयः ।
स कृष्णो निर्जितारातिः सर्वसैन्येन संयुत: ॥128॥

गत्वा च वैजयन्ताख्ये गोपुरे पूर्ववत्तराम् ।
नाम्ना वर तनुदेवं जयति स्म स्वपुण्यतः ॥129॥

सुरः सोऽपि समागत्य कटकं रत्नमण्डितम् ।
अंगदं च महाचूडामणिं ग्रवैयकं शुभम् ॥130॥

कटीसूत्रं पवित्रं च दत्वा तस्मै प्रणम्य च ।
गतो गेहं सुपुण्येन पूज्यते को न भूतले ॥131॥

तत पश्चिमभागस्थे स गत्वा सिंधुगोपुरे।
प्रविश्य जलधिं तत्र प्रभासं जयति स्म च ॥132॥

प्रभासोऽपि सुरस्तस्मै मालां संतानकाभिधाम्।
मुक्तामालायुतं श्वेतच्छत्रं चान्यानि संददौ ॥133॥

ततः सिंधुतटे गच्छन् पश्चिमाशाभवान् नृपान्।
सहरिः साधयन् सर्वान् गृहणन् रत्नान्यनेकशः ॥134॥

पूर्वाशासन्मुखो भूत्वा स सैन्यो निजलीलया।
विजयार्द्धगिरेः श्रेणिद्वयस्थान् खगभूपतीन् ॥135॥

जित्वा तेषां सुरत्नानि कन्या वान्याः सुरांगनाः।
समादाय प्रमोदेन महावादित्र नादतः ।136॥

वशीकृत्य तथा सर्वानन्तरालक्षितीश्वरान्।
नानारत्नसुवर्णादिसारवस्तु समाददे ॥137॥

म्लेच्छखण्डद्वयं जित्वा लात्वा तेभ्यो धनादिकम्।
नानारत्नाकरादींश्च साधयामास पुण्यतः ॥138॥

एवं तौ बांधवौ प्रीतौ परमानंदनिर्भरौ।
पद्माख्यकृष्णनामाकौ नवमौ बलकेशवौ ॥139॥

स्वपादपद्मयोः नम्रान् कृत्वा नरखगामरान्।
पूर्वपुण्यप्रसादेन भरतार्द्धश्रिया श्रितौ ॥140॥

आगच्छन्तौ पुरी स्वस्य षडंगबलमंडितौ।
यादवेन्द्रैः समायुक्तौ पवित्रौ पुण्यसम्बलौ ॥141॥

शुभ्रनीलगिरी वोच्चैर्जंगमौ तौ महीपती।
मुक्तमालादिसंशोभिछत्रध्वजविराजितौ ॥142॥

लसच्चामरसंघातैर्वीज्यमानौ गुणोज्ज्वलौ।
स्तूयमानयशोराशी मागधैश्चारणादिभिः ॥143॥

देवविद्याधराधीशैर्नराधीशैर्निरंतरम् ।
सेव्यमानपदाम्भोजौ विकसन्मुखपंकजौ ॥144॥

मृगारिवैनतेयोरुध्वजचिह्नौ मनोहरौ ।
कुर्वन्तौ प्रीतिमत्यन्तं सज्जनानां मनोऽम्बुजे ॥145॥

वस्त्रालंकारसंयुक्तौ महानादविराजितौ ।
जंगमौ वा समायातौ नूतनौ तौ सुरद्रुमौ ॥146॥

रत्नतोरणसंयुक्तां ध्वजव्रातैर्विराजिताम् ।
पुरीं द्वारावतीं प्राप्तौ महोत्सवशतैर्युतौ ॥147॥

तत्र सर्वेऽपि भूपाला देवविद्याधराधिपैः ।
सार्द्धं संभूय सम्प्रीत्या दिव्यसिंहासनोपरि ॥148॥

तौ बांधवौ समारोप्य जयकोलाहलस्वनैः ।
लसद्वादित्रनिर्घोषैर्गीतमंगलसंभृतैः ॥149॥

पवित्रजलसम्पूर्णैरष्टोत्तरसहस्रतः ।
कनत्कांचनसत्कुंभैरभिषिच्य मनोहरैः ॥150॥

त्रिखंडाधिपती दिव्यौ क्षेत्रेऽस्मिन् भारते शुभे ।
अस्माकं स्वामिनावेतौ वस्त्रालंकारसंचयैः ॥151॥

संपूज्य परमानंदात् पट्टबंधं प्रचक्रिरे ।
पुण्योदयेन जीवानां जायते किं न भूतले ॥152॥

इति त्रिखण्डभूमिशौ सुसहस्रवर्षायुषौ ।
दशचापोन्नतौ दिव्यशुभकृष्णप्रभान्वितौ ॥153॥

देवैरष्टसहस्रैस्तु गणबद्धाभिधानकैः ।
सर्वैः विद्याधरैश्चापि संपूजितपदाम्बुजौ ॥154॥

राज्ञां मुकुटबद्धानां षोडशानां सहस्रकैः ।
त्रिखण्डावासिभिर्देवैः सेवितौ च निरंतरम् ॥155॥

तथा श्रीबलदेवस्य पद्मनामातिशालिनः ।
रत्नमाला गदासीरो मुशलं च महायुधम् ॥156॥

महरत्नानि चत्वारि शोभितानि महात्मनः ।
तानि यक्षसहस्रेण रक्षितानि पृथक् पृथक् ॥157॥

देव्याश्चाष्टसहस्राणि सारसम्पद्विराजिताः ।
रूपसौभाग्यसत्पुण्यपवित्राः शीलमण्डिता ॥158॥

हरेश्चक्रं च शक्तिश्च गदाशंखो धनुस्तथा ।
दण्ड: सुनन्दकः सप्तरत्नान्येतानि सम्बभु ॥159॥

तानि यक्षसहस्रेण रक्षितानि पृथक् पृथक् ।
महाशत्रुसमूहस्य त्रासकारिणि भूतले ॥160॥

पुनस्तस्यैव कृष्णाख्यवासुदेवस्य चक्रिण: ।
सत्यभामामहाराज्ञी द्वितीया रूक्मिणी मता ॥161॥

राज्ञी जाम्बवती प्रोक्ता सुसीमालक्ष्मणास्तथा ।
गौरीनाम्नी च गान्धारी मुनिभिः सप्तमीमता ॥162॥

पद्मावतीति विख्याता समभूदष्टमी प्रिया ।
अष्टौ पट्टमहादेव्यः संबभूवुर्मनोहराः ॥163॥

तन्मुख्याश्च सहस्राणि देव्यः षोडश तस्यः वै ।
हावभावाविलासाद्याः विभ्रमादिगुणोज्ज्वलाः ॥164॥

ताभिर्देवीभिरत्यंतरूपसौभाग्यशालीभि: ।
सरोजे मण्डितश्चक्री लताभिर्वा सुरद्रुमः ॥165॥

तथा तयोरभेदेन विभूतिर्वर्ण्यतेऽधुना ।
षोडशोरुसहस्राणि देशाः सत्सम्पदाभृता: ॥166॥

सहस्राणि नवाष्टौ च शतानि च शतार्दधकं ।
द्रोणामुखाः समाख्याता सारवस्तुसमन्विताः ॥167॥

पंचविंशतिसंख्या सहस्राणि विरेजिरे ।
पत्तनानि विचित्राणि नानारत्नानि यत्र वै ॥168॥

द्वादशैव सहस्राणि कर्कटाः पर्वतैर्वृता ।
बभूवु: सर्वदा सारप्रार्थितार्थप्रदायिनः॥169॥

तत्प्रमाणाटंबाः स्युः सहस्राण्यष्टखेटकाः ।
नानावापीतडागादिवनसारैर्विराजिताः ॥170॥

ग्रामाणामष्टचत्वारिशत्संख्याकोटयोर्मताः ।
सदैव सफलासारपूर्वपुण्यप्रसादतः ॥171॥

अष्टविंशतिका द्वीपाः लंकाद्याः सुमनोहराः ।
समुद्रान्ताः स्थित्वा च दुःसाध्याः शत्रूसञ्चयैः ॥172॥

शून्यपञ्चकपक्षाब्धि प्रमिताः सुमनोहराः ।
प्रोत्तुंगमत्तमातंगाः रथास्तावत्प्रमाणकाः ॥173॥

कोटयश्च नव प्रोक्ताश्च लयास्ते तुरंगमा ।
पञ्चवर्णैर्विराजन्तो नानादेशसमुद्भवाः ॥174॥

शून्यसप्तकसंयुक्तद्विचतुःप्रमितो बभौ।
महासुभटसंघातः खड्गपाणिः समुज्वलन् ॥175॥

इत्यादिसम्पदासार विचित्रसुखसंयुतौ ।
प्रजानां पालने दक्षौ निर्जितारातिमण्डलौ ॥176॥

सर्वयादवभूपानां वंसव्योमैकमण्डने ।
सूर्याचन्द्रमसौ वोच्चैः प्रतापाद्युतिराजितौ ॥177॥

सर्वदेवेन्द्रसम्पूज्य पादपद्मद्वयेन च ।
श्रीमन्नेमिजिनेन्द्रेण शोभितौ तौ विशेषतः ॥178॥

एवं स्वपूर्वपुण्येन तौ द्वौ श्रीबलकेशवौ ।
नानाभोगान् प्रञ्भुजानौ पद्मकृष्णाभिधानकौ ॥179॥

परस्परं महा प्रीत्या प्राणेभ्यश्चातिवल्लभौ ।
त्रिखण्डराज्यं कुर्वाणौ परिवारैः परिष्कृतौ ॥180॥

दिव्यरत्नकिरीटाद्यैर्मण्डितौ खण्डितद्विषौ ।
सारलक्ष्मीसमायुक्तौ रूपसौभाग्यसुन्दरौ ॥181॥

भूतलं वाप्यलं कर्तुं समायातौ बलान्वितौ ।
इन्द्रोपेन्द्रौ गुणैः रुद्रौ दिव्यमूर्ती सुखं स्थितौ ॥182॥

इत्यादिसंपदासारपरं चापि जगद्धितम् ।
प्राप्यते येन सत्सौख्यं तज्जीयाज्जिनशासनम् ॥183॥

यस्त्रैलोक्यगुरुर्नमति विबुधायं येन चोक्तो वृषो।
भव्यानां शिवदायकश्च मुनयो यस्मै नमस्कुर्वते।

यस्माच्छर्मसतां च यस्य सुयशो यस्मिन् गुणा निर्मला: ।
सत्वं नेमिजिनेन्द्रदेवसततं जीयाः सतां सम्पदे ॥184॥

इति त्रिभुवनैकचूड़ामणिश्रीनेमिजिनपुराणे भट्टारकश्रीमल्लिभूषणशिष्याचार्यसिंहनन्दिनामांकिते ब्रह्मनेमिदत्तविरचिते पद्मनामनवमबलदेवकृष्णनामनवमनारायणदिग्विजयव्यावर्णनो नामाष्टमोऽधिकारः ॥8॥

नवमोऽधिकारः

अथैकदा शरत्काले विशाले कमलान्विते।
स्वच्छे सरसि वा चित्ते सतां नाम्ना मनोहरे।।1।।

अतः पुरादिभिर्युक्तो गत्वा कृष्णः स्वलीलया।
जलक्रीडां चिरं चक्रे चक्री रामागणैः सह ।।2।।

सिच्यमाना: जलैस्तेन रेजिरे ताः स्त्रियस्तदा।
नीलमेघा: श्रिता:[1] व्यक्ता चलविद्युल्लतोपमाः[2]।।3।।

ताभिः सिक्तस्तदा चक्री क्रीडया स्वच्छवारिणा।
रेजे नीलगिरिर्वोच्चैर्मेघमालाभिरुक्षितः।।4।।

कस्याः स्त्रियस्तदाहार[3]यष्टिर्मुक्तामयी[4] बभौ।
क्षरन्ती रत्नवृष्टिर्वा पतन्ती स्वामिसेचनात् ।।5।।

कश्चिच्चकर्णपूरस्तु सम्पपाताम्बुना हतः ।
विष्णुनावा जलेनोच्चैस्ताडितस्तत्र लज्जितः।।6।।

सूक्ष्मवस्त्रान्वितास्तत्र संसिक्तास्ताः जलेन च।
शोभन्ते स्म सफेना वा पद्मिन्यो मुखपंकजाः।।7।।

तासां हृदयकाश्मीरप्रवाहेण सरोवरम्।
तदाऽभूत्पीतवस्त्रेण छादितं वा मनोहरम्।।8।।

बलदेवोऽपि तत्रैव स्वदेवीभिः प्रमोदतः।
जलक्रीडां चकारोच्चैश्चन्द्रवन्निर्मलस्तराम्।।9।।

1.श्रितं इति ब प्रतौ
2. चलविद्युलतोपमा इति अ प्रतौ
3.स्त्रियस्तदास्तदाहार इति अ प्रतौ
4.यष्टिमुक्तामया इति ब प्रतौ

एवं तत्र जलक्रीडा विनोदेऽपि तदा मुदा।
श्रीनेमेः सत्यभामायाः सम्भूयच्चाम्बुसेचनम्।।10।।

ततो नेमिकुमारेण दिव्यवस्त्रं च गृह्णतां।
सत्यभामां प्रतिक्षिप्तं स्नानवस्त्रं विनोदतः।।11।।

प्रक्षालयाति तद्वीक्ष्य सत्यभामा स्वगर्वतः।
सा जगाद प्रभो नागशय्यायां किं स्थितो भवान्।।12।।

शार्ङ्गचापं समारोप्य पौरुषेण समायुतः।
दिव्यं शंखनिनादं च सुधीः किं कृतवानसि ।।13।।

येनात्र भवतां वस्त्रक्षालनं च करोम्यहं।
तन्निशम्य जिनः प्राह किमेतत् साहसं शुभे।।14।।

सापि मुग्धा पुनः प्राह नो भवेत्साहसं यदि।
श्रीमद्भिस्तु तदा कार्यं तत्सर्वं क्रियते भुवि ।।15।।

सत्यं मुग्धाः स्त्रियः काश्चिद्गर्वेण विकलाशयाः।
चित्तेनैव विजानन्ति कार्याकार्यं हिताहितम् [1]।।16।।

यो देवेन्द्रनरेन्द्राच्र्यो देवदेवो जगद्गुरुः[2] ।
यस्य पादाम्बुजद्वंद्वरजोऽपि सहसा ध्रुवम् ।। 17।।

वन्दितं पापसन्तापं हरत्युच्चैर्न संशयः ।
तत्प्रेषणं न किं कार्य्यं शर्म्मसन्दोहदायकम् ।।18।।

इंद्रादयोऽपि यत्सेवां चित्ते वाञ्छन्ति सर्वदा ।
तस्य कार्यं विना पुण्यं कथं प्राप्यं निधानवत् ।। 19।।

ततस्तस्या वचः श्रुत्वा कुमारो मानकारणं ।
सर्वं करोमि वेगेन प्रोक्त्वेति पुरमागतः ।। 20।।

1.इति पंक्ति अनुपलब्धौ द प्रतौ
2. इति पंक्तिः अनुपलब्धौ द प्रतौ

नागेन्द्राणां फणाटोपमहामाणिक्यभास्कराम् ।
नागशय्यां समारुह्य लीलया परमेश्वरः ॥21॥

चापमारोप्य पादेन तडिदण्डमिव द्रुतम् ।
पूरयामास तं शंखं नादपूरितं दिग्मुखम् ॥ 22॥

धनुष्टंकारः ततस्तत्र शंखनादेन[2] तेन च ।
कम्पितं भुवनं सर्वं शंकितं सुरनायकैः ॥ 23॥

आकाशे चन्द्रसूर्याद्यैः किं जातमिति भीवशैः ।
व्यन्तरैः खेचरैः सार्द्धं मिलितं च भयातुरैः ॥24॥

महापीठं च चालोच्चैश्चलिताश्चाचलाचलाः ।
सागराः प्रलये वोच्चैर्व्याप्नुवन्ति स्म भूतलम् ॥ 25॥

दिग्नागादिमहानागा स्तंभमुन्मूल्यनिर्गताः ।
आदेशं वा गुरोर्भक्ताः कुपुत्राः दुर्मदान्विताः ॥26॥

महातुरंगमानष्टा भयत्रस्ताश्च दिक्षु च ।
ते किं कर्तव्यतां मूढाः पुरे पौरास्तथाऽभवन् ॥ 27॥

एवं कोलाहलं तत्र भुवनक्षोभकारकम् ।
श्रुत्वा हरिस्तदा भीत्या सञ्जातश्च कुलाकुलः॥ 28॥

उत्पन्नविस्मयोऽपृच्छत् किं करान् किं महाद्रुतम् ।
जातमेतदिति श्रुत्वा तेऽपि ज्ञात्वा यथाऽभवत् ॥29॥

तं प्रणम्य जगुर्देवदेवदेवेन्द्रवन्दितः ।
श्रीमन्नेमिकुमारोऽत्र सर्वमेतच्चकार च ॥30॥

सम्प्रविश्यायुधागारं नागशय्यां समाश्रितः ।
चापमारोपयन्नुच्चैः पूरयामास कम्बुकम् ॥31॥

---

1. शंषनादेन इति अ प्रतौ

एतत्कर्मत्रयं नाथलीलया नेमिनायकः ।
सञ्चक्रे युगपच्छीघ्रं चकम्पे भुवनत्रयम् ॥32॥

सत्यभामा प्रभो मुग्धा न वेत्ति पुरुषान्तरम् ।
दत्तं न पीलयामास स्नानवस्त्रं जिनेशिनः ॥33॥

किन्तु गर्वेण तं प्राह किं त्वया भो! कुमार! वै ।
सर्पशय्याश्रितशार्ङ्गं चापमारोप्य वेगतः ॥34॥

शंखः किं पूरितो गाढं यद्वस्त्रं क्षालयामिते ।
तच्छ्रुत्वा वचनं देव कुमारो मानसे रुषा ॥35॥

सर्वं चकार भो नाथ! यद्गूढं भुवनत्रये ।
मुग्धाः प्रकाशयन्त्युच्चैस्तत्सर्वं कुपिताः स्त्रियः ॥36॥

इत्याकर्ण्य[1] वचस्तेषां कृष्णश्चिन्तातुरस्तराम् ।
नाम्ना कुसुमचित्रां[2] तां द्रुतं गत्वा सभावनिम् ॥37॥

बलदेवं प्रति प्राह कुमारो बलवान् भृशम् ।
महतेजा श्च संजातो जित्वा घोरे रणांगणे ॥ 38॥

त्वां च मां चक्षुणार्द्धेन राजलक्ष्मीं ग्रहीष्यति ।
ततो यं स्थाप्यते शीघ्रं कानने निर्जने क्वचित् ॥39॥

इति श्रुत्वा सपूतात्मा पद्यो नाम बलोऽवदत् ।
श्रृणु त्वं भो! हरे! चित्तं सावधानं विधाय च ॥40॥

चरमाङ्गधरो देवः कुमारो यं जगद्गुरुः ।
समुद्रविजयाधीशः कुलव्योमैकचन्द्रमाः ॥41॥

मुक्तिगामी सुराधीशैः समर्चितः पदद्वयः ।
मन्दरागी करोत्येष नैव कस्यापि विप्रियम् ॥42॥

---

1. इत्याकण्य इति ब प्रतौ
2. कुसमचित्रां इति ब प्रतौ

इदं राज्यं तृणाधीनं मानसे चास्य भासते ।
अस्मादृशां च मूढानां राज्यमेतद्भवेन्महत् ॥43॥

विलोक्य कारणं किंचिद्वैराग्यस्य महामनाः ।
त्यक्ता: सर्वं जगत्सारं संयमं संग्रहीष्यति ॥44॥

तदाकर्ण्य समायावी कृष्णो राज्येषु लम्पटः।
उग्रवंशाम्बुजे भानोरुग्रसेनो महीभुजः ॥ 45॥

गत्वा गृहं स्वयं प्राह तदग्रे कपटाग्रणीः ।
उग्रसेनो महीनाथ! कन्याराजिमतिस्तव ॥46॥

जयवत्यां समुत्पन्नाः रूपसौभाग्यशालिनी ।
प्रिया नेमिकुमारस्य भवत्वेषा जिनेशिनः ॥ 47॥

उग्रसेनः प्रभुः[1] प्राह भो त्रिखण्डेशमाधव! ।
अस्माकं त्वं प्रभुर्देव! सर्वदा पालको ध्रुवम् ॥48॥

यत्त्रिखण्डेषु सद्वस्तु तत्सर्वं न्यायतस्तव ।
के वयं[2] तत्र कथ्यन्ते श्रीमतां पादसेवकाः ॥ 49॥

परन्तु त्रिजगत्स्वामी नेमिनाथो गुणाकरः ।
ईदृग्विधो वरो लोके प्राप्यते चेदतः परम् ॥50॥

किं पुण्यं भुवने तस्मात्तस्मै त्रैलोक्यतायिने ।
दत्ता मया सुता पूता सती राजिमतिर्मुदा[3] ॥51॥

तद्वाक्यामृतसंसक्तिस्तदा नारायणो मुदा ।
पञ्चरत्नप्रभाभारद्योतिताखिलतत्सभाम् ॥ 52॥

1.उग्रसेनः प्रभु इति अ प्रतौ,उग्रसेनप्रभुः इति ब प्रत

2. केवलं इति स प्रतौ

3. रात्रिमतिर्मुदा इति ब-द प्रतयोः

कनत्कांचननिर्माणां मुद्रिकां सुमनोहराम्[1] ।
राजीमत्याः[2] करांगुल्यां चकार भुवनोत्तमाम् ॥53॥

तथा सौकारयामास हरिः सद्दानमानतः ।
प्रभोर्विवाहसामग्रीं जगच्चेतो निरंजिनीम् ॥54॥

पञ्चरत्नमयस्तत्र मण्डपः समभूत्तराम् ।
सौवर्णस्तम्भनिर्माणः पट्टकूलादिशोभितः ॥55॥

छत्रचामरसंशोभा: शतैः सम्मोहिताखिलाः ।
मुक्तमाला: लसत्पुष्पमालाभिः सुविराजिता: ॥56॥

समण्डपो जिनेन्द्रस्य यशः पुंजोऽथवा बभौ।
महादानशतैर्वोच्चैः कल्पवृक्षः समागतः ॥57॥

विस्तीर्णा वेदिका तत्र हाटकादिविनिर्मिता ।
रत्नमुक्ताफलोद्भूता रंगवल्ली विराजिता ॥ 58॥

निर्मिता वा श्रिया तत्र स्वयमागत्य भक्तितः ।
सारजे वेदिका गाढ़ं सज्जनानंददायिनी ॥59॥

तत्र सौवर्णपट्टे च विस्तीर्णवाससोज्वले[3] ।
निर्मले वासतां चित्ते मंगलद्रव्यशोभिनि ॥60॥

दिव्यदेवांगनागीतैर्नारीसंगीतसुंदरैः ।
नानामहोत्सवैः सर्वैः परिवारजनैर्मुदा ॥61॥

श्रीमन्नेमिकुमारं तं सुरासुरनमस्कृतम् ।
कन्यारत्नेन संयुक्तं संस्थाप्योच्चैः शुभेऽहनि ॥62॥

सारवादित्रनोदेन जयकोलाहलस्वनैः ।
वधूवरौ शुभैराद्रतन्दुलैस्तौ प्रवर्द्धितौ ॥63॥

---

1. सां मनोहराम् इति अ प्रतौ
2 रात्रीमत्यां इति अ-द प्रतयोः
3. विस्तीर्णे इति स प्रतौ

तदा महोत्सवे दिव्यौ वस्त्राभरणमण्डितौ।
शोभितौ तौ यथा लक्ष्मी पुण्यपुंजौ जगद्धितौ ॥64॥

परेद्युः समये पाणि जलदानं भविष्यति।
तदा लोभग्रहग्रस्तः स हरि र्भावि[1] दुर्गतिः ॥65॥

स्वराज्यादानन्तो भीत्वा नेमेश्चापि[2] जिनेशिनः ।
वैराग्यकारणं किंचिद्दर्शयामि यतोप्ययम् ॥66॥

भोगेभ्यो निस्पृहो भूत्वा दीक्षां लात्वा प्रयाति च ।
सञ्चित्य मानसे चेति नानामृगसमूहकम् ॥67॥

दुष्टव्याधैः समानीतं धृत्वैकत्र भयाकुलम्।
समन्तात् कारयित्वाशुः वृत्तिं संकीर्णतामिताम् ॥68॥

कुमारोऽत्र समायाति यदा संवीक्षितुं दिशः।
तदा भवद्भिर्वक्तव्यं चक्रिणा त्वंद्विवाहके ॥69॥

आगतम्लेच्छभूपानां भक्षणार्थं प्ररक्षितम् ।
कदम्बकं मृगाणां हि प्राहैवं तन्नियोगिनः ॥70॥

राज्यांधाः किं न कुर्वन्ति पातकं ज्ञानवर्जिताः ।
यथा सौमाधवचक्रे कैतवं च जिनेशिनः ॥71॥

अथ श्री नेमिनाथश्च वस्त्रालंकारभासुरः ।
सुगंधपुष्पमालाद्यैर्मण्डितो दिव्यरूपभाक् ॥72॥

तुरंगमैर्गजैस्तुंगैर्भटौघैः सेवितस्तराम् ।
महासामन्तसन्दोह कुमाराद्यैः परिष्कृतः ॥73॥

विचित्ररत्ननिर्माणां चित्राख्यां शिविकां श्रितः।
छत्रैर्ध्वजैर्जगत्सारैः शोभितः स प्रभुस्तदा ॥74॥

1. सहारिर्भाव इति ब प्रतौ
2. नेमेपि इति द प्रतौ

चामरैर्वीज्यमानस्तु चन्द्रकान्तिवदुज्वलैः।
महाचारणगन्धर्वैस्स्तूयमानो यशोधनः ॥75॥

नानावादित्रनिर्घोषैः पूरिताखिलदिग्मुखः।
ननंददेवेति जीवेति जयकोलाहलैर्युतः ॥76॥

महिम्ना निर्जिताशेषो देवदेवन्द्रनायकः ।
महाशोभा शताकीर्णे शुभे द्वारवतीपुरे ॥77॥

इत्यादिसम्पदोपेतः स स्वामी परया मुदा ।
दिशावलोकनं कर्तुं सुधीर्गच्छन् निजेच्छया ॥78॥

तत्रागत्य जगत्स्वामी मृगान् संवीक्ष्य च स्थितः ।
महातृषाक्षुधाक्रान्तान् रटन्तो निजभाषया ॥79॥

इतस्ततो महाकष्टं पततो मूर्च्छया क्षितौ।
तदा तद्रक्षकान् प्राह किमर्थं रे वराक! काः ॥80॥

एते मृगा विरुद्धास्तु धृताश्चैकत्र कष्टतः ।
ते तं दयापरं नत्वा सम्प्राहुर्भो जगद्धितः ॥81॥

वासुदेवेन ते देव विवाहे म्लेच्छ भूभुजाम् ।
दातुमेते मृगाःव्याधैः समानीता धृता इह ॥82॥

तदाकर्ण्य वचस्तेषां कुमारो नेमिनायकः ।
महादयारसौघेन संसिक्तिस्वमनो द्रुमः ॥83॥

स्वचित्ते चिन्तयामास किमेतद्विपरीतकम् ।
महानरकसम्पातकारणं पशुमारणम् ॥84॥

अस्माकं न कुले चेत्थं जातं कर्म कदाचन ।
पापिनां वनभिल्लानां कर्म्मैतद् दुःखराशिदम् ॥85॥

विचारयन्निति स्वामी ततोऽवधिनिरीक्षणात् ।
ज्ञात्वा कृष्णकृतं कार्यं महाकपटकारणम् ॥86॥

स्वराज्यग्रहणशंका कुधीरस्मत्समुद्वहन् ।
नारायणश्चकारोच्चैर्कर्म्मैतत्कष्टकोटिदम् ।87।।

धिक् संसारमसारं हि यत्र तृष्णातुरा नराः ।
कृत्वा[1] पापशतान्येव मिथ्यात्वविषदूषिताः[2] ।।88।।

क्रोधमान: महामायालोभकामैः प्रवंचिताः ।
हिंसादिके रताः कष्टा: दुर्लेश्याः पापपण्डिताः ।।89।।

पञ्चेंद्रियादिभिः सप्तव्यसनैर्लम्पटाः खलाः ।
पतन्ति नरके घोरे भूरिदुःखैकसागरे।।90।।

छेदनैर्भेदनैर्दुःखं क्रकचोद्दारणैः खरैः।
कटाहे तलनैः शूलारोपणैर्कुट्टनैर्घनैः ।।91।।

भ्राष्ट्रे संक्षेपणैर्नित्यं कूटशाल्मलिघर्षणैः ।
महाक्षुधामहातृष्णा महारोगैर्ज्वरादिभिः ।।92।।

पूर्ववैरशतैर्दुखं दुष्टदेवैरुदीरितं ।
सहन्ते सुचिरं कालं प्राणिनः पापकर्मणा ।।93।।

पशुष्वपि महादुःखं संसारे धर्मवर्जिताः ।
प्राप्नुवन्ति वधेर्नित्यं बन्धनै: रुन्धनादिभिः ।।94।।

मानवेषु च संयोगवियोगजनितं महत् ।
पूर्वपापेन संयुक्ताः सन्तप्ता वात्र वह्निना ।।95।।

पुत्रमित्रकलत्रादिसंपदाभिविवर्जिताः ।
दुष्टदारिद्र्यदुर्भाग्यैः दुःखं भुञ्जन्ति देहिनः ।।96।।

1.कृता इति अ प्रतौ
2. विदूषिता इति अ प्रतौ

देवेषु मानसं दुःखं जायते दुर्दशा महत् ।
परेषां संपदां वीक्ष्य कविवाचामगोचरम् ॥97॥

शरीरं मलसन्दोहं मांसरक्तादिसम्भृतं ।
अस्थिपञ्जरकं कष्टं वीभत्सं श्लेष्मकादिभिः ॥98॥

महापूतिक्षणार्द्धेन क्षयं याति च रक्षितम् ।
नाना रोगशतैर्युक्तं तापकं पापकारणम् ॥99॥

सारमृष्टान्नपानाद्यैः पोषितां चापि नाशकम् ।
निर्गुणं नात्मनः क्वापि यथा लोके च दुर्जनः ॥100॥

भोगाः पञ्चेंद्रियोत्पन्नाः वञ्चकेभ्योऽपि वञ्चकाः ।
यकैर्जन्तोर्न तृप्तिस्स्यात् पावकस्येधंनैर्यथा ॥101॥

किं विवाहेन मे कार्यं यत्त्याज्यं सर्वथाखिलम् ।
रागस्य कारिणां कर्म महाबन्धविधायिना ॥102॥

इति त्रिविधवैराग्यं भावयन् भुवनोत्तमः ।
श्रीमन्नेमिकुमारोऽगान्निवृत्य निजमंदिरम् ॥103॥

तत्रापि त्रिजगत्स्वामी मन्दिरे सुन्दराकृतिः ।
सुधीःसञ्चिन्तयामास स्वनुप्रेक्षा द्विषड्विधा॥104॥

अध्रुवं- संसारे न स्थिरं किंचिद् धनधान्यं च मन्दिरम् ।
पुत्रमित्रकलत्रादियत्किंचिद्बुद्बुदोपमम् ॥105॥

संपदा विविधा चापि चंचला चपला यथा ।
यौवनं क्षणविध्वंसि छिद्रहस्ते यथा वनम् ॥106॥

बांधवाश्चापि जायन्ते यन्निमित्तेन[1] वैरिणः।
राज्यं तच्च महाकष्टं क्षयं याति क्षणार्द्धतः ॥107॥

1.निमित्ते इति अ प्रतौ

मूढ़ाः सर्वं विजानन्ति नित्यं संज्ञानवर्जिताः।
यथा धात्तूरिको लोके मृत्पिण्डकाञ्चनं विधीः॥108॥

अशरणं- संसारे सर्वजन्तूनां तारणं नास्तिकश्चन।
मनुष्यो देवतादेवो देवेन्द्रो वा फणीश्वरः॥109॥

इन्द्रादिपतने यत्र शरणं नास्ति कश्चन।
सामान्यसर्वजन्तूनां का वार्ता तत्र भूतले॥110॥

मातृपित्रादयः सर्वे सज्जनाः स्नेहिनोऽपि च।
सन्तोऽपि स्वायुषः प्रांते जनो याति यमालयम्॥111॥

दर्शनज्ञानचारित्रं पवित्रं भुवनत्रये
भव्यानां भावि मोक्षाणां शरणं केवलं भवेत्॥112॥

संसारः- अस्मिन् संसारकान्तारे मिथ्यामोहांधकारके।
क्रोधव्याघ्राकुले मानदुस्तरप्रस्तरोच्चये॥113॥

मायागाधनदीपूरे लोभसर्पशतान्विते।
जन्ममृत्युजरारोगे महाभिल्लैर्भयानकैः॥114॥

नीचोच्चकुलवृक्षौघे दुर्जनोत्कटकण्टके।
सतृष्णासरघाक्रांते मत्सरक्रूरकुञ्जरे॥115॥

रत्नत्रयमहामार्गभ्रष्टः प्राणी च मूढधीः।
क्व वा प्राप्नोति दुःसाध्यं मोक्षपत्तनमुत्तमम्॥116॥

एकत्वं- एकः करोति सत्पुण्यं पापं पुष्णाति चैककः।
तत्फलं सुखं दुःखं हि प्राणी प्राप्नोति केवलम्॥117॥

माता पिता सुतो बन्धुः सज्जनो दुर्जनोऽथवा।
न कोऽपि सहगामी स्यात् संसारे सरतां नृणाम्॥118॥

पाताले च पतत्येको यात्येकः पशुयोनिषु।
एको नीचं कुलैश्चैकः पुण्यतः सुकुले भवेत्॥119॥

रत्नत्रयं समाराध्य द्विप्रकारं जगद्धितम् ।
मुक्तिकान्तो वरश्चैको जीवः सिद्धो भवत्यलम् ॥120॥

अन्यत्वं- पञ्चथा वरकेष्वत्र विकलत्रयवपुस्वपि ।
पापान्नारकवेदेषु पञ्चाक्षपशुयोनिषु[1] ॥121॥

उच्चैर्नीचमनुष्याणां नानागात्रेषु संगतः ।
पुण्याद्देवशरीरेषु नीरं क्षीरवदत्र भो! ॥122॥

मिलितोऽपि सदाकष्टैरष्टभिः कर्मभिः सह ।
आत्मनि च सुखी दुःखी पुण्यपापप्रयोगतः ॥123॥

रागद्वेषादिभिर्गाढ़ं मलिनोऽपि निरंतरम् ।
अन्यो जीवः स्वभावेन स्वर्णपाषाणहेमवत् ॥124॥

अशुचित्वं- शरीरमशुचिव्यक्तमिदं ज्ञेयं च सर्वदा ।
यत्प्रसंगेन यत्सारं चन्दनागुरुकुंकुमम् ॥125॥

सद्वस्त्रं पुष्पमालादिसर्वं चाशुचितां व्रजेत् ।
यच्चपलादुकं सर्वं वस्तुतन्मयतां नयत् ॥126॥

यद्दुःखं चात्मनो नित्यं वर्तते भुवनत्रये ।
तत्कारणं शरीरं हि यथा पात्रं जलस्य च ॥127॥

ईदृग् विधे: शरीरेऽपि मूढ़ाः प्रीतिं विधाय च ।
प्राप्नुवन्ती महादुःखं नराः सद्धर्मवर्जिताः ॥128॥

आश्रवः- पंचप्रकारमिथ्यात्वैरव्रतैश्च द्विषड्विधैः ।
कषायैः पञ्चविंशत्या योगैः पञ्चदशप्रमैः ॥129॥

आस्रवत्यास्रवो नित्यं प्राणिनां दुःखकारणम् ।
संसारे सागरे वोच्चैश्छिद्रनावं जलोत्करः ॥130॥

1.पंचाक्षी इति स प्रतौ

तेनात्मायमंधो भागं गत्वा यः पिण्डवद् ध्रुवम् ।
नानाकष्टसहस्राणां भाजनं भवति द्रुतम् ॥131॥

ततो मिथ्यात्वमुख्यास्ते सप्तपञ्चाशदास्रवाः ।
संज्ञेयाः शत्रवो जन्तोर्महादुःखशतप्रदाः ॥132॥

संवरः संवरःसम्भवत्येव जीवानां शर्मराशिदः[1] ।
मनोवाक्कायतो गुप्तिः त्रयेण परिमंडितैः ॥133॥

इर्यादिसमितीनां च पञ्चभिश्च परिष्कृतैः ।
उत्तमादि[2] क्षमाद्यैश्च सद्धर्मैर्दशभिस्तथा ॥134॥

अनुप्रेक्षादिभिश्चापि परीषहजयैर्ध्रुवम् ।
पञ्चप्रकारचारित्रैर्जगच्चेतोनुऽरंजनैः ॥135॥

एतैस्तु कर्मणां नित्यमास्रवस्य निरोधकृत्[3] ।
भव्यानां सुतरां सेतुबंधो वा वारिवारिणे ॥136॥

निर्जरा- निर्जरा च द्विधा प्रोक्ता सकामाकामनामभाक् ।
सकामा श्रवणादीनां कामापरदेहिनाम् ॥137॥

बाह्याभ्यन्तरभेदेन तपसा द्विविधेन वै ।
कर्मणां निर्जरा कार्या धीधनैर्देहदण्डनैः ॥138॥

तपसामुत्तमं प्राहु रूपवासतपो बुधाः ।
यथाष्टांगशरीरेऽस्मिन्नुत्तमं मस्तकं भवेत् ॥139॥

मनो मर्कटकं येन बध्वा संतोषरज्जुभिः ।
ससम्यक्त्वं तपस्तप्तं शक्यालोके कृती स ही ॥140॥

1.शमराशिदः इति अ प्रतौ
2.उत्तमाद्य इति ब प्रतौ
3.निरोधक कृत् इति द प्रतौ

तपश्चिंतामणिर्लोके तपः कल्पद्रुमो ध्रुवम् ।
तत्तयोः ज्ञानिभिः प्रोक्तं यच्च स्वेच्छा निरोधनम् ॥141॥[1]

लोकः - जीवादयः पदार्थास्ते लोक्यन्ते यत्र सर्वदा।
तस्मादयं सदा प्राप्तो लोको लोकनिधानताम् ॥142॥

अनादिनिधनः सोऽयं वर्ततेऽनन्तशून्यगः[2] ।
अधो मध्योर्द्धभेदेन त्रिलोकश्च प्रकीर्तितः ॥143॥

चतुर्दशभिरुत्तुंगो रज्जुभिर्मुनिभिर्मतः।
घनाकारप्रकारेण रज्जूनां त्रिशतानि च ॥144॥

त्रिचत्वारिंशता सार्द्धमानं यस्य महागमे ।
विस्तारितपदद्वंद्वकटिहस्तनरोपमः ॥145॥

नानाजीवादिषड्द्रव्यैः पूर्णो वातैस्त्रिभिर्वृतः ।
न केनापि कृतो नैव हर्त्ता चास्य कदाचन ॥146॥

आकाशवत्सदा सिद्धो मस्तके यस्य सर्वदा ।
सिद्धाः शुद्धाश्च[3] तिष्ठन्ति सम्यक्त्वाद्यष्टभिर्गुणैः ॥147॥

संवेगार्थं सदाभव्यैरित्याद्यैर्लक्षणैर्युतः ।
ध्येयो लोको निजे चित्ते पवित्रे स्वागमक्रमात् ॥148॥

बोधिः- बोधिरत्नत्रयप्राप्तिस्तत्राद्यं चातिदुर्लभम् ।
जीवाजीवादितत्त्वार्थश्रद्धानं यत्तदेव हि ॥149॥

सम्यग्दर्शनमाम्नातमष्टांगैः प्रविराजितम् ।
सर्वव्रतक्रियाकाण्डभूषणं रत्नवत्तराम् ॥150॥

---

1. 218 पृष्ठतः 224 पृष्ठ पर्यंतं पृष्ठाः अनुपलब्धाः (141 श्लोकतः 216 श्लोकाः अनुपलब्धाः अ प्रतौ)
2. वर्ततेऽनन्तशून्यतः इति स प्रतौ
3. शुद्धाश्च इति पदं स प्रतौ अनुपलब्धं

ज्ञानं चाष्टविधं ख्यातं नेत्रं प्रायं च देहिनाम् ।
त्रयोदशप्रकारं च चारित्रं भुवनोत्तमम् ॥151॥

रत्नत्रयमिदं ज्ञेयं व्यवहारेण शर्मदम् ।
निश्चयात्तत्त्रयं व्यक्तं स्वात्मा शुद्धो निरंजनः ॥152॥

धर्मः- चतुर्गतिमहापाताद्धृत्वा जंतून् सुवेगतः।
यो धरत्युत्तमे स्थाने स धर्मो दुर्लभो भुवि ॥153॥

उत्तमादिक्षमाद्यैश्च लक्षणैर्दशभिर्युतः ।
त्यक्त्वा सर्वं प्रमादं हि समाराध्यः स एव च॥154॥

तथा वस्तुस्वभावो हि सद्दया च जगद्धिता ।
रत्नत्रयं च पूर्वोक्तं सद्धर्मो यः प्रकीर्तितः ॥155॥

उक्तं च- **धम्मो वत्थुसहावो खमादिभावो य दहविहो धम्मो।**
रयणत्तयं च धम्मो जीवाणयर रकणं धम्मो ॥156॥

यो धर्मोऽत्र समासाद्यसेवितः शन्ददात्यलम् ।
स सेव्यः सर्वथा धर्मः स्वर्गमोक्षसुखप्रदः ॥157॥

अनुप्रेक्षादिकं चैवं स्वचित्ते चिन्तयस्तराम् ।
दृष्टपूर्वभवः स्वामी श्रीनेमिस्त्रिजगद्धितः ॥158॥

स्थितो यावत्तदा तत्र जयकोलाहलस्वनैः ।
पुष्पवृष्टिं प्रकुर्वन्ति ब्रह्मलोकान्तवासिनः ॥159॥

सर्वे लौकान्तिकाः देवाः समागत्य सुभक्तितः ।
तं प्रणम्य जिनं प्राहुर्भो प्रभो भुवनोत्तम ! ॥160॥

सत्यं संसारकान्तारे दुस्तरेन सुखं क्वचित् ।
श्रीमद्भिर्यत्कृतं चित्ते तदेव सुखकारणम् ॥161॥

गृहीत्वा संयमं देव! संसाराम्भोधितारणम् ।
केवलज्ञानमुत्पाद्य सम्बोध्याः भव्यदेहिनः ॥162॥

स्वयं सिद्धस्य देवस्य मोक्षमार्गप्रकाशने।
वराकाः के वयं लोके वक्तारस्तुच्छबोधकाः ॥163॥

परन्तु श्रीमतां देव! पादसेवाविधायिनाम्।
अस्माकं च नियोगोऽयं साध्यते भो जिनेश्वरः ॥164॥

किं जगद्योतने भानोः कोऽपि वक्ता प्रवर्त्तते।
तथा ते ज्ञानिनः स्वामिन् तत्र कोऽपि प्रबोधकः ॥165॥

तथापि त्वं जगद्बंधो! केवलज्ञानभास्करः।
स्वयं भूत्वाऽस्मदादीनां बोधकः सम्भविष्यसि॥166॥

इत्यादिकं महाभक्त्या तं स्तुत्वा[1] श्रीजिनं मुदा।
सारस्वतादयः सर्वे स्वस्थानन्ते ययुः सराः ॥167॥

तदैवागत्य देवेन्द्राः खेचरेन्द्रादिभिर्युताः।
तं प्रणम्य जिनं भक्त्या जयदेवेति घोषणैः ॥168॥

सिंहासनं समारोप्य नदद्वादित्रकोटिभिः।
देवांगनालसद्गीतध्वनिमंगलसंयुतैः[2] ॥169॥

नानातीर्थोदकैः पूर्णैः स्वर्णकुम्भशतैः शुभैः।
अभिषिच्य जगत्सारैर्वस्त्राभरणसंचयैः ॥170॥

लोकैकमण्डनं देवं मण्डयन्ति स्म सादरम्।
चन्दनागुरुकर्पूरैः पुष्पमालादिभिस्तराम् ॥171॥

तदासौ शोभते स्मोच्चैः कुमारो भूषणादिभिः।
मुक्तिकान्ता विवाहार्थं वरो वा भुवनोत्तमः ॥172॥

शिविकां देवं कुर्वाख्यां प्रोद्यत्सद्रत्नभासुराम्।
समारूढो जिनः स्वामी संयमाभिमुखः सुधीः ॥173॥

---

1. श्रुत्वा इति स प्रतौ
2.संयतैः चयैः इति ब प्रतौ

छत्रचामरवादित्रैः सज्जनैः परिमण्डितः ।
नराधिपैः खगैन्द्रैश्च देवेन्द्रैरुद्धृतः क्रमात् ।।174।।

नीतोऽसौ भुवनाधीशः सहस्राम्रवनं शुभम् ।
नानाद्रुमशताकीर्णं सुछायं सुमनोहरम् ।।175।।

तत्र शोभाशतैर्युक्तेः पवित्रे च शिलातले ।
स्थितः स्वामी शुभैर्वाक्यैस्तोषिताखिलसज्जनाः ।।176।।

श्रावणस्य सिते पक्षे चित्रानक्षत्र[1]शोभिते ।
षष्ठीदिने च सायाह्ने सुधीः षष्ठोपवासभाक् ।।177।।

वर्षाणां त्रिशतैर्भुक्ते कौमारे सुमनोहरे ।
सार्द्धं राज्ञां सहस्रेण सावधानः स्वचेतसि।।178।।

त्यक्ताः वस्त्रादिकं सर्वे मनोवाक्काययोगतः ।
पल्यंकासनमास्थाय निःशल्यो मानसेतराम् ।।179।।

नमः सिद्धेभ्यः इत्युच्चैर्भणित्वा परमार्थवित्[2] ।
कृत्वा लोचं स्वहस्तेन दीक्षां जैनेश्वरीं श्रितः ।।180।।

तदैवासौ निजात्मानं संध्यायन् परमो मुनिः ।
संजातः संयमोत्पादिमनःपर्ययबोधभाक् ।।181।।

यथा चिन्तामणिर्दिव्यः शोभते स्वर्णयोगतः ।
तथा नेमिर्मुनी रेजे चतुर्थज्ञानयोगतः ।।182।।

केशांस्तस्य समादाय सुरेन्द्रो मण्डितः सुरैः ।
मत्वा तदा महापूतान् पवित्रे क्षीरसागरे ।।183।।

धृत्वा रत्नपटल्यां च महोत्सवशतैरपि ।
समभ्यर्च्य ततश्चक्रे तत्र धर्मानुरागतः ।।184।।

---

1. नख्यत्र
2.परमार्थिवित् इति स प्रतौ

तदा राजिमतिः सापि कन्याजितसुरांगना ।
श्रुत्वा विलोक्य तत्सर्वं कृत्वा शोकं सुदारुणम् ॥185॥

यथा बुभुक्षितः कोऽपि प्राप्य पञ्चामृताशनम् ।
केनाप्यपट्टते तस्मिन् भोजने भक्षण क्षणे ॥186॥

भवेद्दुःखी तथा गाढं भूत्वा सन्तप्तमानसा ।
पश्चाद्विवेकमाणिक्यं हतमोहांधकारिका ।187॥

ज्ञातजैनेन्द्रसद्धर्मा स्वभावा भोगनिस्पृहा।
महावैराग्य संपन्ना तं नत्वा परमेश्वरम् ॥188॥

हारदोरमहापञ्चरत्नकं कणकादिकम् ।
मुक्तारत्नत्रयोपेतां शुभां दीक्षां समाददे ॥189।.

युक्तं सारकुलस्त्रीणां न्यायोऽयं शुभसूचकः ।
वाचापि प्रतिपन्नाच्च नान्यथा स्यान्मतिः क्वचित् ॥190॥

इति रत्नत्रयोपेतं श्रीमन्नेमिजिनं मुनिम् ।
निश्चलं स्वर्णमेरुं वा सुस्थितं स्वात्मचिन्तने ॥191॥

देवेन्द्राद्याः सुराः सर्वे बलदेवं सकेशवम् ।
अग्रे कृत्वा समभ्यर्च्य नानावस्तुशतैरपि ॥192॥

खेचरेन्द्रादिभिर्युक्ताः परमानन्दनिर्भराः ।
त्वं देवभुवनाधीशो जितमोहमहाग्रहः ॥193॥

ज्ञाततत्त्वव्रजः स्वामी त्वमेव जगदर्चितः ।
निर्जितोद्धत कामारि र्वामा सौख्य पराङ्मुखः ॥194॥

अतस्तुभ्यं नमोस्तूच्चैः श्रीनेमे मुनिसत्तमः ।
इति स्तुत्वा महास्तोत्रैः परमानन्ददायकम् ॥195॥

तं प्रणम्य महाभक्त्या श्रीनेमिं मुनिसेवितम् ।
संस्मरन्तो गुणांस्तस्य स्वं स्वं स्थानं ययुः सुखम् ॥196॥

ध्याने स्थितस्तदा रेजे स स्वामी मुनिभिर्युतः ।
अञ्जनाख्यगिरिर्वोच्चैर्निश्चलः पर्वतैर्वृतः ॥197॥

नीत्वा दिनद्वयं स्वामी शुभध्यानेन तत्त्ववित् ।
पारणा दिवसे देवः सुरासुरनमस्कृतः ॥198॥

इर्याशुद्धिं समातत्वन् पुरीं द्वारावतीं गताः ।
महानन्द तदा कुर्वन् दानिनां पुण्यशालिनाम् ॥199॥

दानिनां च सहस्रेषु सावधानेषु पुण्यतः ।
वरदत्तो महीनाथो लसत्काञ्चनवर्णभाक् ॥200॥

तं विलोक्य जिनं तुंगं चलन्नीलगिरिं यथा ।
निःसंगं वा यथा वायुं पवित्रीकृतभूतलम् ॥201॥

शीतलं चन्द्रबिम्बं वा समागच्छन्तमुत्तमम् ।
शीघ्रं सम्मुखमागत्य त्रिपरीत्यजगद्धितम् ॥202॥

गृहागतं निधानं वा परमानन्दनिर्भरः ।
प्रतिगृह्य महाभक्त्या प्रोच्चैः स्थानं समर्प्य च ॥203॥

स्वर्णभृंगारमादाय स्वच्छतोयेन सम्भृतम् ।
प्रक्षाल्य चरणाम्भोजद्वयं सम्पद्विधायकम् ॥204॥

सुगन्धजलधाराश्रीः चंदनाद्यैः समर्च्य च ।
तं प्रणम्य जगद्वन्द्यं मनोवाक्कायशुद्धिभाक् ॥205॥

अन्नशुद्धिर्गृहे तस्य सर्वदोषविवर्जिता ।
वर्तते सुतरां नित्यं तत्काले च विशेषतः ॥206॥

सत्पुण्यैर्नवभिः कृत्वा दातृसप्तगुणान्वितः ।
ते के सप्तगुणाः दातुः श्रृण्वन्तु सुधियो जनाः ॥207॥

श्रद्धाशक्तिश्च भक्तिश्च सद्विज्ञानमलुब्धता।
दयाक्षमागुणाश्चैते सद्दातुः सम्प्रकीर्त्तिताः ॥208॥

स तस्मै युक्तितो दाता महापात्राय धीमते।
सन्ददौ प्रासुकाहारं शर्मकोटिविधायकम् ॥209॥

सोऽपि स्वामी सुमंदेच्छस्तं विलोक्य पुनः पुनः।
आहारं कृतवांस्तत्र सत्पवित्रं हितं मितम् ॥210॥

अक्षयं दानमित्युच्चैराशीर्वादक्षणे तदा।
आकाशे सुस्थिताः देवाः महाप्रीत्या नृपांगणे ॥211॥

पंचप्रकाररत्नानां[1] तेजसां क्रान्तदिङ्मुखम्।
सार्द्धं द्वादशकोटिभिः वृष्टिं तत्र प्रचक्रिरे ॥212॥

पुष्पवृष्टिं तथा दिव्यां सुगंधीकृतभूतलाम्।
वायुं शीतं सुगन्धं वा मंदगन्धोदकेन च ॥213॥

दुन्दुभीनां महानादं सन्तोषितजगज्जनम्।
साधु साधु पवित्रोऽयं पात्रं श्रीनेमि योगिराट् ॥214॥

भव्यानां यानपात्रं वा तारणे भवसागरे।
पुण्यात्ते गृहमायातो जगच्चूड़ामणिः प्रभुः ॥215॥

धन्यस्त्वं वरदत्ताख्यमहादानपते प्रभो!।
यत्पवित्री चकारौच्चैर्मंदिरं ते जगद्गुरुः ॥216॥

दानं तेऽपि महाशुद्धं निदानं सर्वसम्पदाम्।
भूरिपुण्यानुकारित्वाद्वर्ण्यते केन भूतले ॥217॥

इत्यादिकं महाभक्त्या जगुस्ते शुद्धमानसा।
एवं श्रीवरदत्तोऽसौ भूपतिः पात्रदानतः ॥218॥

1.पंचप्राकारत्नानां इति ब प्रतौ

पञ्चाश्चर्यं सुधीः प्राप यशो व्याप्तमहीतलः ।
सत्पात्रे संगतिर्लोके किं न कुर्याच्छुभं महत् ॥219॥

सत्पुण्यं दुर्गतिर्नाशो यशोराशिः[1] समुज्ज्वलः ।
धनं धान्यं जगत्सारसंपदाः प्रमदाः शुभाः ॥220॥

सुराज्यं रूपमारोग्यं स्थिरायुः सत्कुलादिकम् ।
प्राप्यते पात्रदानेन स्वर्गो मोक्षपदं क्रमात् ॥221॥

ततः सन्तः[2] प्रकुर्वंति पात्रदानं जगद्धितम् ।
यथासौ वरदत्ताख्यो राजा राजीवलोचनः ॥222॥

एवं मत्वा महाभव्यैर्युक्तितो भक्तिपूर्वकम्।
पात्रदानं सदाकार्यं स्वशक्त्या धर्मसिद्धये ॥223॥

ततः सोऽपि कृताहारस्तारको भुवनत्रये।
गत्वा स्वस्थानमत्युच्चैः श्रीमन्नेमिर्मुनीश्वरः ॥224॥[3]

महाव्रतानि पञ्चोच्चैः सार्द्धं गुप्तिभिरुत्तमः।
पञ्चधा समितीर्नित्यं पालयन् मुनिसत्तमः ॥225॥

दर्शनज्ञानचारित्रसद्रत्नत्रयभासुरः ।
उत्तमादिक्षमादिञ्च सद्धर्मं दशधौत्तमम् ॥226॥

पालयामास पूतात्मा रागद्वेषविवर्जितः ।
धीरो वीरोऽतिगम्भीरो मदनद्विपकेसरी ॥227॥

आत्मभावनया नित्यं षडावश्यकमुत्तमम् ।
तस्य तीर्थकरत्वाच्च[4] स्वभावात्समभूत्तराम् ॥228॥

1.मेराशि इति द प्रतौ
2.इति अनुपलब्धः द प्रतौ
3.अप्रतौ 229 पृष्ठः अनुपलब्धः(224- 259 पर्यंतं गाथाः अनुपलब्धाः)
4.तीर्थकत्वाच्च इति अ प्रतौ

परिग्रहग्रहैर्मुक्तः सुरासुरनमस्कृतः ।
दयावल्या समायुक्तो जंगमो वा सुरद्रुमः ॥229॥

संस्मरन् मानसे नित्यमनुप्रेक्षाश्च सर्वदा ।
जीवाजीवदितत्वानां भावयन् सप्तकं सदा ॥230॥

जानन्नित्यं त्रिलोकस्य संस्थितिं शुभदर्शनः ।
क्रोधमानादिनिर्मुक्तो वीतरागो गुणाकरः ॥231॥

चतुः संज्ञा ज्वलद्वह्नेर्ज्वाला वा दुःखदायिनी ।
महासंतोषपानीयैर्नयति स्म क्षयं सुधीः ॥232॥

क्षुत्पिपासादिभिर्गाढं परीषहभटैः प्रभुः।
महाभटो जितो नैव जितास्ते नैव तेऽखिलाः ॥233॥

महावातशतैश्चापि चाल्यन्ते क्षुद्रपर्वताः ।
स्वर्णाचलः क्वचित् किंवा चाल्यतेऽसौ महास्थिरः॥234॥

प्रोषधादितपांस्युच्चैः कुर्वन्निच्छानिरोधकृत् ।
त्रिकालयोगसंपन्नः शुभलेश्यो जगद्धितः ॥235॥

सारसौराष्ट्रदेशस्य मध्ये सतिलकोपमे[1] ।
गिरौ रेवतके तुंगे सुरासुरसमर्चिते ॥236॥

स्वच्छतोये महानानावृक्षपुष्पफलान्विते ।
भव्यानां शर्मदे[2] नित्यं मुक्तिस्थानोपमे शुभे ॥237॥

दुःखसन्तापसन्दोहविनाशे सज्जनोपमे[3] ।
उर्जयन्त इतिख्यात द्वितीयवरनामनि ॥238॥

1.सत्तिलकोपमे इति अ प्रतौ
2.शमदे इति ब प्रतौ
3.ज्जनोपमे इति ब प्रतौ

प्रावृट्[1] काले गलत्तोये तडिद्दामशतान्विते।
जलैः संपूर्णदिग्भागे कंकालवात् शतोत्कटे ॥239॥

गर्जद्धनाघनध्वानैर्बधिरीकृत् दिक्कटे।
निपतच्छिखराकीर्णे निशाभागे भयानके ॥240॥

नानाजन्तुकृतारावे कातराणां सुदुस्तरे।
प्रस्तरे छादिते तोयैरंधकारैर्नभोगणे ॥241॥

प्रावृट् योगान्वितः स्वामी निश्चलस्तत्र मेरुवत्।
जलैः प्रक्षालितांगोऽसौ श्रीमन्नेमिर्मुनीश्वरः[2] ॥242॥

इन्द्रनीलगिरिस्तुंगः श्रृंगो वा सुविराजितः।
दिव्यदेहमहाकान्त्या द्योतिताखिलपर्वतः ॥243॥

इन्द्रनागेन्द्रचन्द्रार्कैः समर्चितपदद्वयः।
निःशंको निस्पृहो गाढ़ो ज्ञानी मौनी निराकुलः॥244॥

शुभध्यानं गृहे तुंगे निःसंगोऽसौ जगद्गुरुः।
चिद्भावनाप्रियोपेतो घनकाले सुखं स्थितः ॥245॥

तच्च किं लक्षणं ध्यानं के भेदास्तस्य चागमे।
किं फलं स्वामिनं केऽस्य चात्र किं चिन्निगद्यते ॥246॥

उत्तमसंहननस्य प्रोच्चैरेकाग्रचिन्तनम्।
अंतर्मुहुर्त्तिकं यत्तद् ध्यानमाहुर्बोधोत्तमाः ॥247॥

आर्त्तरौद्रं तथाध्यानं धर्मध्यानं तृतीयकम्।
शुक्लध्यानमिति ध्यानचतुष्टयमुदाहृतम् ॥248॥

इष्टप्राप्तेरनिष्टोरुविनाशस्य प्रचिन्तने।
वेदनायाः क्षये[1] चिन्ता निदानं सपदादिषु ॥249॥

1.प्राविट् इति ब प्रतौ
2.श्रीन्नेमिमुनीश्वर इति अ प्रतौ

आर्त्तध्यानस्य चत्वारो भेदाः प्रोक्ताः जिनागमे।
एतैः पश्वादिदुःखानां कारणं धर्मवारणम् ॥250॥

अव्रताणुव्रतश्चापि प्रमत्ताः मुनयस्तथा।
आर्त्तध्याने च संज्ञेयास्त्रयस्ते स्वामिनो बुधैः ॥251॥

आर्त्तं- हिंसानन्दो मृषानन्दः स्तेयानंदस्तृतीयकः।
रक्षणं विषयेषूच्चैः रौद्रभेदाश्चतुर्विधाः ॥252॥

नारकादिमहादुःखदायिनस्तीव्रदेहिनाम्।
चतुर्थे पञ्चमे चापि गुणस्थाने मताःबुधैः ॥253॥

रौद्रं- आज्ञापायविपाकोरुसंस्थानविचयाख्यकाः।
धर्मं ध्यानं महाभेदाश्चत्वारो मुनिभिर्मताः ।254॥

सारस्वर्गादिसौख्यानां दायिनःशुभदेहिनाम्।
पूर्वज्ञानधरान्तानां यथागमनिरूपितम् ॥255॥

धर्मं- पृथक्त्वादिवितर्काख्यवीचारः प्रथमो मतः।
एकत्वादिवितर्काख्या वीचारश्च द्वितीयकः ॥256॥

सूक्ष्मक्रियाप्रतिपातिः शुक्ले भेदेस्तृतीयकः।
व्युपरतक्रियानिवर्त्याख्यश्चापि चतुर्थकः ॥257॥

आद्ये पूर्वविदश्चापि महाशर्मविधायिनी।
परे केवलिनः शुक्ले मुक्तिकान्ता सुखप्रदे ॥258॥

आर्त्तं रौद्रं द्वयं ध्यानं दुर्गतेः कारणं हि यत्।
तद्द्वयं दूरतस्त्यक्त्वा तत्त्वज्ञानविदांवराः ॥259॥

स श्रीनेमिमुनिः स्वामी धर्मध्यानगुणाकरः।
पूर्वोक्तसुतपः कुर्वन् षट्पञ्चाशद्दिनानि वै ॥260॥

1.क्षिये इति ब प्रतौ

छद्मस्थेन स्थितो देवो देवदेवार्चितक्रमः ।।
कर्मणां प्रकृतीनां च क्षपणे किञ्चिदुच्यते ।।261।।

(शार्दूलविक्रीडित)

यःकामारिविनाशनैकनिपुणश्चारित्रचूड़ामणिः ।
संसारोरुसमुद्रतारणपरः पोतो जगत्प्राणिनाम् ।
सद्देवेन्द्रनरेन्द्रचन्द्रनिकरैर्विद्याधरैः पूजितः ।
स श्रीनेमिजिनो जगत्त्रयगुरुर्जीयात् सतां भूतले ।।262।।

इतित्रिभुवनैकचूड़ामणिश्रीनेमिजिनपुराणे भट्टारकश्रीमल्लिभूषणशिष्याचार्यश्रीसिंहनन्दिनामांकिते ब्रह्मनेमिदत्तविरचिते स्वामिनो दीक्षाकल्याणकव्यावर्णनो नाम नवमोऽधिकारः ।।9।।

दशमोऽधिकारः

अथ तत्र गिरौ नेमिरूर्जयन्ते महामुनिः।
वेणोरधः स्थितः स्वामी महाध्यानैकतत्परः ॥1॥

आश्विने मासि[1] शुद्धात्मा शुक्लपक्षे विशिष्टधीः ।
चित्रानक्षत्रसंयुक्तो पवित्रे प्रतिपद्दिने ॥2॥

युक्तषष्टोपवासेन पूर्वाह्ने परमार्थवित् ।
कर्माणां प्रकृतीनां च क्षयं कर्तुं समुद्यतः ॥3॥

तत्क्रमो जिनसूत्रेण संक्षेपेण निगद्यते ।
सम्यग्दृष्टिगुणस्थाने पञ्चमे च प्रमत्तके ॥4॥

अप्रमत्तेऽथवा स्थित्वा धर्मध्यानेन च क्वचित् ।
मिथ्यात्वत्रितयेनोच्चैर्दुःकषायचतुष्टयम् ॥5।

नारकायुस्तथा तिर्यग्देवायुः सुभटाग्रणीः ।
क्षिप्त्वा पूर्वं समारूढः क्षपकश्रेणीमष्टमे ॥6॥

अपूर्वकरणस्थाने परिणामविशुद्धभाक्।
अभूतपूर्वको भूत्वा तत्वज्ञानविदांवरः ॥7॥

अनिवृत्तिगुणस्थाने द्रव्यपर्यायभेदकान् ।
पृथक्त्वेन सुधीर्ध्यायन्नर्थव्यंजनकादिभिः ॥8॥

आद्यः शुक्लेन चात्मानं नवमे परिभावयन् ।
नवभागेषु तत्रैव षट्त्रिंशत् प्रकृतीः क्षिपत् ॥9॥

समातपे चतुर्जाती रेकाक्षविकलत्रयाः ।
स्त्यानगृद्धिं तथा स्वामी प्रचलाप्रचलां प्रभुः ॥10॥

---

1. मासे इति ब प्रतौ

निद्रानिद्रां तथा श्वभ्रं गतिगत्यान्पूर्विके ।
स्थावरत्वं च सूक्ष्मत्वं तिर्यग्युग्मं यथाक्रमम् ॥11॥

उद्योतं प्रथमे भागे नवमे षोडशप्रमाः ।
नयति स्म क्षयं स्वामी सर्वकर्मारिमर्मवित् ॥12॥

ततः क्लैव्यं ततः स्त्रैणं ततो हास्यादिकं च षट् ।
पुंवेदं च ततः षष्ठे भागे क्षिप्त्वा सुयुक्तितः ॥14॥

ततः सञ्ज्वलनं क्रोधं मानं मायां पृथक् पृथक् ।
अनिवृत्तगुणस्थानं नीत्वा चैवं महोद्यमी ॥15॥

ततः सञ्ज्वलनं लोभं निहत्य दशमे सुधीः ।
सूक्ष्मादिसाम्परायाख्ये सञ्जातोऽसौ कषायहा ॥16॥

एवं जित्वा महामोहकर्मारातिं भटाग्रणीः ।
अभून्महाबली तत्र यथा सैन्याधिपे हते ॥17॥

गत्वा क्षीणकषायाख्यं गुणस्थानं गुणाकरः ।
द्वितीयेन तदा स्वामी शुक्लध्यानेन निर्मदः ॥18॥[1]

उपान्त्यसमये तत्र निद्रां स प्रचलां मुनिः ।
दूरतश्चालयित्वाशुः निश्चलो मेरुवत् स्वयम् ॥19॥

अन्ते च समये तत्र चक्षुर्दर्शनकं तथा ।
अचक्षुरवधी चापि केवलं च चतुर्विधाः ॥20॥

दर्शनप्रकृतीश्चैता भूरिसंसारकारिकाः ।
मतिश्रुत्वावधिज्ञानं मनःपर्ययकेवलम् ॥21॥

पञ्चधावरणान्येषां चक्षुषोश्चीवरं यथा ।
दानादिपञ्चविघ्नानां प्रकृतीः पञ्चदुःसहाः ॥22॥

---

1. *अ प्रतौ 232 पृष्ठः अनुपलब्धः (9-18 गाथाः अनुपलब्धाः)*

एवं योगीश्वरो नेमिश्चतुर्णां घातिकर्मणाम् ।
त्रिषष्टीं प्रकृतीं हत्वा केवलज्ञानमुत्तमम् ॥23॥

सम्प्राप्तपरमानन्दं लोकालोकप्रकाशकम् ।
सयोगाख्यगुणस्थानवर्त्ती स्वामी बभूव सः ॥24॥

सुस्थितो गगने शुद्धे विशुद्धः पूर्णचन्द्रवत् ।
तत्प्रभावाज्जगत्सर्वं जातं सुप्तोछितं यथा ॥25॥

दिशाः प्रसन्नतां भेजुर्जयकोलाहलैस्तदा ।
पूरितं भुवनं सर्वं महानन्दो भवत्क्षितौ ॥26॥

आसनान्यमरेंद्राणां कम्पितान्यखिलानि च ।
सूचयन्ति स्म वा तेषां जिनेन्द्रयजनोत्सवम् ॥27॥

सर्वकल्पेषु घंटानां निनादो निर्गतस्तराम् ।
इन्द्रादीनां महानन्दं प्रकुर्वन् हृदयाम्बुजे ॥28॥

ज्योतिर्लोकेऽभवत् सिंहध्वनिः सम्पूरिताखिलः।
व्यन्तराणां गृहेषूच्चैर्महानन्दकरवस्तथा[1] ॥29॥

भावनानां महाशंखनिनादो भवनेषु च ।
सूचयन् जिनकैवल्यकल्याणं समभूत्तराम् ॥30॥

सर्वत्र सर्वदेवानां कल्पवृक्षाःगृहे गृहे ।
किरंति स्म महापुष्पवृष्टिं वा श्रीजिनार्चने ॥31॥

एवं निजैर्निजैश्चिह्नैः परमानन्ददायकैः ।
इन्द्रादयस्तु ते सर्वे श्रीमन्नेमिजिनेशिनः ॥32॥

ज्ञात्वोच्चैः[2] केवलज्ञानप्रकाशं भुवनातिगम् ।
नन्ददेवेति जीवेति पालयेति प्रमोदतः ॥33॥

1.महानकरवस्तथा इति ब-स प्रतयोः

2.ज्ञातोच्चैः इति द प्रतौ

तं नत्वा परया भक्त्या श्रीमन्नेमिजिनेश्वरम् ।
चक्रिरे तस्य पूजार्थं मनः परमपावनम् ।।34।।

तथा सौधर्मनाकेशः कुबेरं प्रतिसञ्जगौ ।
समवादिसृतिजिष्णो कुरु त्वं भो! मनोहरम्।।35।।

तदादेशं समासाद्य धनदो भक्तिनिर्भरः।
समवादिसृतिं चक्रे जगच्चेतोनुरञ्जिनीम् ।।36।।

या शोभा विहिता तत्र कुबेरेण महाधिया।
सा शोभा वर्ण्यते केन जगतां प्रीतिदायिनी।।37।।

तथा बुद्धिं विनाप्यत्र भव्यानां शर्महेतवे ।
श्रीजिनेन्द्रसभाशोभां संक्षेपेण गदाम्यहम् ।।38।।

इन्द्रनीलमणेर्भूमिर्विशाला विमलाभवत् ।
इन्द्रादीनां मनोनेत्रपरमानन्ददायिनीम् ।।39।।

धनुः पञ्चसहस्राणि प्रोत्तुंगा प्रविराजिताः ।
सा सोपानसहस्रैस्तु विंशत्या शर्मदायिभिः ।।40।।

प्रभोरास्थानभूमिः सा सरेजे भुवनोत्तमा ।
महातेजोमयी शुद्धा जगच्छ्रीदर्प्पणोपमा ।।41।।

पञ्चधा रत्नधूलीभिर्निर्मितः सुमनोहरः ।
धूलीशाल इतिख्यातस्सालस्तत् परितोऽभवत् ।।42।।

महातेजोमयस्तुंगो भव्यानां प्रमदप्रदः ।
स बभौ वर्त्तुलाकारस्तल्लक्ष्मीकुण्डलोपमः ।।43।।

चतसृष्वपि तद्दिक्षु काञ्चनस्तम्भलम्बिताः ।
रत्नमुक्ताफलानां च तोरणाः प्रविराजिताः ।।44।।

चतुर्दिक्षु ततो मध्ये मानस्तम्भाः मनोहराः ।
प्रोत्तुंगाः स्वर्णनिर्माणाः सम्बभूबुर्जगद्धिता ।।45।।

चतुर्गोपुरसंयुक्तः शालत्रितयशोभिताः ।
स्वर्णषोडशसोपानैर्युक्तपीठो परिस्थिताः ।।46।।

त्रिमेखलमहापीठे सुस्थितास्ते विरेजिरे ।
स्तम्भामूर्द्धिलसच्छत्रत्रयेण क्षितिपा यथा ।।47।।

सचामरध्वजोपेताः पवित्रीकृतभूतलाः ।
शोभन्ते स्म महामानस्तम्भास्ते श्रीजिनेशिनः ।।48।।

दुर्दृशां स्तम्भयन्त्युच्चैर्यन्मानं दर्शनक्षणे ।
मानस्तम्भः इति प्रापुर्नाम तेन्वर्थतां गतम् ।।49।।

हिरण्यप्रतिमास्तेषां बुध्नभागेषु सुस्थिताः ।
शक्रादयो जिनेन्द्राणां पूजयन्ति स्म भक्तितः ।।50।।

इन्द्रेण निर्मितत्वाच्च ध्वजाद्यैः परिशोभिताः ।
प्राप्तेन्द्रध्वजनामानः स्तम्भास्ते रेजिरेतराम् ।।51।।

स्तम्भानामयतस्तत्र गीतवादित्रनर्त्तनम् ।
कुर्वन्ति स्म सदा प्रीत्या देवाः खेचरभूचराः ।।52।।

प्रत्येकं च प्रतिस्तम्भं चतुर्दिक्षु मनोहराः ।
चतस्रो जलसम्पूर्णाः वाप्यः संशोभिताः शुभाः ।।53।।

प्रोत्फुल्लकमलैश्चारु नीलोत्पलशतैरपि ।
महाकल्लोलहस्तैस्ताः श्राविकाः वा धृतार्धिकाः ।।54।।

स्फाटिकोच्चतटीयुक्ताः मणिसोपानसंयुताः ।
वापिकाः भव्यजीवानां जह्रुस्ताः मानसन्तराम् ।।55।।

नानाहंसमयूरादिपक्षिणां चारुनिःस्वनैः ।
गायन्त्यो वा जिनस्यैताः सुगुणाश्चन्द्रनिर्मलान् ।।56।।

पूर्वस्तम्भस्य पूर्वादिः दिक्षु वाप्योऽभवंस्तराम् ।
नन्दानन्दोत्तरानन्दवतीनन्दादिघोषिकाः ।।57।।

तथैव दक्षिणस्तम्भे सरस्यस्ता विरेजिरे।
विजया वैजयन्ती च जयन्ती चापरिजिताः ॥58॥

पश्चिमस्तम्भके नाम्ना शोकासुप्रतिबुद्धिकाः।
कुमुदापुण्डरीकाख्याः वाप्योऽपि प्रविराजिताः ॥59॥

उत्तरस्तम्भभागिन्यो ह्रदयानन्दिका पुरः।
महानन्दसुप्रबुद्धा वापी चापी प्रभंकरी ॥60॥

षोडशप्रमितावाप्यो रेजुस्ताः निर्मलास्तराम्।
भव्यानां शर्मदायिन्यो भावनाः वा जिनेशिनः ॥61॥

वापीं वापीं प्रति स्वच्छतोयेनैव प्रपूरितम्।
पादप्रक्षालनार्थं च कुण्डलद्वयमभूत्परम् ॥62॥

तैः सकुण्डैर्महास्वच्छतोयेन परिपूरितैः[1]।
संयुतास्ताः बभुबुर्वाप्यः सपुत्राः वा कुलस्त्रियः ॥63॥

स्तोकान्तरं ततो गत्वा मध्ये वीथी च विसृता।
सञ्जाता परमानन्ददायिनी वा सतां मतिः ॥64॥

ततो रत्नतटोपेताः खाता सत्तोयसंभृताः।
अत्यन्तनिर्मलाः रेजे स्वर्गं गेव मनोहराः॥65॥

निर्मलाः चाति गम्भीराः खातिकाः सा बभौ तदा।
शीतला वा जिनेन्द्रस्य वाणी सन्तापहारिणी ॥66॥

नानाहंसमयूराद्यैः पक्षिवृंदैः सकूजितैः।
रेजे सा खातिका भक्त्या कुर्वन्ती वा स्तुतिं प्रभोः ॥67॥

ततोऽभ्यंतरभूभागे बलयाकृतिराबभौ।
प्रोल्लसत्प्रसवाकीर्णा पुष्पवाटी मनोहरा ॥68॥

1.प्रपूरितः इति ब प्रतौ

सर्वर्त्तुकुसुमोपेता सुगन्धीकृत[1] दिग्मुखा।
प्रभोस्तनुरिव व्यक्तं व्यञ्जनाद्यैर्बभौ च सा ॥69॥

यत्र क्रीडादयो रम्याः शोभन्ते स्म जगद्धिताः।
सुपुष्पफलवृक्षौघैः[2] सत्यं ते भूभृतो यथा ॥70॥

यत्र वल्लीगृहेषूच्चैश्चन्द्रकान्तशिलास्ततः॥
विश्रामाय[3] सुरेन्द्राणां निर्मलाः वा सतां धियः[4] ॥71॥

पुष्पवल्ली वनं रम्यमेवं तच्छोभितं प्रभोः।
प्रमोदात्पवनेनोच्चैर्नृत्यं कुर्वदिवोत्तमम् ॥72॥

गन्धासक्तैः सदाभृंगैः संगुञ्जद्भिर्मनोहरम्।
प्रभोः स्तुतिं प्रकुर्वद्वा तद्रेजे सुमनो वनम् ॥73॥

ततो मार्गं कियन्तं च गत्वा स्वर्णमयोऽभवत्।
प्राकारः[5] प्रथमस्तुंगो जगच्चेतोनुरञ्जकः ॥74॥

दिव्यकाञ्चननिर्माणः स सालः शोभितस्तराम्।
प्रोत्तुंगो वर्त्तुलाकारो[6] गिरिर्वा मानुषोत्तरः ॥75॥

महारत्नादिसंजातैर्नरसिंहादियुग्मकैः।
प्राकारः स तदा रेजे नटाचार्योपमो महान्[1] ॥76॥

प्रस्फुरद्रत्नसत्कान्त्या शालोऽसौ[2] भुवनोत्तमः।
इन्द्रश्चापश्रियं तुंगः सरेजे वा हसन् भृशम्[3] ॥77॥

---

1. सुगंधाकृत इति ब प्रतौ
2. वक्षौघेः इति ब प्रतौ
3. विश्रामय इति ब प्रतौ
4. शतांधियः इति ब प्रतौ
5. प्रकारः इति द प्रतौ
6. वर्त्तलाकारो इति द प्रतौ
7. महत् इति द प्रतौ
8. शालासौ इति स प्रतौ
9.वाहनसन् इति द प्रतौ

तच्चतुर्दिक्षुरौप्याणि गोपुराणि विरेजिरे ।
उज्ज्वलानि विचित्राणि तल्लक्ष्मीवदनानिवा ।।78।।

तानि त्रिभूमियुक्तानि गोपुराणि चकासिरे।
प्रोत्तुंगानि विशुद्धानि रत्नत्रयमयानि वा ।।79।।

पद्मरागमयैः प्रोच्चैः शिखरैस्तानि रेजिरे ।
हिमवच्छिखराणीव गोपुराणि महान्ति वै ।।80।।

गोपुरेषु सदा तेषु श्रीमन्नेमिजिनेशिनः ।
गायन्ति स्म जगत्सारं यशस्ते सुरगायनाः[1] ।।81।।

भृंगारकलशादीनि प्रत्येकं तेषु चाभवत् ।
अष्टोत्तरं शतं दिव्यं मंगलद्रव्यसम्पदः .।।82।।

रत्नाभरणसन्दोहैस्तोरणास्तेषु भासुराः ।
शोभन्ते स्म जगत्सारसन्दोहाः वा समागताः ।।83।।

कालादिनिधयश्चापि प्रत्येकं गोपुरेष्वलम् ।
सञ्जाता रत्नसम्पूर्णा जगच्चेतोऽनुरञ्जकाः ।।84।।

भान्ति स्म निधयस्तेषु गोपुरेषु मनोहराः ।
सन्त्यक्ता प्रभुणा तं वा सेवितुं भक्तितः श्रिता ।।85।।

तोरणानां तथा तेषामुभयोः पार्श्वयोः शुभम् ।
नाट्यशालाद्वयं रेजे प्रत्येकं सर्वदिक्षु च ।।86।।

तिसृभिः तिसृभिश्चापि भूमिभिर्नाट्यमण्डपौ।
शोभितौ संवदंतौ वा मुक्तेर्मार्गं[2] त्रयात्मकम् ।।87।।

काञ्चस्तम्भसम्भूतौ शुद्धस्फटिकभित्तिकौ ।
तौ नाट्यमण्डपौ रत्नशिखरौ रेजतुः प्रभोः।। 88।।

---

1. सुरगायिनाः इति ब प्रतौ
2. मुंक्तेमार्गं इति ब प्रतौ

सुरस्त्रियः[1] सदा तेषु नाट्यमण्डपकेषु च।
कुर्वन्ति स्म महाभक्त्या नृत्यं चेतोऽनुरंजनम् ।।89।।

श्रीमन्नेमिजिनेन्द्रस्य गुणांश्चन्द्रकरोज्वलान्।
गायन्ति स्म प्रमोदेन काश्चित्ताः दिव्यमूर्त्तयः ।।90।।

किं नराणां महागीतैः सार्द्धं वादित्रकोटयः ।
नित्यं तत्र जयन्ति[2] स्म निर्घोषं जलधेस्तराम् ।।91।।

गीयन्ते श्रीजिनेन्द्रस्य गुणाःयत्र जगद्धिताः[3] ।
भक्तितो देवगन्धर्वैः नृत्यन्ति स्म सुरांगनाः ।।92।।

इन्द्रादयो महाप्रीत्या प्रेक्षिणो[4] देवकोटिभिः ।
तत्रोत्पन्ना महाशोभा वर्ण्यते केन भूतले ।।93।।

ततो धूपघण्टौ द्वौ द्वौ सुगन्धीकृतदिग्मुखौ।
वीथीनामुभयोर्जातौ पार्श्वयोः सुमनोहरौ।।94।।

महाकृष्णागुरूत्पन्ने धूपधूमोलसंस्तराम् ।
सम्बभौ नभसि व्यक्तं स दिव्यो वा घनागमः ।।95।।

सधूमः शोभितो गच्छन् कृष्णवर्णे नभस्तले ।
पुण्यप्रभावसन्त्रस्तः पापपुञ्जो व्रजन्निव ।।96।।

तत्सुगन्धितया कृष्टैः कृष्णवर्णैर्मधुव्रतैः ।
सधूमनिवहो व्योम्नि द्विगुणीभावमाश्रितः ।।97।।

ततः शोकवनं सप्तच्छदानां चक्रमाद्वनम् ।
चाम्पकं च वनं चाम्रवणं पूर्वादिदिक्ष्वभूत् ।।98।।

चत्वारीति वनान्युच्चैर्बभुस्तानि तदा प्रभुम् ।
नन्दनादिवनान्येवं सेवितुं व गतानि तम् ।।99।।

1.पुरस्त्रियः इति ब-द प्रतयोः
2.जयति इति अ प्रतौ
3.गुणायत्रजगद्विताः इति ब प्रतौ
4.प्रक्षिणो इति अ प्रतौ

शोभन्ते स्म वनेषूच्चैर्वृक्षास्ते सफलाः सदा ।
सुछायाः सुखदास्तुंगाः क्षितीशाः वा मनोहराः ॥100॥

नानापक्षिशतोत्पन्नैः सदाशब्दैर्मनोहरैः ।
वृक्षास्तेऽपि जिनेंद्रस्य स्तुतिं कर्त्तुमिवोद्यताः ॥101॥

विगलत्कुसुमैर्दिव्यैः प्रीणितभ्रमरव्रजैः ।
रेजुस्ते पादपाः नित्यं कुर्वन्तो वा जिनार्चनम् ॥102॥

वनेषु तेषु सञ्जाताः रत्नस्वर्णादिनिर्मिताः ।
वापीपुष्करणीकूपतडागाद्याः जलाशयाः ॥103॥

स्वच्छतोयेन सम्पूर्णाः पद्मलक्ष्मीविराजिताः ।
शुद्धाः जलाशयास्तेवै सज्जनाः वा विरेजिरे ॥104॥

क्वचित्तेषु वनेषूच्चैश्चतुष्वपि मनोहराः ।
नानाभूमिसमुत्तुंगाः महाप्रासादपंक्तयः ॥105॥

सम्बभूवुः क्वचित्तेषु दिव्यक्रीडाद्रयःशुभाः
शक्रादयो रमंति स्म यत्र देवीसमन्विताः ॥106॥

तथा तेषु वनेषूच्चैः सरितो वारि जलैर्बभुः ।
सदा चारुपयःपूर्णाः सपुत्राः वा सुयोषितः ॥107॥

महापद्माकरास्तत्र शोभन्ते स्म सुनिर्मलाः ।
जगत्तापहराः नित्यं सन्तो वो निर्मलाशयाः ॥108॥

अशोकं तद्वनं रेजे जनानां शोकनाशनम् ।
शीतलं सुखदं नित्यं सतां वा शुद्धमानसम् ॥109॥

सप्तछदं वनं रम्यं सप्तसप्तछदैर्युतम् ।
श्रीमज्जिनागमेश सप्ततत्वानीव ब्रुवद्बभौ ॥110॥

चापकं च वनं रेजे विकसत्कुसुमोत्करम् ।
कुर्वद्वा श्री जिनेन्द्रस्य प्रदीपैः पादपूजनम् ॥111॥

बभौ चाम्रवणं रम्यं कोकिलाकलनिस्वनैः ।
श्रीमन्नेमिजिनस्योच्चैः कुर्वाणं वा स्तुतिं मुदा ॥112॥

अशोकवनमध्येऽभूदेकोऽशोकतरुर्महान् ।
स्वर्णत्रिमेखलापीठे भूपतिर्वा मनोहरः ॥113॥

चतुर्गोपुरसंयुक्तसालत्रयविराजितः ।
छत्रचामरभृंगारस्वर्णकुम्भादिभिर्युतः ॥114॥

स चैत्यपादपो[1] रेजे चारु हेममयो महान् ।
वज्रमूलो दृढो गाढं सा दृष्टिर्वा जिनागमे ॥115॥

गारुडोपलपत्रौघैः प्रसूनैः पद्मरागजैः।
बभौ चैत्यद्रुमो नित्यं भव्यानां चित्तरञ्जकः ॥116॥

तत्पुष्पप्रचुराः मोदसंशक्त[2] भ्रमरा रवैः ।
सन्तोषाच्चैत्यवृक्षोऽसौ चक्रे वा संस्तुतिं प्रभो ॥117॥

महाघण्टानिनादेन घोषयन्निव निर्मलम् ।
मोहाराति जयाज्जातं यशो नेमिजिनेशिनः ॥118॥

ध्वजां शुकैरशोकोऽसौ पवनां[3]दोलितैर्मुदा ।
स्फेटयित्वा[4] बभौ गाढं जनानां पापसञ्चयम् ॥119॥

महामुक्ताफलोद्भूतमालालंकृतमद्भुतम् ।
छत्रत्रयं धरन् मूर्ध्नि स रेजे भूपतिर्यथा ॥120॥

बुध्नभागेस्य जैनेन्द्रीः प्रतिमाः पापनाशनाः ।
चतुर्दिक्षु सुरेन्द्राद्याः महाभक्त्या हिरण्यमयी ॥121॥

क्षीराम्भोधिपयः पूरैरभिषिंच्य जगद्धिताः ।
पूजयन्ति स्म सम्प्रीत्या सारगन्धादिवस्तुभिः ॥122॥

1.स्वचैत्य इति स प्रतौ

2.शंशक्त इति ब प्रतौ

3.वपनां इति द प्रतौ

4. स्फेटयन्ना इति अ,ब प्रतयोः

महासुगन्धपुष्पौघैर्मनोभक्तिसुनिर्मलैः।
पुष्पाञ्जलिं प्रयच्छन्ति भक्तितः स्म प्रमोदतः ॥123॥

ततस्तेऽपि सुराधीशाः संस्तुवन्ति स्म नित्यशः ।
जिनेन्द्रप्रतिमाः पूतास्ताः पुनः परमार्थतः ॥124॥

केचिच्चैत्यद्रुमस्याग्रे तत्र देवाः प्रियान्विताः ।
नृत्यन्ति स्म प्रभोर्नित्यं गायन्ति स्म गुणोत्करान् ॥125॥

यथाशोकवनेऽशोकचैत्यवृक्षोऽभवन् महान् ।
तथा स्वस्वप्रजातीयवनेष्वन्येषु सोऽभवत्[1] ॥126॥

अशोकः सप्तपर्णाख्यश्चंपकश्चाम्रनामभाक् ।
चैत्यधिष्ठितबुध्नत्वाच्चैत्यवृक्षे मताबुधैः ॥127॥

चत्वारस्ते जिनेन्द्राणां प्रतिमाभिर्विराजिताः ।
शक्रादिभिः प्रपूज्यत्वाज्जिनायन्ते स्म पादपाः ॥128॥

इत्येवं महिमोपेतं महावनचतुष्टयं ।
तद्रेजे शर्मदं जैनं यथानन्तचतुष्टयम् ॥129॥

चत्वारीतिवनान्युच्चैस्तानि पुष्पफलोत्करैः ।
सत्कुलानीव भव्यौघान् प्रीणयन्ति स्म सर्वदा ॥130॥

यस्यैवं विभवो लोके वृक्षाणां समभून्महान् ।
तस्य श्रीजिननाथस्य महिमा केन वर्ण्यते ॥131॥

तद्वनं परितो वेदी कनत्काञ्चननिर्मिताः ।
नानारत्नशतैर्युक्ताः चतुर्भि गोपुरैरभूत् ॥132॥

दिव्यकान्त्या हसन्तीव शक्रचापश्रियं सदा ।
वेदिका सा बभौर्दिव्यपरमानन्दकारिणी ॥133॥

1.शोभवत् इति पाठः अ प्रतौ

राजितानि[1] चतुर्दिक्षु गोपुराणि बभुस्तराम् ।
तस्यामष्टविधव्यक्तमंगलद्रव्यसम्पदा ॥134॥

रत्नानाभरणसञ्जातैस्तोरणैस्तानि रेजिरे ।
गोपुराणि जिनास्थानं लक्ष्मीदेव्याननानि वा ॥135॥

घण्टाटण्कारसंदोहैस्तानि श्रीमज्जिनेशिनः ।
कुर्वन्ति स्म स्तुतिं वोच्चैः परमानन्दनिर्भरात् ॥136॥

देवदेवांगनास्तत्र गोपुरेषु मनोहरम् ।
गीतं नृत्यं स वादित्रं[2] कुर्वन्ति स्म जगद्धितम् ॥137॥

ततो वीथ्यन्तरे हेममहास्तम्भाग्रलम्बिताः ।
सञ्जातास्त्रिजगच्चेतः रञ्जिकाः ध्वजपंक्तयः ॥138॥

रेजुस्ते मणिपीठेषु ध्वजस्तंभाः मनोहराः ।
प्रोत्तुंगास्त्रिजगन्मान्याः पवित्राः वा नराधिपाः ॥139॥

अष्टाशीत्यंगुलान्येषां रुद्रत्वं मुनिभिर्मतम् ।
पञ्चविंशतिश्चापैश्च स्तम्भानामन्तरं यथा ॥140॥

प्राकाराः वेदिकाश्चैत्यवृक्षाः सिद्धार्थपादपाः ।
स्तूपाः सतोरणामानस्तंभाः[3] स्तम्भाध्वजोद्भवाः ॥141॥

श्रीमत्तीर्थकरोत्सेधादुत्सेधेनद्विषड्गुणाः ।
उन्नतास्तेषु रुद्रत्वं ज्ञेयं तद्योग्यतामितम् ॥142॥

वनानां पर्वतानां च गृहाणां च विशेषतः ।
बुधैस्तदेव विज्ञेयं प्रमाणं ज्ञानलोचनैः ॥143॥

पर्वतानां च रुद्रत्वमुत्सेधादष्टसंगुणम् ।
स्तूपानां तु समाप्रोक्तं रुद्रत्वं सातिरेककम् ॥144॥

1.राजितानि इति स प्रतौ, राजातानि इति ब-द प्रतयोः
2.सुवादित्रं इति अ प्रतौ
3.इति पदं ब प्रतौ अनुपलब्धौ

पृथुत्वं वेदिकानां च स्वोत्सेधस्य चतुर्थकम् ।
ज्ञातव्यं श्रीजिनेन्द्राणां पुराणपरिवेदिभिः ॥145॥

ध्वजास्ते दशभेदा स्युः स्वर्णस्तम्भाग्रलम्बिनः ।
सच्चिह्नो वस्त्रचिह्नश्च मयूरकमलान्वितौ ॥146॥

हंसचिह्नो ध्वजो वै न तोयकेतु[1] र्हरिध्वजः ।
वृषभध्वज इत्युच्चैर्हस्तिचक्रं ध्वजौ परौ ॥147॥

एवं दशप्रकारास्ते ध्वजाः श्रीमज्जिनेशिनः ।
एकैकस्यां दिशि ज्ञेयाः शतं चाष्टोत्तरं पृथक् ॥148।

एकस्यां दिशि ते रेजुः ध्वजास्तत्र सहस्रकम् ।
असीति सयुतं[2] रम्याः प्रोक्तं शास्त्रविदां वरैः ॥149॥

चतुर्दिक्षु मिलित्वा ते ध्वजाः सर्वे विरेजिरे ।
चत्वारीति सहस्राणि विंशतिश्च शतत्रयम् ॥150॥

इत्येवं केतवो वातां दोलिताः खे बभुर्बिभोः ।
केवलज्ञानपूजार्थमाह्वयन्ति स्म वामरान्[3] ॥151॥

ततोभ्यन्तर भूभागे सालो रूप्यमयो महान् ।
द्वितीयो विशदो रेजे यशोराशिरिव प्रभोः ॥152॥

पूर्ववद्गोपुरादौ च वर्णनात्रापि पण्डितैः ।
विज्ञेया त्रिजगद्भव्यनेत्रानन्दकरी परा ॥153॥

महारत्नसमुत्पन्नदिव्यातरणतोरणैः ।
गोपुराणि बभूस्तानि चतुर्दिक्षु महान्ति च ॥154॥

प्रत्येकं गोपुरेषूच्चैः सञ्जाता निधयो नव ।
साररत्नादिसम्पूर्णा भव्यानां वा मनोरथाः ॥155॥

1.केतु इति शब्दः ब प्रतौ नास्ति

2.संजुतां इति ब प्रतौ

3.चामरान् इति अ प्रतौ

गोपुरं प्रति चात्रापि नाट्यशालाद्वयं महत् ।
चारुधूपघटीद्वन्द्वं महावीथीद्वयोरभूत् ॥156॥

ततो वीथ्यन्तरेषूच्चैः कल्पवृक्षवनं बभौ ।
तद्व्यजाद्भोगभूमिर्वा प्रभुं सेवितुमागताः ॥157॥

तत्र कल्पद्रुमास्तुंगाः सुछायाः[1] फलाः[2] सदा ।
दशप्रभेदास्ते रेजुः सद्धर्माः वा सुखप्रदाः ॥158॥

फलान्याभरणान्युच्चैर्दिव्यवस्त्राणि पल्लवाः ।
पुष्पमालाः प्रहोराश्च यत्र तद्वर्ण्यते किमु ॥159॥

यत्र शक्रादयो देवाः सांगनाश्च चतुर्विधाः ।
स्वर्गमुक्ताः धृतिं भेजुस्तत्र[3] का वर्णना परा ॥160॥

तत्तेजसा तमःस्तोमो गतः क्वापि न वीक्षितः ।
श्रीजिनेन्द्रप्रभावेण यथा मिथ्यात्वसञ्चयः ॥161॥

तद्वनेऽपि चतुर्दिक्षु दिव्याः सिद्धार्थपादपाः ।
सिद्धार्चाभिः समायुक्ताः बुध्नभागेषु रेजिरे ॥162॥

चैत्यद्रुमेषु या शोभा शालत्रितय[4] गोपुरैः ।
छत्रचामरकेत्वाद्यैः सात्र नित्यन्तरुष्ठलम् ॥163॥

एते कल्पद्रुमाः किन्तु वाञ्छितोरुफलप्रदाः ।
तस्मादत्र वने चायं विशेषो वर्णितो बुधैः ।164॥

कल्पवृक्षवने चात्र क्वचित् क्रीडाचलाः क्वचित् ।
वाप्यो नद्योऽभवन् रम्याः सभासारगृहादयः ॥165॥

तेषु शक्रादयो देवाः सांगनाः खेचराः नराः ।
कुर्वन्ति स्म सदा क्रीडां परमानन्दनिर्भराः ॥166॥

1.स्वछायाः इति ब प्रतौ

2.सफली इति ब प्रतौ

3.भेदुस्तत्र इति द प्रतौ

4.सालान्वित इति स प्रतौ

समन्ताद्वनं वेदी बभौ काञ्चननिर्मिता ।
चतुर्गोपुरसंयुक्ता सुदृढा वा मुनेः क्रिया ॥167॥

तस्याश्च गोपुरेषूच्चैः रत्नाभरणतोरणाः ।
बभूवुर्मंगलद्रव्यसम्पदाः सम्पदा प्रदाः ॥168॥

ततोऽभ्यन्तरभूभागं गत्वा रेजे जगद्धिता ।
प्रासादपंक्तिरुत्तुंगा नानाभूमिविराजिता ॥169॥

प्रासादा द्वितलाः केचित् केचित्ते त्रिचतुस्तलाः ।
वज्राधिष्टानसंयुक्ता हेमस्तंभैः समुद्भवाः ॥ 170॥

[1]चन्द्रकान्तशिलासारभित्तयस्ते विरेजिरे ।
नानारत्नसहस्रेश्च चित्रताः[2] सुमनोहराः ॥171॥

कूटागारैः सभागेहैः प्रेक्षाशालादिभिर्युता ।
सा प्रासादततिर्गाढं सरेजे भुवनोत्तमाः ॥172॥

महाशय्यासनै[3]र्दिव्यैः सोपानैः सुमनोहरैः ।
प्रासादास्ते जयन्ति स्म स्वर्विमानशुभश्रियम् ॥173॥

तेषु प्रीत्या सुराधीशाः किं नराः सुमनोहरा।
पन्नगाः परमानन्दैः खेचराः भूचराः पराः ॥174॥

परे देवाश्च देव्यश्च[4] रमन्ते स्म सदासुखम् ।
केचिद्गायन्ति गन्धर्वा यशः शुभ्रं जिनेशिनः ॥175॥

नानावादित्र सन्दोहं ताडयन्ति स्म केचन ।
काश्चिन्नृत्यन्ति[5] कामिन्यः पश्यन्ति स्म सुराः शुभाः ॥176॥

1.चंद्रकांतिशिलासार इति ब प्रतौ
2. विचित्राः इति स प्रतौ
3.महाय्यासनै इति अ प्रतौ
4.देव्यश्च इति अ प्रतौ
5.काश्चनृत्यंती इति अ प्रतौ

केचिन्नेमिजिनेन्द्रस्य गुणांश्चन्द्रकरोज्वलान् ।
श्रृण्वन्ति स्म महाभक्त्या देवाद्याः परया मुदा ॥177॥

ततो वीथ्यां चतुष्कोणेषूत्पन्नाः सुमनोहराः ।
स्तूपा नवनवव्यक्तं पदार्था वा विरेजिरे ॥178॥

पद्मरागमयास्तुंगा जिनेंद्रप्रतिमान्विताः ।
छत्रचामरसत्केतुमंगलद्रव्यसंयुताः ॥179॥

स्तूपानामंतरेषूच्चैः प्रोल्लसद्रत्नतोरणाः ।
बभूवुर्भव्यजीवानां मनोनयनवल्लभाः ॥180॥

स्तूपेषु तेषु जैनेन्द्रीः प्रतिमा पापनाशनाः ।
महातीर्थजलैर्गन्धैरक्षतैः कुसुमोत्करैः ॥181॥

पूतपीयूषपिंडैश्च दीपैर्धूपैर्महाफलैः ।
इन्द्रादयः समभ्यर्च्य संस्तुवन्ति स्म निर्मदा ॥182॥

देवांगना जिनेंद्राणां मग्नतस्तत्र[1] भक्तितः ।
कुर्वन्ति स्म महादिव्याः गीतनृत्यादिकं शुभम् ॥183॥

तथा किं नरगन्धर्वदेवाः श्रीमज्जिनेशिनः ।
यशो राशि ब्रुवन्ति स्म महाभक्त्या समुज्वलम् ॥184॥

एवं महोत्सवोपेतां स्तूपभूमिजगद्धिताम् ।
समाक्रम्य ततो मध्ये नभः स्फटिकसम्भवः ॥185॥

शालो महाविशालोऽभूल्लसत्कान्त्या सुनिर्मलः ।
प्रोत्तुंगो जिनराजस्य यशःपुञ्ज इवोज्वलः ॥186॥

पद्मरागमयैर्दिक्षु चतुर्भि गोपुरैरसौ ।
शुक्लध्यानप्रभावो वा रेजेऽनन्तचतुष्टयात्[2] ॥187॥

1.जिनेंद्राणामग्रतस्तत्र इति ब-द प्रतयोः

2.चतुष्टवान् इति द प्रतौ

तदद्वारेषु च संज्ञेयाः मंगलद्रव्यसंपदाः ।
प्रत्येकं कलशछत्रचामराद्याः मनोहराः ॥188॥

द्वारं द्वारं प्रतिव्यक्ताः सारैः रत्नादिभिर्भृताः।
नवापि निधयो नित्यं राजंते स्म जगद्धिताः ॥189।

लक्ष्मीः श्रीमज्जिनेन्द्रेण सन्त्यक्तापि सुभक्तितः ।
द्वारेषु निधिरूपेण सेवितुं वा विभुं स्थिता ॥190॥

खड्गादिपाणयो देवाः प्रतीहारः सुभक्तितः ।
क्रमात् सालत्रये तस्थुर्भौमभावनकल्पजाः ॥191॥

तस्मात् सालात्समारभ्य पीठपर्यन्तमीशितुः ।
नभः स्फटिकनिर्माणभित्तयः षोडशाभवन् ॥192॥

भित्तयस्ता समारेजुर्विशुद्धास्त्रिजगद्धिताः ।
षोडश श्रीजिनेन्द्रस्य भावनाः वा शुभावहाः ॥193॥

तासामुपरि सञ्जातो रत्नस्तम्भैः समुद्धृतः ।
श्रीमण्डपो महान् दिव्य नभः स्फटिकनिर्मितः ॥194॥

यत्रास्ते त्रिजगन्नाथः केवलज्ञानभास्करः ।
श्रीमन्नेमिजिनःस्वामी सत्यं श्रीमण्डपः स च ॥195॥

यस्योपरि तले देवाः पुष्पवृष्टिं सुभक्तितः ।
कुर्वन्ति स्म सदा तुष्टाः सुगन्धीकृतदिग्मुखम् ॥196॥

यत्र पुष्पलसद्गन्धसमाकृष्टाः मधुव्रताः ।
सञ्चक्रुः ऊँ कृतिं नित्यं स्तुतिं वा श्रीजिनेशिनः ॥197॥

यस्मिन् श्रीमण्डपे दिव्ये त्रिजगज्जनसञ्चयः ।
सम्माति स्म निराबाधं जिनेन्द्रमहिमा महान् ॥198॥

सुरा सुरनराधीशाः सदा यत्कान्तिसागरे ।
शोभन्ते स्म समाक्रान्ताः कुर्वन्तो वो सुज्जनम् ॥199॥

रत्नस्तम्भैर्हतो योऽसौ दिव्य स्फटिकभित्तिकः ।
चित्रितो रत्नसन्दोहैर्देवा यद् द्वारपालकाः ॥200॥

यत्र स्वामी जगत्स्वामी श्रीनेमिस्तीर्थकृत् स्वयम् ।
सन्तिष्ठते सुरैः पूज्यो मण्डपः कैः स वर्ण्यते ॥201॥

तन्मध्ये मध्यभागे च प्रथमा पीठिका प्रभोः ।
वैडूर्यरत्ननिर्माणा स्फुरिता हरितत्विषा ॥202॥

तत्र षोडशसोपानमार्गाः स्युः षोडशान्तराः ।
महादिक्षु सभाकोष्ठसम्प्रवेशेषु च क्रमात् ॥203॥

भृंगारकलशाद्यास्ता मंगलद्रव्यसम्पदाः ।
रेजुस्तत्पीठिकायां च त्रिजगत्सम्पदोपमाः ॥204॥

तस्यामेव सहस्त्रारैर्द्धर्मचक्राणि तेजसा ।
सूर्यायन्ते स्म यक्षाणां शिरोभूद्रेषु दिक्षु च ॥205॥

तत्पीठिको परिव्यक्तं द्वितीयं पीठिमा बभौ ।
कनत्काञ्चननिर्माणं मेरोः श्रृंगमिवोन्नतम् ॥206॥

तस्योपरि समारेजुरष्टदिक्षु महाध्वजाः ।
महार्घ्यास्ते यथा सिद्धगुणास्त्रैलोक्यपूजिताः ॥207॥

चक्रेभवृषभाम्भोजवस्त्रसिंहैर्विचित्रताः ।
वैनतेयेन पुष्पाणां मालयालंकृतौ क्रमात् ॥208॥

पवनां दोलिताः रेजुर्ध्वजास्ते जिनसंगमात् ।
स्फेटयन्ति स्म वा पापपरागं लोकसंगतम् ॥209॥

तस्योपरि जगत्सारं तृतीयं पीठमुन्नतम् ।
पञ्चधा रत्नसञ्जातं स्वकान्त्या जितभास्करम् ॥210॥

एवं त्रिमेखलं पीठं रत्नस्वर्णैर्विनिर्मितम् ।
सुरेन्द्राद्यैः स्म पूज्यत्वात्तच्च नित्यं जिनायते ॥211॥

तस्मिंस्त्रिमेखले पीठे पवित्रीकृतभूतले ।
बभौ गन्धकुटी दिव्याः तुंगशालोपशोभिताः ॥212॥

चतुर्मुखजगत्सारैः रत्नमालादिभिर्युता ।
रेजे गन्धकूटी तत्र कापि वा देवता परा ॥213॥

नानारत्नप्रभाजालैर्या करोति स्म चाम्बरे ।
शक्रचापो चितां शोभां जगच्चेतोनुरंजिनीम् ॥214॥

या च रत्नमहाकूटैर्ध्वजव्रातैर्विराजिताम् ।
पवनां दोलितैर्नित्यमाह्वयन्ती वनाकिनः ॥215॥

कर्पूरागुरुकाश्मीरैर्जगत्सारैः समर्चिता ।
सुगन्धीकृत विश्वाशा सत्यं गन्धकुटीत्यसौ ॥216॥

मुक्तमालाशतोपेता पुष्पमालाशतैर्युता ।
स्वर्लक्ष्मी या हसन्तीव सुरत्नाभरणोत्करैः ॥217॥

दिव्यछत्रत्रयेणोच्चैश्चामरैर्ध्वजसञ्चयैः ।
प्रभोस्त्रैलोक्यसाम्राज्यं सूचयन्तीव सज्जनान् ॥218॥

सर्वदेवेन्द्रचन्द्रादिकृतस्तोत्रस्वतैः सदा[1] ।
या स्तुवन्ती जिनं रेजे तद्रूपं वा सरस्वती ॥219॥

शक्रादिकरनिर्मुक्तैर्विकसत्कुसमोत्करैः ।
सुगन्धीकृतविश्वासा या बभौ भ्रमैराश्रितैः ॥220॥

तस्याः मध्ये लसत्कांतिहैमं सिंहासनं बभौ ।
नानारत्नप्रभोपेतं मेरुश्रृंगमिवोन्नतम् ॥221॥

तस्योपरि जगत्स्वामी केवलज्ञानभास्करः ।
चतुर्भिरंगुलैर्व्योम्नि स्थितो नेमिजिनेश्वरः ॥222॥

---

1. स्वदा इति अ प्रतौ

एवं सिंहासने तत्र प्रोत्तुंगे स्वप्रभावतः ।
त्रैलोक्यशिखरारूढ़ो यथा सिद्धो विभुर्बभौ॥223॥

तत्रैवं सुस्थितं देवं तं श्रीनेमिजिनेश्वरम् ।
सेवन्ते स्म लसत्पुष्पवृष्ट्या शक्रादयो मुदा ॥224॥

मन्दार[1] पारिजाताद्यैर्नानापुष्पसमुच्चयैः ।
सुगन्धीकृत विश्वासा सा वृष्टिः कौसुमी बभौ॥225॥

समवादि सृतिं वाप्य समन्ताच्छ्रीजिनेश्वरम् ।
पतन्ती पुष्पवृष्टिः सा मेघवृष्टिरिवारुचत् ॥226॥

नन्ददेवेति जीवेति पालयेति जगद्गुरो ।
स्तुवन्तः[2] श्रीजिनंदेवाश्चक्रुर्वृष्टिं सुकौसुमीम् ॥227॥

देवानां स्तुतिसम्पीठैः कं कृतैर्मधुपायिनाम् ।
पुष्पवृष्टिंस्तु सा रेजे कुर्वन्ती वा जिनस्तुतिम् ॥228॥

गन्धोदकेन संयुक्ता सा वृष्टिस्त्रिजगद्धिता ।
सर्वसुगन्धयामास गन्धविद्येव निर्मला ॥229॥

शोभन्ते स्म महाशोकवृक्षाः श्रीमज्जिनेशिनः ।
वज्रमूलो दृढ़ो गाढ़ं भावो वा क्षायिकः सताम् ॥230॥

पत्रैर्मारकतैर्दिव्यैर्जपाभमणिपुष्पकैः ।
स वृक्षः कल्पवृक्षो वा समारेजे जगद्धितः ॥231॥

शोकसन्तापविध्वंसी भव्यानां शर्मकोटिदः ।
पश्यतामाश्रितानां च स रेजे वाजिनस्तरुः ॥232॥

वातेनान्दोलितो नित्यं विगलत्कुसुमोत्करः ।
शाखाबाहून् प्रसार्योच्चैः कुर्वन्नृत्यं स वा बभौ ॥233॥

---

1. मंदरे इति अ प्रतौ
2.स्तुवंतः इति ब प्रतौ

शाखा समाश्रितैर्नाना पक्षिवृंदैः कृतस्वनैः ।
मोहाराति जयञ्जिल्लो र्घोषयन्वा स पादपः ॥234॥

यस्य वृक्षोऽपि भव्यानां शोकहारी सुखप्रदः ।
तस्य श्रीमज्जिनेन्द्रस्य महिमा केन वर्ण्यते ॥235॥

छत्रत्रयं विभोरुच्चैः शोभितं धवलं महत् ।
त्रिजगज्जनता[1] रम्यं यशो वा तन्मयं प्रभोः ॥236॥

चन्द्रकान्ति परिस्पर्द्धि प्रभोश्छत्रत्रयं बभौ ।
मुक्तेस्त्रयात्मकं मार्गं भव्यानां वेति सूचयन् ॥237॥

नानारत्नपिनद्धोरु[2] दण्डेनैव समुदृतम् ।
मुक्तमालाशतोपेतं तत्सुरेजे जगद्धितम् ॥238॥

उच्चैः स्थितं प्रभोर्मूर्ध्नि शुभ्रं छत्रत्रयं महत् ।
विभोस्त्रैलोक्य साम्राज्यं सतां वा तद्वदद्बभौ॥239॥

दिव्याभरणसन्दोहैर्भूषितांगाः सुभक्तितः ।
यक्षदेवाः क्षिपन्ति स्म चामराणि प्रभुं प्रति ॥240॥

चतुषष्टिप्रसंख्यानि तानि दिव्यानि रेजिरे ।
श्रीजिनेन्द्रगिरीन्द्रं तं समन्तान्निर्जरा यथा ॥241॥

चामराली प्रभोर्दिव्या शोभते स्म सुनिर्मला ।
पतन्ती पार्श्वभागेषु पुष्पवृष्टिरेवोज्वला ॥242॥

बभौ सा चामराली च प्रभोश्चन्द्रकरोज्वलात् ।
विभुं वा सेवितुं प्राप्ताः भावलेश्या सतां हिता ॥243॥

कोट्यो दुन्दुभीनां च नानावादित्रसंयुताः।
नभो भागे ध्वनिं चक्रुर्देवैः सन्ताडिताः प्रभोः ॥244॥

1.त्रिज्जगज्जनता इति अ प्रतौ

2. नानारत्नाद्धिरु इति ब प्रतौ

तालकं सालसंशब्दैर्मृदंगध्वनिभिः समम्।
गर्जन्ति स्मांबरे नित्यं घना दुन्दुभयो यथा ।।245।।

वादित्र कोट्यो रम्याः प्रभो! मोहजयार्जिताः ।
गर्जन्त्यो रेजिरे व्योम्नि वन्दत्यो वा जयं विभोः ।।246।।

प्रभो दुंदुभयो देवैस्ताड्यमाननभो गणे ।
कुर्वन्ति स्म जगत्सर्वं सशब्दं च सहर्षकम् ।।247।।

भामण्डलो जिनेन्द्रस्य दिव्यदेहसमुद्भवः ।
द्योतयामास सत्कान्त्या तां सभां भुवनाश्रिताम् ।248।।

कोटिभास्करसत्तेजो लोपकार्योपि निर्मलम् ।
यत्तेजो जननेत्राणां शर्मकारिमहाद्भुतम् ।।249।।

विश्वं वा तन्मयं कर्तुं प्रभोर्भामण्डलो बभौ ।
मिथ्यात्वतिमिरध्वंसी कोऽपि वा भास्करः परः ।।250।।

देवाः विद्याधराः मर्त्याः प्रभोर्भामण्डले शुचौ ।
पश्यन्ति स्म यथादर्शे मुखं स्वभव सप्तकम् ।।251।।

यस्य देहद्युतेरिष्टं प्रभावो भुवनोत्तमः ।
तज्ज्ञानं वर्ण्यते केन यत्त्रिकालप्रकाशकम् ।।252।।

दिव्यध्वनिर्जिनेंद्रस्य मुखपद्माद्विनिर्ययौ ।
पापांधकारविध्वंसी विश्वदर्शी जगद्धितः ।।253।।

नाना देशसमुत्पन्ना नानाभाषासमन्वितान् ।
प्रभोः प्रबोधयामास दिव्यध्वनिरसंशयम् ।।254।।

एकप्रकारकोऽप्युच्चैर्ध्वनिर्नानाजनाश्रयात् ।
नानाभाषाशतं प्राप्तो महिम्ना श्रीजिनेशिनः ।।255।।

यथा मृष्टजलौघस्तु बहुभेदतरुन् श्रितः ।
नाना रसत्वमाप्नोति तथा जैनोध्वनिर्नरान् ।।256।।

विशुद्धस्फटिकं लोके यथा वस्तु कदम्बके ।
नानावर्णत्वमाप्नोति तथा सोऽपि ध्वनिर्नृषु ॥257॥

सध्वनिर्जिनराजस्य साक्षरो मुखपंकजात् ।
सञ्जातः सर्वतत्त्वावभासी योजनमानभाक् ॥258॥

सप्ततत्त्वपदार्थांश्च लोकालोकस्वरूपकम्[1] ।
सर्वं सा द्योतयामास वाणी श्रीमज्जिनेशिनः ॥259॥

भाषा जैनी जगत्तापहारिणी साभवत्तराम् ।
मेघमाला यथा लोके समस्त[2] सुखदायिनी ॥260॥

इत्थं शक्रः कुबेरेण कारयामास शर्मदम् ।
समवादि सृतिं जैनीं जगच्चेतोनुरञ्जिनीम् ॥261॥

सौधर्मेंद्रादयः शक्राः द्वात्रिंशद्भक्तितस्तदा ।
असंख्यातैः सुरैः सार्द्धं सांगनाः सपरिच्छदाः ॥262॥

ऐरावतादिसंप्रोक्ता नाना यानविमानकैः ॥
नभोभागसमाक्रम्य स ध्वाजाद्यैरलंकृताः ॥263॥

पुष्पवृष्टिं प्रकुर्वन्तो जयकोलाहलस्वनैः ।
समवादि सृतिं वीक्ष्य दूरतो भुवनोत्तमाम् ॥264॥

नानालसद्ध्वजव्रातैराह्वयन्तीमिवामरान् ।
सम्प्रापुः परमानन्दं सिद्धिं वा सारशर्मदाम् ॥265॥

तां सभां त्रिःपरीत्योच्चैः सम्प्रविश्य जगद्धिताम् ।
ददृशुर्भुवनाधीशं श्रीमन्नेमिजिनेश्वरम् ॥ 266॥

दिव्यसिंहासनारूढं व्यक्तानंतचतुष्टयम् ।
त्रैलोक्यशिखरारूढं यथा सिद्धं गुणाकरम् ॥267॥

1.लोकत्रयस्वरूपकं इति स प्रतौ

2.सस्त इति ब प्रतौ

चतुस्त्रिंशन्महैश्वर्यैः समेतं भुवनोत्तमं ।
चतुर्वक्रं चतुर्दिक्षु वीज्यमानं च चामरैः ।।268।।

पूजयन्ति स्म ते भक्त्या दिव्यवस्तुसमुच्चयैः ।
तं देवं त्रिजगत्पूतं पवित्रीकृतभूतलम् ।।269।।

रत्नभृंगारनालोकनिर्गलत्तीर्थवारिणाम् ।
जिनेन्द्रचरणाद्वन्दं तिस्रो धारान्यपातयन् ।।270।।

सुगंधाः शीतलाः पूजास्ताः धाराः शर्मदाः ।
सतां शोभन्ते स्म महाभव्याः मनोवृत्यनुगाः शुभाः ।।271।।

चंदनागुरुकाश्मीरसम्भवैः सुविलेपनैः ।
जिनेन्द्रचरणाम्भोजं चर्चयन्ति स्म शर्मदम् ।।272।।

मुक्ताफलमहापुञ्जैः प्रोल्लसत्कान्तिशोभितैः ।
पूजां श्रीजिननाथस्य कुर्वन्ति स्म सुभक्तितः ।।273।।

जातीचम्पकपंकजैर्मन्दरादिप्रसूनकैः ।
सुगन्धीकृतविश्वासैः पूजयन्ति स्म तं जिनम् ।।274।।

पूतपीयूषपिण्डौघैरर्चयंति स्म ते मुदाः ।
दुःखदारिद्र्यसन्दोहनाशकं जिनपंकजम् ।।275।।

रत्नदीपैर्जगत्सारैः केवलज्ञानभास्करम् ।
श्रीजिनं पूजयन्ति स्म भक्त्या संसारपारदम् ।।276।।

सारकृष्णागुरूद्भूतं धूपधूम्रं मनःप्रियम् ।
उत्क्षिपन्ति स्म देवाग्रे भूरिसौभाग्यशर्मदम् ।।277।।

फलैः कल्पतरूत्पनैः स्वर्गमोक्षसुखप्रदम् ।
पूजयामासुरुत्कृष्टभक्तितस्तं जिनेश्वरम् ।।278।।

विस्तीर्णस्वर्णपात्रस्थं तोयाद्यैरर्घमुत्तमम् ।
देवाश्चोत्तरायामासुः शर्मकोटिविधायकम् ।।279।।

इत्येवं ते सुरेन्द्राद्याः महाभक्तिपरायणाः ।
पूजयित्वा जगत्पूज्यं संस्तुतिं कर्तुमुद्यताः ॥280॥

त्वं स्वामिंस्त्रिजगन्नाथस्त्वं त्रिलोकैकनायकः ।
केवलज्ञानदीपस्त्वं मिथ्यात्वध्वान्तनाशकः ॥281॥

त्वं सार्वः सर्वविद्येशस्त्वं त्रिलोकविभूषणम् ।
त्वं माता त्वं पिता बन्धूस्त्वं मित्रं च जगद्गुरुः ॥282॥

त्वं शरण्योऽत्र भव्यानां त्वं शास्ता त्वं पितामहः ।
त्वं त्राता भयभीरूणां त्वं जगत्त्रयवल्लभः ॥283॥

कारणं सर्वसौख्यानां त्वं सदागुणसागरः ।
त्वं भो! देवसुरैः पूज्यः सप्ततत्वविदांवरः ॥284॥

घोरसंसारवाराशेस्तारकस्त्वं भवान्तकः ।
निर्जरो निर्जरैः सेव्यस्त्वं पवित्रोऽपि निर्मदः ॥285॥

निरामयो निराबाधो निष्कलंको विकल्मषः।
त्वं सदा समधीश्चापि भक्तानां वाञ्छितप्रदः ॥286॥

विरागो वीतरागस्त्वं प्रकृष्टप्रमदप्रदाः।
सिद्धो बुद्धो विशुद्धात्मा भुवनैकपितापरः ॥287॥

शंकरः शंकरत्वाच्च कर्मणां निर्जयाज्जिनः ।
त्वं सर्वज्ञो गुणज्ञस्त्वं सर्वसन्देहनाशकः ॥288॥

त्वं स्वामीतीर्थनाथोऽसि धर्मतीर्थप्रवर्त्तनात् ।
त्वं विष्णुर्भुवनव्यापी केवलज्ञानचक्षुषा॥289॥

त्वं प्रभो! परमज्योतिस्त्वं लोकत्रयबान्धवः ।
त्वं ब्रह्माब्रह्मतत्त्वज्ञस्त्वं[1] हरिः कर्मशत्रुहा ॥290॥

---

1. ब्रप्लतत्वज्ञ इति ब-द प्रतयोः

धीरो वीरोऽतिगंभीरस्त्वं शूरः शर्मदायकः ।
दिव्यचिन्तामणिर्लोके त्वमेव सुरपादपः ॥291॥

नाथः पतिः प्रभाधीशः सुराधीशार्चितक्रमः।
कामदः कामहा कामदेवं वन्द्यो बुधार्चितः ॥292॥

सर्वतत्त्वावभासित्वात् सुभानुर्वचनोत्करः ।
त्वं धर्माधिपतिः सर्वं मुख्यस्त्वं परमोदयः ॥293॥

त्वं वाक्यामृतं सत्सिंधुस्त्वं दयासागरः सुधीः।
त्वं मुक्तेर्नायको दिव्यः शुद्धरत्नत्रयात्मकः ॥294॥

त्वं मंगलं सतामग्रं त्वं कविर्जगदुत्तमः ।
त्वं हि लोकोत्तमो देव! त्वमेव शरणं सताम् ॥295॥

त्वं सतां पापहश्चन्द्र श्चारुः चारित्रभूषणः ।
मुनीन्द्रो मुनिभिर्वंद्यो विवेकी विमलाशयः ॥296।

अनन्तगुणसंपन्नो व्यक्तानन्तचतुष्टयः ।
सर्वलोकहितो नित्यो बन्धुरागो मनोहरः ॥297॥

त्वं शुचिः शुचिभिः सेव्यस्त्वं भवाम्भोधिपारगः ।
निष्पन्नः परमानन्दकारको मोक्षसौख्यभाक् ॥298॥

अनन्तास्ते गुणाः स्वामिन्! विशुद्धाः शर्मदाः सतां।
वयं मन्दं धियो देव! कथं ते क्रियते स्तुतिः ॥299॥

परं भक्त्याः स्तुवन्त्येव[1] प्रभुः बुद्ध्या विनापि च ।
भानुर्दीपेन तेजस्वी पूज्यते किं न भक्तिकैः ॥300॥

तथा वयं प्रभो भक्त्या त्वं श्रिता भुवनप्रभुम्।
स्तुत्वा संप्रार्थयामास्ते भूयाद्भक्तिः शिवप्रदा ॥301॥

1.स्तुवंत्य इति अ प्रतौ

इति श्री नेमिनाथं तं केवलज्ञानलोचनम् ।
स्तुत्वा प्रणम्यते प्रीत्या स्वं स्वं कोष्टं श्रिताः सुरैः ॥302॥

इंद्राणी प्रमुखा देव्यः[1] परमानंद निर्भराः।
श्रीजिनेंद्रपदांभोजं पूजयंति स्म शर्मदम् ॥303॥

तथा श्रीनेमिनाथस्य केवलज्ञानसंपदाम् ।
श्रुत्वा पद्मबलोनाम कृष्णनामा हरिर्मुदा ॥304॥

तौ त्रिखंडपतीभक्त्या षडंगबलसंयुतौ।
समागत्य तदा शीघ्रं परिवारैः परिस्कृतौ॥305॥

उर्जयंतगिरिं गत्वा समवादि सृतौ स्थितम् ।
श्रीमन्नेमिजिनं पूतं त्रिःपरीत्य प्रमोदतः ॥306॥

नंददेवेति जीवेति जयकोलाहलस्वनैः ।
समालोक्य निधानं वा संतुष्टो भुवनोत्तमम् ॥307॥

विशिष्टाष्टमहाद्रव्यैस्तोयाद्यैः सुमनोहरैः ।
श्रीमन्नेमिजिनेंद्रस्य पादपद्मद्वयं शुभम् ॥308॥

पूजयामासतुः प्रीत्या सारसंपद्विधायकम् ।
स्वर्गमोक्षसुखस्योच्चैः कारणं भवतारणम् ॥309॥

जिनत्वाद् बंधुवर्गत्वात् तौ तदा बलकेशवौ।
चक्रतुर्यां परां भक्तिं सा सती केन वर्ण्यते ॥310॥

पूजयित्वा पुनर्देवं तं स्तोतुं समुद्यतौ ।
जयत्वं भुवनाधीशसुराधीशैः समर्चितः ॥311॥

त्वं नेमे नेमे[2] रत्रोच्चैर्धर्मचक्रप्रवर्तने ।
केवलज्ञानदीपेन लोकालोकप्रकाशकः ॥312॥

1.देवाः इति स प्रतौ
2.नेमि नेमि इति द प्रतौ

त्वं भो! देव जगद्बन्धुरस्माकं सुविशेषतः ।
दिव्यमूर्तिर्लसत्कीर्तिः सद्गतिर्भव्यदेहिनाम् ॥313॥

त्वं हि पाता पवित्रात्मा संसाराम्भोधितारकः।
या देवेन्द्रकुलांभोजभास्करो भुवनोत्तमः ॥314॥

रत्नत्रयमयो मार्गो योऽत्र मोक्षप्रदायकः ।
स त्वया दर्शितः स्वामिन् भव्यानां परमार्थतः ॥315॥

अनन्तकेवलज्ञानप्रद्योते ते जगद्गुरुः ।
नष्टाःकुवादिनः सर्वे खद्योता इव भास्करात् ॥316॥

अतस्त्वमेव सम्पूज्यो देवदेवो जगद्गुरुः ।
सर्वसन्देहसंदोहः नाशकः शर्मदायकः[1] ॥317॥

समवादिसृतेर्देवविभूतिस्ते बहिर्भवाः ।
शक्यते वर्णितुं नैव किं पुनर्ज्ञानदर्शने ॥318॥

अतस्त्वं त्रिजगत्स्वामी लोकालोकप्रकाशकः ।
अस्मभ्यं भव वाराशौ देहि हस्तावलंबनम् ॥319॥

इत्यादिकं जिनाधीशं स्तुत्वा नत्वा पुनः पुनः ।
कृतकृत्यं निजात्मानं मन्यमानौ महीपती॥320॥

मुनीन्द्रांश्च प्रणम्यौच्चैर्विकसन्मुखपंकजौ ।
नरकोष्टे स्थितौ भक्त्या तौ नतौ सपरिछदौ ॥321॥

तदा द्वादशकोष्ठेषु गणैर्द्वादशभिर्युतः ।
रेजे विकस्वरैः पद्मैः पद्माकर इव प्रभुः ॥322॥

पूर्वस्मिन् रेजिरे कोष्टे मुनीन्द्रा शुद्धमानसाः ।
भव्यानां स्वर्गमोक्षस्य मार्गो वा शर्मदायिनः ॥323॥

1.भवतारकः इति द प्रतौ

द्वितीये सुस्थिताः कोष्ठे कल्पवासिसुरांगनाः ।
दिव्यमूर्तिप्रभायुक्ताः जिनभक्तिपरायणाः ॥ 324॥

तृतीये सम्बभुः कोष्टे सार्यिकाः श्राविकाः शुभाः ।
सम्यक्तव्रतसंयुक्ताः श्रीजिनेन्द्रार्चने रताः ॥325॥

चतुर्थे चन्द्रसूर्यादिज्योतिष्कामरयोषितः ।
प्रोल्लसत्कान्तयो दिव्याः भक्तयो वा जिनेशिनः ॥326॥

पञ्चमे व्यन्तराणां च चञ्चत्कान्तिविराजिताः ।
देवांगना जिनेन्द्रस्य पादपंकजे भक्तिकाः ॥327॥

षष्टे कोष्ठे जिनेन्द्रस्य चरणांभोजसेविकाः।
नागदेवस्त्रियो रम्याः सर्वाः पद्मावतीमुखाः ॥328॥

सप्तमे धरणेन्द्राद्याः नागदेवाः सुस्थिताः ।
दशधा जिनपादाब्जसेवनैकमधुव्रताः ॥329॥

अष्टमे व्यन्तराः देवाः अष्टधा भक्तिनिर्भराः ।
किं नरादिमुखाः श्रीमज्जिनवाणीकृतादराः ॥330॥

नवमे चन्द्रार्कमुख्याः पंचधा ते प्रकीर्तिताः।
ज्योतिष्काः प्रस्फुरत्कान्त्या द्योतिताखिलदिङ्मुखाः ॥331॥

दशमे द्विषड्विधा स्युः सर्वे कल्पाधिपाः शुभाः ।
सौधर्मेन्द्रमुखाः सर्वैर्देववृन्दैः समन्विताः ॥332॥

एकादशे नराधीशः प्रमुखाः नरसत्तमाः ।
सम्यक्तव्रतसत्पूजापात्रदानैर्विराजिताः ॥333॥

द्वादशप्रमिते कोष्ठे सिंहाद्याः पशवः शुभाः ॥
तेऽपि सम्यक्त्वसंयुक्तव्रतोपेताः दयान्विताः ॥334॥

सर्वे तु पशवः क्रूरास्त्यक्तवैराः परस्परम् ।
महिम्ना श्रीजिनेन्द्रस्य स्थिताश्चैकत्र सौख्यतः ॥335॥

इत्येवं द्वादशप्रख्यैर्गणैः श्रीनेमिनायकः ।
सेव्यमानपदाम्भोजो जगच्चिन्तामणिर्बभौ ।।336।।

दिव्यसिंहासनारूढो महाछत्रत्रयान्वितः।
महाशोकतरूपेतो वीज्यमानः सुचामरैः ।।337।।

सुरेन्द्रकरनिर्मुक्तः पुष्पवृष्ट्यार्चितक्रमः ।
दुन्दुभीनां महाध्वानैर्गर्जिताखिलभूतलः ।।338।।

कोटिभास्करसत्तेजोलोपि भामण्डलान्वितः।
सुरासुरनराधीशैः समर्चितः पदद्वयः ।।339।।

भावनो पात्रसत्पुण्योत्पन्नदिव्यध्वनिः प्रभुः ।
अनन्तज्ञानदृग्वीर्यसारसौख्यसमन्वितः ।।340।।

सुदिव्यध्वनिना तेन साक्षरेण जगद्गुरुः ।
तीर्थंकरस्वभावेन भव्यानां पुण्ययोगतः ।।341।।

जगौ नेमि जिनेन्द्रोऽसौ सप्ततत्त्वादिविस्तरम् ।
निःसन्देहं जगत्स्वामी लोकालोकप्रकाशकः ।।342।।

अथ श्रीमज्जिनेन्द्रस्य तस्य शर्मविधायिनः ।
मुनीन्द्रादिगणस्योच्चैः संख्यां वक्षे सुखप्रदाम् ।।343।।

त्रिजगत्स्वामिनो नेमेस्तस्य पादाम्बुजे रताः।
वरदत्तादयोऽभूवन्नेकादश गणाधिपाः ।।344।।

केवलज्ञानसाम्राज्यसम्पदस्ते जिनेशिनः ।
यौवराज्यपदेयोग्याः रेजिरे गणनायकाः! ।।345।।

श्रीमज्जिनेन्द्रचन्द्रोक्तः सर्वतत्त्वार्थसंग्रहः ।
नानाकवित्वरूपेण गुम्फितोयैः स्वलीलया ।।346।।

चतुःशतानि सम्प्रोक्ता मुनयः सकलश्रुताः ।
पूर्वप्रकीर्णकैः सार्द्धमंगसिन्धुप्रपारगाः ।।347।।

एकादशसहस्राणि शतान्यष्टौ च शिष्यकाः ।
श्रीमन्नेमिजिनेन्द्रस्य चरणाम्भोजसेवकाः ॥348॥ 11800

सहस्रं च तथा पञ्चशतानि परिकीर्त्तिताः ।
त्रिज्ञानलोचनश्चारुचारित्रप्रविराजिताः ॥349॥1500

तावन्तः पञ्चमज्ञानाः लोकालोकप्रकाशकाः ।
भव्यानां परमानन्ददायिनो भवतारकाः ॥350।

सहस्रं शतमेकं च विक्रियर्द्धिविराजिताः ॥
मुनीन्द्रो नेमिनाथस्य वचनामृतपायिनः ॥351॥ 1100

शतानि नवसम्प्रोक्ताः मुनयो गुणमंडिताः ।
मनःपर्ययसंज्ञानान्मनोवृत्तिप्रकाशकाः ॥352॥ 900

शतान्यष्टौ भवन्ति स्म वादिनो मुनयः शुभाः ।
मिथ्यावादिमतध्वान्तध्वंसनैकदिवाकराः ॥353॥ 800

अष्टादशसहस्राणि ते सर्वे मुनयो मताः ।
सम्यग्दर्शनसंज्ञानचारित्रैः प्रविराजिताः ॥354॥ 18000

यक्षी रात्रिमतिश्चापि नाम्ना कात्यायिनी तथा।
चत्वारिंशत्सहस्राणि सर्वास्ताश्चार्यिकाः शुभाः ॥355॥ 40000

श्रीमन्नेमिजिनेन्द्रस्य पादपंकजेमानसाः ।
शोभन्ते स्म विशुद्धास्ताः भारत्या मूर्त्तयो यथा ॥356॥

लक्षं सुश्रावकाः प्रोक्ताः श्रीजिनेन्द्रवचो रताः ।
सम्यक्त्वव्रतसंयुक्ता दानपूजादितत्पराः ॥357॥ 100000

त्रिलक्षाः श्राविकाः प्रोक्ताः मिथ्यामार्गविदूरगाः ।
पात्रदाने रताः नित्यं जैनीपूजापरायणाः ॥358॥ 300000

देवेन्द्रादिकदेवौघाश्चतुर्भेदाः सवल्लभाः ।
असंख्याताः सुविज्ञेयाः प्रभोः पादार्चने रताः ॥359॥

सिंहादयोऽपि तिर्यञ्चसंख्याताः शान्तमानसाः ।
सेवन्ते स्म जिनेन्द्रस्य पादपद्मद्वयं मुदा ॥360॥

इति द्वादशकोष्ठेषु सर्वे तेऽपि यथाक्रमम्।
श्रीमन्नेमिजिनेन्द्रस्य तीर्थकृत्पुण्ययोगतः ॥361॥

तिष्ठन्ति स्म सुखं भक्त्या परमानन्दनिर्भराः ।
नित्यं धर्मामृतैः पुष्टाः विकसन्मुखपंकजाः ॥362॥

या सभा श्रीजिनेन्द्रस्य केवलज्ञानचक्षुषः ।
शक्राज्ञया कुबेरेण कृता रत्नादिभिर्मुदा॥ 363।

त्रैलोक्यभव्यजीवानां परमानन्दकारिणी।
सा कथं वर्ण्यते लोके मादृशा तुच्छमेधसा ॥364॥

किंतु कोटिसहस्रांशात् सा प्रोक्ता शर्मदायिनी ।
पानं विनापि पीयूषः संस्पर्शः सुखदो भवेत् ॥365॥

इंद्रनागेंद्रचन्द्राद्याः यद्विभूतिप्रवर्णने ।
समर्थाः न भवन्त्येव तत्र केऽन्येऽल्पबुद्धयः ॥366॥

तथापि श्रीजिनेन्द्रस्य महाभक्तिप्रसादतः ।
सा सभा त्रिजगत्सेव्या[1] भूयात् कल्याणकारिणी ॥367॥

इत्थं सारविभूतिमण्डिततनुः सत्केवलज्ञानभाग् ।
लोकालोकविकाशनैकनिपुणो देवेन्द्रवृन्दार्चितः ॥368॥

सधर्मामृतपानतोषितजगत्सन्तापविच्छेदकः ।
कुर्यात् सारसुखं समस्तजगतां श्रीनेमिनाथो जिनः ॥369॥

1.वित्रिजगत्सेव्या इति स प्रतौ

(शार्दूलविक्रीडित)

यत्कैवल्यविभूतिसूतिसमये शक्रादयो भक्तितः ।
देवाः साप्सरसो विशुद्धहृदयाः कृत्वा सभां शर्मदाम् ।
संश्चक्रुश्चरणारविन्दयुगलस्याग्रेऽष्टधा चर्चनम् ॥
स श्रीनेमिजिनेश्वरो भयहरो दद्यात्सतां मंगलम् ॥370॥

इतित्रिभुवनैकचूड़ामणिश्रीनेमिजिनपुराणेभट्टारकश्रीमल्लिभूषणशिष्याचार्य श्रीसिंहनन्दिनामांकितब्रह्मनेमिदत्तविरचितेस्वामिनः केवलज्ञानोत्पत्तिसमवशरणविभूतिव्यावर्णनो नाम दशमोऽधिकारः ॥10॥

एकादशोऽधिकारः

अथ श्रीनेमिनाथोऽसौ सुरासुरसमर्चितः ।
तीर्थकृत्पूर्वपुण्येन समवादिसृतौ स्थितः ॥1॥

प्रातिहार्याष्टकोपेतः केवलज्ञानभास्करः ।
सति व्यक्तासने चापि चन्द्रवान्नभसि स्फुरन् ॥2॥

चतुर्भिरंगुलैर्मुक्त्वा सिंहासनमनुत्तरम् ।
भव्यानां पुण्ययोगेन जगौ धर्मजगद्धितम् ॥3॥

तदा प्रभोर्मुखाम्भोजान्निर्गतो भुवनोत्तमः ।
दिव्यध्वनिर्जगच्चेतः रञ्जनः सुनिरञ्जनात् ॥4॥

ताल्वोष्ठकरणग्रामव्यापारः परिवर्जितः ।
वक्तुमिच्छां विना चापि प्रभोर्माहात्म्यमुत्तमम् ॥5॥

व्यक्ताक्षरैः समायुक्तो भव्यानां शर्मदायकः ।
नानादेशात्समायातो नराणां प्रीणनक्षमः ॥6॥

पूर्वोक्तगणनोपेतां तां सभां प्रविकाशयन् ।
भानुर्वा भोजिनीं स्वामी सञ्जगौ वचनोत्करैः ॥7॥

ये भेदाः श्रीजिनेन्द्रेण प्रोक्ताः धर्मस्य शर्मदाः ।
तान् वक्तुं कः क्षमो लोके गम्भीरात् सागरादपि ॥8॥

तथापि पूर्वाचार्याणां क्रमाद्वक्ष्ये जगद्धितम् ।
धर्मस्य लक्षणं किञ्चिन्मन्दबुद्ध्यापि भक्तितः ॥9॥

यो धर्मः सेवितो भक्त्या मनोवाक्काययोगतः ।
संसाराम्भोधितो भव्यान् सन्धरत्येव सत्पदे ॥10॥

तं सम्यग्दर्शनज्ञानचारित्रं भुवनोत्तमम् ।
धर्मं प्राहुर्गणाधीशाः सुराधीशैः समर्चितम् ॥11॥

तत्राद्यं मुनिभिः प्रोक्तं सम्यग्दर्शनमुत्तमम् ।
श्रद्धानं सत्यभूताप्तं तदागमं तपस्विनाम् ॥12॥

तथा श्रीमज्जिनेन्द्रोक्ते धर्मे हिंसादिवर्जितः ।
प्रीतिरात्यान्तिकी या तत् सम्यक्त्वं सूरिभिर्मतम् ॥13॥

अष्टांगैः शोभते तच्च सम्यग्दर्शनमुत्तमम् ।
यथाष्टांगैर्दृढैर्नित्यं नरत्वं भाति भूतले ॥14॥

सम्यग्दर्शनसद्रत्नं मूढत्रयमदाष्टकात् ।
वर्जितं राजते गाढं यथा रत्नमलोज्झितम् ॥15॥

तत्राऽप्तो भण्यते देवः सोऽपि दोषैर्विवर्जितः ।
तेपि दोषाः बुधैर्ज्ञेयाः क्षुत्पिपासा[1] जरारुजा[2] ॥16॥

जन्मान्तको[3] भयन्निद्रा रागो द्वेषश्च विस्मयः ।
चिन्ता रतिः स्मयः खेदो विषादः खेदमोहकौ ॥17॥

एते दोषैर्विनिर्मुक्तो यः सर्वज्ञो जिनेश्वरः ।
स्नातकः परमेष्ठी च कथ्यते स निरञ्जनः ॥18॥

तेन श्रीमज्जिनेन्द्रेण स्वस्वभावेन देहिनाम् ।
यत्प्रोक्तं शास्त्रमत्युच्चैः विरोधपरिवर्जितम् ॥19॥

जीवाजीवादिकं तत्त्वं पवित्रं भुवनत्रये ।
तदेवागमसारस्तु स्वर्गमोक्षसुखप्रदः ॥20॥

---

1. क्षित्पिपासा इति ब प्रतौ
2. जरोरुजा इति अ प्रतौ
3.जन्मांतिको इति अ प्रतौ

निर्ग्रन्थो यो मुनिर्बाह्याभ्यन्तरोक्तपरिग्रहैः ।
निर्मुक्तो वा ग्रहैर्भव्यो भूतले परमार्थवित् ॥21॥

ज्ञानध्यानतपोयोगैः संयुक्तः सद्दयापरः ।
क्षमावान् शीलसम्पन्नस्तपस्वी सजगद्धितः ॥22॥

इत्याप्तागमचारित्रधारिष्वेव महारुचिः ।
जायते संज्ञि भव्यस्य संशयादिविवर्जिता ॥23॥

या सा सर्वजगत्सारसम्पदा शर्मदायिनी ।
तदेव प्रोच्यते सद्भिः सम्यग्दर्शनमुत्तमम् ॥24॥

संसारदेहभोगादेः सुखे कर्मनिबन्धने ।
नैव वाञ्छा त्रिधा यासौ निःकांक्षा कथ्यते बुधैः ॥25॥

तथा शुचौ शरीरेऽपि रत्नत्रयसमन्विते ।
गुणप्रीत्या जुगुप्सा न सतां निर्विचिकित्सिता ॥26॥

मिथ्या मार्गे तथा मिथ्या दृष्टौ पुंसि कदाचन।
नैव प्रीतिः स्तुतिर्नैव क्रियते मूढदृष्टिता ॥27॥

शुद्धस्य जिनमार्गस्य बालशक्तो जनागता ।
निन्दाया छाद्यते सा तत् कथ्यते चोपगूहनम् ॥28॥

दर्शनज्ञानचारित्रात् प्रमादाच्चलतां बुधैः ।
पुनः संस्थापनं प्रोक्तं सुस्थितीकरणं शुभम् ॥29॥

साधर्मिकेषु या भक्तिर्मायादोषविवर्जिता ।
वात्सल्यं मुनयः प्राहुस्तदेव सुखसाधनम् ॥30॥

---

1. कुलींगी इति अ प्रतौ

मिथ्याज्ञानतमस्तोमं निराकृत्य स्वशक्तितः ।
जैनधर्मे समुद्योतः क्रियते सा प्रभावना ।।31।।

गुणैरष्टभिरेतैश्च संयुक्तं दर्शनं शुभम् ।
हन्ति कर्माणि सम्पूर्णो मन्त्रो वा विषवेदनाम् ।।32।।

अष्टौ शंकादयो दोषास्तथानायतनानि षट् ।
मूढत्रयं मदाश्चाष्टौ दृग्दोषाः पञ्चविंशतिः ।।33।।

कुदेवस्तस्य भक्तश्च कुज्ञानं तस्य पाठकः ।
कुलिंगी[1] सेवकस्तस्य लोकेऽनायतनानि षट् ।।34।।

मिथ्यावद्भास्करस्यार्थः स्नानं च ग्रहणादिके ।
दानं संक्रान्तिके सन्ध्या वह्निदेहगृहार्चनम् ।।35।।

गोऽश्ववाहनभूम्यस्त्रवटवृक्षादिपूजनम् ।
नागार्चनं तथा नद्यां सागरे स्नानकं तथा ।।36।।

पाषाणशिकताराशेः सत्करोऽपि महाबुधैः ।
पर्वताग्निप्रपातश्च लोकमूढं प्रचक्ष्यते ।।37।।[1]

आत्मघातं महापापं विषशस्त्रादिभिः कृतम् ।
प्राहुर्बुधो भवेद्यस्मात् संसारे भ्रमणं सदा ।।38।।

वरादिवाञ्छया लोभाद्रागद्वेषादिदूषिताः ।
सेव्यन्ते देवतामूढैर्देवमूढत्वमेव तत् ।।39।।

गृहव्यापारसारम्भो भागिनां भववर्तिनाम् ।
पाखण्डिनां[2] कृता सेवा मता पाखण्डमूढता[3] ।।40।।

1.श्लोकोऽयं अ प्रतौ नास्ति

2.पाषंडिनां इति अ प्रतौ,

3.पाषंडमूढता इति अ प्रतौ

इति मूढत्रयेणोच्चैः सन्त्यक्तं शुद्धदर्शनम् ।
पालनीयं बुधैर्नित्यं व्रतसन्दोहभूषणम् ।।41।।

तथा सदृष्टिभिर्भव्यैस्त्याज्यं गर्वाष्टकं सदा ।
ज्ञात्वा धर्मस्य सद्भावं निर्मदं जिनभाषितम् ।।42।।[1]

ज्ञानं च पूज्यता लोके कुलं जातिर्बलं तथा ।
सम्पदा सुतयो रूपं दुर्धियां गर्वकारणम् ।।43।।

मलैः पञ्चादिविंशत्या त्यक्तमेतैर्जगद्धितम् ।
ज्ञेयं सम्यक्त्वसद्रत्नं भव्यैर्लोकद्वये हितम् ।।44।।

तथा चोपशमाद्याश्च त्रयो भेदाः जिनेश्वरैः ।
सम्यक्त्वस्य समाख्याताः केवलज्ञानभास्करैः ।।45।।

सप्तानां प्रकृतीनां हि शमादुपशमं भवेत् ।
संक्षयात् क्षायिकं तद्धि तन्मिश्रान्मिश्रनामकम् ।।46।।

व्यवहारेण सम्यक्त्वमिति प्रोक्तं च निश्चयात् ।
मोहक्षोभपरित्यक्ता या शुद्धा स्वात्मभावना ।।47।।[2]

उक्तं च संवेउंणिव्वेउं णिंदंणगुरहा उवसमो भत्ती ।
वच्छल्लं अणुकंपा अट्ठगुणा हुंति समत्ते ।।48।।

इति पूर्वोक्तसम्यक्त्वं मुक्तिबीजं सुखप्रदम् ।
यो भव्यो नित्यशः पाति सम्यग्दृष्टिः स एव हि ।।49।।

अधिष्ठानं यथा शुद्धं गाढं प्रासादरक्षणम् ।
तथा दानतपोलक्ष्मीकारणं दर्शनं मतम् ।।50।।

1.इतः संख्यायां त्रुटिरस्ति ब प्रतौ

2.सर्वेषु प्रतीषु इतः संख्यायां त्रुटिरस्ति

सम्यक्तरत्नसंयुक्तो भव्यः श्रीजिनभक्तिभाक्।
दुर्गतेर्बन्धनिर्मुक्तो भाविमुक्तिरमापतिः ॥51॥

शुभ्रतिर्यक् कुवेदत्वं स्त्रीत्वं नीचकुलादिकम् ।
रोगत्वाल्पायुर्दारिद्र्यं नैव प्राप्नोति निश्चयात् ॥52॥

किन्तु देवेन्द्रचक्र्यादिश्रियं सम्प्राप्य शर्मदाम् ।
नाना भोगशतैः कीर्णां जगच्चेतोऽनुरञ्जिनीम् ॥53॥

पुनः सम्यक्त्वमाहात्म्यात् ज्ञानं चारित्रमुत्तमम् ।
समासाद्यैव निर्वाणं सम्प्रयात्येव निश्चलम् ॥54॥

भो! भव्यास्त्रिजगत्सारं सम्यक्त्वं सौख्यसाधनम् ।
नापरं भुवने किञ्चित्तत् समं देहिनां हितम् ॥55॥

उक्तं च शमबोधवृत्ततपसां पाषाणस्येव गौरवम् ।
पुंसः पूज्यं महामणेरिव तदेव सम्यक्त्वसंयुक्तम् ॥56॥

तस्मात् सर्वप्रयत्नेन सम्यग्दर्शनमुत्तमम् ।
स्वर्गमोक्षश्रियो हेतुं भो! भव्याः सम्भजन्तु तत् ॥57॥

अर्हद्देवतदुक्ततत्त्वसुगुरुश्रद्धानमाहुर्बुधैः ॥
सम्यक्त्वं भवदुःखराशिदलनं तद्दुर्गतेर्नाशनम्॥58॥

ज्ञानध्यानतपोविधानविलसद्दानंक्रियामण्डनम् ।
बीजं धर्मतरोः करोतु नितरां स्वर्गापवर्गं सताम् ॥59॥

अदेवे देवताबुद्धिरगुरौ गुरुसम्मतिः ।
अतत्त्वे तत्त्वचिन्ता च मिथ्यात्वं तत्परित्यजेत् ॥60॥ **<u>इति सम्यक्त्वाधिकारः</u>**

अथ श्रीमज्जिनाधीशो नेमिनाथो जगद्गुरुः ।
संज्ञानलक्षणं प्राह भव्यानां ज्ञानहेतवे ॥61॥

पूर्वापरविरोधेन वर्जितं यच्च निर्मलम् ।
तदेव भुवने ज्ञानं भव्यानां लोचनं परम् ॥62॥

जीवानां सुदया यत्र स्थाप्यते शर्मकारिणी ।
संज्ञानं तद्बुधैः प्रोक्तं सर्व सम्पद्विधायकम् ॥63॥

जन्तूनां विद्यते यत्र हिंसादुःखशतप्रदा ।
तत्कुज्ञानं मतं सद्भिर्महापापस्य कारणम् ॥64॥

हिंसादिपातकं येन यन्न त्यज्यते जन्तुभिः सदा॥
तज्ज्ञानं सर्वजीवानां शर्मदं ज्ञानिभिर्मतम् ॥65॥

येन जीवो जडात्मापि लोकालोकं[1] हिताहितम् ।
निःसन्देहं विजानाति तज्जैनं ज्ञानमुत्तमम् ॥66॥

तद्भेदाः भूरिशः सन्ति सम्प्रोक्ताः श्रीजिनेश्वरैः ।
ज्ञातव्यास्ते महाभव्यैरागमे जिनभाषिते ॥67॥

महाधिकाराश्चत्वारो विद्यन्ते ये जगद्धिताः ।
संक्षेपेण प्रसिद्धांस्तान् वक्ष्ये संज्ञानसिद्धये ॥68॥

तीर्थेशां शान्तिकर्तॄणां पुराणं पुण्यकारणम्।
पञ्चकल्याणसम्पत्तेर्विस्तारैर्गुणधारणम् ॥69॥

तथा श्रीमद्गणाधीशचक्र्यादिचरितं शुभम् ।
प्रथमानुयोगदीपो भव्यानां सम्प्रकाशते ॥70॥

लोकालोकस्थितिः कालपरावर्त्तस्य लक्षणम् ।
भेदाश्चतुर्गतीनां च वर्तन्ते यत्र निश्चयात् ॥71॥

1.लोकं इति ब-द प्रत्योः, अ प्रतौ अनुपलब्धौ

संशयोरुत्तमो ध्वंसी भव्यानां शर्मदायकः ।
करणानुयोगरविः सम्प्रोक्तो मुनिसत्तमैः ॥72॥

मुनीनां श्रावकाणां च चारित्रं भुवनोत्तमम् ।
तस्योत्पत्तिश्च वृद्धिश्च सत्सुखं सुफलानि च ॥73॥

ज्ञायन्ते विस्तरेणोच्चैर्यत्र भव्यैर्निरंतरम् ।
चरणानुयोगचन्द्रः संज्ञेयो लोकसम्मतः ॥74॥

जीवाजीवादितत्वानां सप्तानां यत्र निश्चयः ।
पुण्यपापद्वये भेदसुखदुःखादिवर्णनम् ॥75॥

वर्तते यत्र भो! भव्या विस्तरेण जिनागमे ।
द्रव्यानुयोगनामासौ बोधो मिथ्यात्वनाशकृत् ॥76॥

द्वादशांगं श्रुतं चेति केवलज्ञानिभिर्जिनैः ।
स्वस्वभावेन भव्यानां भाषितं दिव्यभाषया ॥77॥

ततस्तथा गणाधीशैश्चतुर्ज्ञानविराजितैः ।
नानाग्रन्थस्वरूपेण गुम्फितं रचनाशतैः ॥78॥

संस्कृतप्राकृतैर्भेदैः श्लोककाव्यादिलक्षणैः ।
प्रोक्तं परोपकाराय स्वात्मनः सिद्धिहेतवे ॥79॥

सर्वागमपदानां च संख्या प्रोक्ता जिनागमे ।
कोटिशतं तथा कोट्यो द्वादश प्रविकीर्त्तिता ॥80॥

लक्षास्त्र्यशीतिरित्यष्ट पञ्चाशच्चारुसंख्यया।
सहस्राणि तथा पञ्च केवलं च पदानि वैः ॥81॥

संख्येति ग्रन्थतः प्रोक्ताः श्रुते श्रीजिनभाषिते ।
अर्थतस्तु च संख्यात्र प्राप्यते केन भूतले ॥82॥

महागमपदस्यापि कति श्लोकाः भवन्त्यहो ।
प्रश्नश्चेत्क्रियते भव्यैः श्रूयतां मुनिभिर्मतम् ॥83॥

श्लोकानामेकपञ्चाशत्कोट्यो लक्षकाष्टकम् ।
चतुर्भिरधिकाशीतिः सहस्राणि शतानि षट् ॥84॥

सार्द्धैकविंशतिश्चेति संख्या चैकपदस्यैव।
सम्प्रोक्ताः मुनिभिर्धीरैर्विशुद्धैर्बोधसिन्धुभिः ॥85॥

उक्तं च एक्कावन कोडीउ लखाअट्ठेवसहसचुलसीदी ।
सयछक्कं णायच्चं सद्ढाइगवीसपयगंथा ॥86॥

इत्यादिमहिमोपेतं श्रुतं श्रीजिनभाषितम् ।
समाराध्यं महाभव्यैः केवलज्ञानसिद्धये ॥87॥

श्रुतज्ञानं[1] जिनेद्रोक्तं लोकालोकाप्रकाशकम् ।
अनादिनिधनं पूतं कुज्ञानक्षयकारकम् ॥88॥

सद्गुरूणां पदाम्भोजसारसेवासमन्विताः ।
पञ्चप्रकारैर्ये भव्याः सारस्वाध्यायलक्षणैः ॥89॥

आराधयन्ति सद्भक्त्याः स्वस्थचित्तं विधाय च ।
ज्ञानविज्ञानसम्पत्तिं यशःकीर्तिं समाप्य च ॥90॥

सम्यग्ज्ञानप्रसादेन ते भव्याः सौख्यसागरम् ।
केवलज्ञानमुत्पाद्य दृष्टा सर्वं चराचरम् ॥91॥

जन्ममृत्युजरातंकदुःखशोकविवर्जितम् ।
अनन्तानन्तसत्सौख्यं मोक्षं संयाति निश्चितम् ॥92॥

---

1. श्रुत्वाज्ञानं इति स प्रतौ

उक्तं च ज्ञानस्वभावं स्यादात्मा स्वभावावाप्तिरच्युतिः ।
तस्मादच्युतिमाकांक्षन् भावयेद्ज्ञानभावनाम् ।।93।।

इति मत्वा जिनेन्द्रोक्तं संज्ञानं सम्पदाकरम् ।
मनोवाक्कायसंशुद्धा भजन्तु सुधियः श्रिये ।।94।।

श्रीमज्जिनेन्द्रचन्द्राख्या जातः श्रुतसुधां बुधिः ।
मया तुच्छधियां चापि श्रितो भूयाच्छिवश्रिये।।95।।

संज्ञानं जिनभाषितं शुभकरं कुज्ञानविध्वंसनम् ।
लोकालोकविलोकनैकनयनं सन्देहनिर्नाशनम् ।

जीवाजीवासुतत्वभेदकथकं[1] संज्ञानिसंजीवनम् ।
सर्वप्राणिसुखप्रमोदजनकं कुर्यात्सतां मंगलम् ।।96।। **इति ज्ञानाधिकारः**

अथ श्रीजिनदेवोऽसौ केवलज्ञानसम्पदः ।
सञ्जगौ चारुचारित्रं भव्यानां सुगतिप्रदम् ।।97।।

हिंसानृतं तथास्तेयं मैथुनं च परिग्रहः ।
एतेषां पञ्चपापानां त्यागो वृत्तं हि संज्ञिनाम् ।।98।।

इन्द्रनागेन्द्रचन्द्रार्कैः नरेन्द्राद्यैः समर्चितम् ।
श्रीमज्जिनेन्द्रचन्द्रोक्तं तच्चारित्रं द्विधा मतम् ।।99।।

मुनिश्रावकभेदेन भव्यानां सत्सुखप्रदम् ।
दुःखदारिद्र्यदौर्भाग्यदुराचारविनाशनम् ।।100।।

हिंसादिपञ्चपापानां साकल्येन विवर्जनात् ।
सकलं मुनिचारित्रं साक्षान्मोक्षप्रसाधनम् ।।101।।

1.सुभेदज्ञानकथकं इति ब प्रतौ

महाव्रतं तदेव स्यात् पञ्चधा भुवनोत्तमं ।
मनोवाक्कायसञ्जातास्तिस्रस्ता गुप्तयः शुभाः ॥102॥

तथा समितयः पञ्चपवित्रीकृतभूतलाः ।
त्रयोदशप्रकारं च चारित्रं भुवनार्चितम् ॥103॥

मुनीनां सम्भवत्येवं महास्वर्गापवर्गदं ।
तद्भेदाः भूरिशः सन्ति मूलोत्तरगुणादिभिः ॥104॥

ते श्रीनेमिजिनेन्द्रेण विस्तरेण जगद्धिताः ।
सम्प्रोक्ता भव्यजीवानां संसाराम्भोधितारकाः ॥105॥

तान् वक्तुं कः क्षमोमादृग्मेरोरपि समुन्नतान्।
भुजाभ्यां तीर्यन्ते केन क्षीरसिन्धुर्महानहो ॥106॥

त्रसानां पालनं कार्यं पञ्चस्थावरहिंसानात् ।
गृहिणामनुचारित्रं स्वर्गादिसुखसाधनम् ॥107॥

तत्र श्रावकधर्मेऽत्र शुद्धः सम्यक्त्वशोभिते ।
आदौ मूलगुणैर्भाव्यं भव्यानां शर्मदायकैः॥ 108॥

मद्यमांसमधुत्यागैः सहोदुम्बरपञ्चकैः ।
अष्टमूलगुणान् प्राहुर्गृहिणां पूर्वसूरयः ॥109॥

सूक्ष्मजन्तुभिराकीर्णं नीचलोकैः समाश्रितम् ।
बुद्धिनिर्नाशनं कष्टं मद्यं हिंसाकरं त्यजेत् ॥110॥

यच्च लोके दुराचारसहस्राणां हि कारणम् ।
कुलक्रमक्षयंकारी तत्त्याज्यं सर्वदा बुधैः ॥111॥

यद्विह्वलः कुधी प्राणी निपतन् यत्र तत्र च ।
मलैर्लिप्तो जनैस्त्यक्तो दूरतः कुर्कुरायते ॥112।

तन्मद्यं पापकृन्निद्यं संसाराम्भोधिपातकम् ।
नामतोऽपि सदा त्याज्यं सद्भिः स्वहितवाञ्छकैः ॥113॥

किमुच्यते परं लोके यत्पीत्वा कामपीडितः ।
भगिन्यादौ कुचित्तेन दुर्गतिं याति पापतः ॥114॥

यदुक्तं मुहुविलिहि विमुत्ता सुणहु एहुणमज्झहु[1] दोसो ।
मत्तउ बहिणिजिअ हिलसइतें तरूणरइपएसु ॥115॥

अतो विवेकिभिर्भव्यैः कुललज्जादयापरैः ।
मनोवाक्कायतो नित्यं तत्त्याज्यं धर्महेतवे ॥116॥

तथा तद् व्रतशुद्ध्यर्थं संगतिर्मद्यपायिनाम् ।
अष्टभिश्च मदैः सार्धं सन्त्याज्यं सद्विचक्षणैः ॥117॥

मूलतोऽपि सुयत्नेन व्याधिः सञ्छेदितो यथा ।
नैव पीडां करोतीह कदाचिदपि देहिनाम् ॥118॥

द्विधातुजं भवेन्मासं जन्तुघातसमुद्भवम् ।
महापापप्रदं नित्यं सन्त्याज्यं दूरतो बुधैः ॥119॥

महानरकं संवासदायकं दुःखहेतुकम् ।
ज्ञातव्यं पलमेकं हि घोरसंसारपातकम् ॥120॥

कृतं च कारितं चापि तन्निमित्तानुमोदनम् ।
प्राहुः प्राज्ञाः महापापं दुःखकोटिप्रदायकम् ॥121॥

महामिथ्योदयेनात्र येन तद्भक्ष्यतेपलम् ।
सनिंद्यो भुवने पापी भवेत्तद्दुखैकभाजनम् ॥122॥

---

1. एहुणमज्जहु इति ब प्रतौ

धर्मकल्पद्रुमस्योच्चैर्दयामूलं भवत्यलम् ।
तद्भक्षिणः कुतो धर्मो बीजाभावे यथा फलम्[1] ।।123।।

उक्तं च
दयाजिमूलु धम्मं ग्घियहो सो उप्पाडिउं तेण।
दलफलकुसुमहकवण कह अमिसु भक्खिउ जेण ।।124।।

यन्नाम दर्शनाच्चापि सतां दुःखं प्रजायते ।
तल्लम्पटो महापापी कथं दुःखी न भूतले ।।125।।

तद्भक्षिणो वृथा स्नानं धौतवस्त्रादिकं वृथा ।
यथा काकबकादीनां नद्यां स्नानं न शुद्धये ।।126।।

येषां कुले पलं नास्ति स्वप्ने चापि महात्मनां ।
त एव भुवने भव्या पवित्राः परमार्थतः ।।127।।[2]

तथा तद् व्रतशुद्ध्यर्थं पवित्रैर्भव्यदेहिभिः ।
चर्मवारिघृतं तैलं त्याज्यं हिंगुतदाश्रितम् ।।128।।

उक्तं च
चर्मस्थम्भः स्नेहश्च हिंगुसंहृतचर्म च।
सर्वं च भोज्यं व्यापन्नं दोषः स्यादामिषव्रते ।।129।।

चर्मस्थिते घृते तैले तोये चापि विशेषतः ।
रसोत्पन्नाः सदा जीवाः सम्भवेयुर्मतं बुधैः ।।130।।

यदुक्तं -
घृतेन तैलेन जलेन योगतो भवन्ति जीवाः किल चर्म संस्थिताः
रवीन्दुकान्तैरिव वह्नि पुष्करे विदांवरैः केवलिभिस्त्वतीरितम् ।।131।।

तथाचोक्तं -
चम्महिय पीयइ जलइं तामच्छ उदूरेण ।
दंसण सुद्धि ण होइ तसुखद्धेंघियतेल्लेण ।।132।।

1.बीजीभावे यथा फलम् इति अ प्रतौ

2.श्लोकोऽयं ब प्रतयोः नास्ति

उक्तं च - शौचाय कर्मणे नेष्टं कथं स्नानादिहेतवे।
चर्मवारिपिवन्नेष व्रती न जिनशासने ॥133॥

तथाचोक्तं - हिंगुघियतेल्लसलिलं चम्मगयं वयजुदाण णहु जुत्तम्।
सुहुमतसुप्पत्ति जदो मंसवए दूसणं जादो ॥134॥

इत्यादिसूरिभिः प्रोक्तं निधाय निजमानसे।
मांसव्रतसुरक्षार्थं चर्मतोयादिकं त्यजेत् ॥135॥

मक्षिकावमनं निन्द्यं मद्योत्पाद्यं च सर्वथा।
अनेकजन्तुसंकीर्णं पापराशिप्रदायकम् ॥136॥

यन्माक्षिकं जगन्निन्द्यं दृश्यते कलिलाकृतिः।
तत्त्याज्यं साधुभिर्नित्यं जिनेन्द्रवचने रतैः ॥137॥

तद्भक्षणे महापापं जायते नात्र संशयः।
त द्विर्तिका शरीरेऽपि नैव धार्या व्रतान्वितैः ॥138॥

तथा तद्व्रतशुद्ध्यर्थं जैनतत्त्वविदांवरैः।
रसार्द्रं कुसुमं चापि वर्जनीयं हि सर्वथा ॥139॥

वटादिपञ्चकं चापि त्रसजीवैर्भृतं सदा।
उत्तमैः सर्वथा त्याज्यं पापदुखैककारणम् ॥140॥

तिल्लादिनी च लोकानां यद्भक्ष्यं पापकर्मणां।
तत्साधुभिः सदा त्याज्यं पञ्चोदुम्बरपातकम्[1] ॥141॥

तथा पुण्यधनैर्भव्यैः स्वव्रतप्रतिपालकैः।
अज्ञातं संकटे चापि फलं हेयं हि[2] सर्वदा ॥142॥

1.पंचकं इति अ प्रतौ
2.हेयंति इति अ प्रतौ

उक्तं च - यशोधरसूरिभिः मद्यपलमधुनिशाशनपञ्चफली विरतिः।
पञ्चकाप्तनुतिजीवदयागालनमिति च क्वचिदष्टमूलगुणाः ॥143॥[1]

इत्यष्टौ जिनसूत्रेण प्रोक्ताः मूलगुणाः सदाः ।
श्रावकाणां सुखं प्राप्ताः पालनीयाः विवेकिभिः ॥144॥

अष्टौ मूलगुणान् जगत्त्रयहितान् संसारविच्छेदकान् ।
यो भव्यः प्रतिपालयत्यनुदिनं सम्यक्त्वपूर्वं दृढ़ान् ।
श्रीमज्जैनमते जगत्त्रयहिते सन्तुष्टचित्तो महान् ।
स श्री सौख्यलसत्प्रतापविजयं कीर्तिप्रमोजं भजेत् ॥145॥

अणुव्रतानि पञ्चैव त्रिप्रकारं गुणव्रतं ।
शिक्षाव्रतानि[2] चत्वारि गृहिणां द्वादशप्रमम् ॥146॥

चारित्रं मुनिभिः प्रोक्तं दुराचारविनाशनम् ।
प्रीत्या सम्पालनं सारसौख्यसम्पत्तिकारणम् ॥147॥

स्थूलेभ्यः पञ्चपापेभ्यो हिंसादिभ्यः सतां सदा ।
सम्भवेद्विरतिर्या सा तदणुव्रतपञ्चकम् ॥148॥

सर्वदा चित्तसंकल्पात्तत्र स जीवबधस्त्रिधा ।
क्रियते नैव यत्तच्च प्रथमं स्यादणुव्रतम् ॥149॥

अहिंसा शस्यते सा च यन्नामस्थापनादिभिः ।
हन्यते नात्रऽसौ जीवः क्वापि पिष्टादिनिर्मितः ॥150॥

देवतामंत्रसिध्यर्थमौषधादिनिमित्तकम् ।
चेतनोऽचेतनो जीवो नैव हन्यो हितार्थिभिः ॥151॥

त्रसानां रक्षणकार्यं सर्वदा भव्यदेहिभिः ।
मनोवाक्काययोगेन धर्मतत्त्वविदां वरैः ॥152॥

1.दप्रतौ 88पृष्ठतः 101 पृष्ठपर्यंतम पृष्ठाः अनुपलब्धाः (141तः 184पर्यंतात् श्लोकाश्च अनुपलब्धाः)
2.शिख्याव्रतानि इति अ प्रतौ

श्रावकव्रतपूतानां पक्षोऽयं भाषितो जिनैः ।
हिंसा सांकल्पिकी नित्यं त्रसानां त्यज्यते हि यत् ।।153।।

तथा बंधबधच्छेदभूरिभाराधिरोपणम् ।
आहारवर्जनं चापि पञ्चदोषा अहिंसने ।।154।।

एतैर्दोषैर्विनिर्मुक्तं सद्दयां त्रसदेहिनाम्।
भव्यस्त्रिधा करोतीह सव्रती श्रावकोत्तमः ।।155।।

इत्यादिभूरिभेदैर्यो भवेद्भव्यो दयापरः ।
जिनेन्द्रवचने नित्यं सावधानो विचक्षणः ।।156।।

इंद्रनागेन्द्रचक्र्यादिसंपदां शर्मदायिनाम् ।
पुत्रमित्रकलत्रादिधनैर्धान्यैः समन्विताम् ।।157।।

रूपसौभाग्यसद्गोत्रैर्नानाभोगशतैर्युताम् ।
संप्राप्य श्रीजिनेन्द्रोक्तं रत्नत्रितययोगतः ।।158।।

क्रमेण केवलज्ञानी भूत्वा त्रैलोक्यपूजितः ।
शाश्वतीं श्रियमाप्नोति जरामरणवर्जिताम् ।।159।।

हिंसापापप्रदोषेण त्रसानां मूढमानसः ।
दुःखदारिद्रयरोगादेर्दुर्गतेर्भाजनं भवेत् ।।160।।

तत्रापि छेदनं शस्त्रैर्भेदनं यंत्रपीलनम्।
भुक्त्वा चिरं ततो घोरे संसारे पतति ध्रुवम् ।।161।।

ततो जिनेन्द्रसूत्रेण कृत्वा हिंसाविवर्जनम् ।
भव्या भवंतु भो यूयं सारसंपद्विभागिनः ।।162।।

लोके जीवदयासमस्तसुखदा प्रोक्ता जनानां जिनैः ।
येभव्या भवदुःखराशिदलिनीं तां पालयंति त्रिधा ।।

ते नित्यं त्रिदशादिशर्मजननीं संप्राप्य सत्संपदाम् ।
पश्चान्मुक्तिरमाप्रमोदमतुलं शुद्धं लभंते बुधाः ।।163।।

स्थूलासत्यं वचो यच्च सत्यं पीडाकरं च यत् ।
स्वयं वदति नैवात्र न परान् वादयत्यलम् ॥164॥

तं च स्थूलमृषात्यागं संप्राहुर्गृहिणां बुधा ।
यच्च लाभभयद्वेषैर्व्यलीकं वचनं न च ॥165॥

तथा मर्मव्यथं वाक्यं कर्णयोर्दुःखकारणम् ।
अपथ्यं च न वक्तव्यं सत्यवाक्यपरायणैः ॥166॥

हितं मितं तथा पथ्यं विरोधपरिवर्जितम् ।
कर्णयोर्हृदयस्यापि वचो जल्पंति साधवः ॥167॥

पशवोपि महाक्रूराः प्रियवाक्यप्रसादतः[1] ।
तेपि तुष्यंति तन्नित्यं वक्तव्यं साधुभिः प्रियम् ॥168॥

ये वदन्ति सदा सत्यं वचः सर्वजनः प्रियम् ।
ते भवन्ति महाभव्याः कीर्त्या व्याप्तजगत्त्र्याः ॥169॥

मिथ्योपदेशकश्चापि रहोभ्याख्यानकं तथा ।
पैशून्यं कूटलेखं च तथान्यासापहारता ॥170॥

एते सत्यस्य पञ्चापि व्यतीचाराःप्रकीर्तिता ।
वर्जनीयाः सदा भव्यैर्जिनेन्द्रवचने रतैः ॥171॥

सत्येन कीर्तिरमला विमला च लक्ष्मीः ।
विद्याविलासं सुयशोभुवने प्रसिद्धिः ॥
सम्प्राप्यते बुधजनैर्जनमान्यता च ।
तस्मात्सदानृतवचः प्रवदन्तु सन्तः ॥ 172॥

स्थूलस्तेयपरित्यागं तं वदन्ति मुनीश्वराः ।
यत्परेषां धनाद्युच्चैरदत्तं गृह्यते न हि ॥173॥

1.प्रियवाक्यप्रदानतः इति स प्रतौ

विस्मृतं पतितं चाप्य पथे वा पथिकानने ।
स्थापितं च परद्रव्यं न ग्राह्यं स्तेयदूरगैः॥174॥

धनं धान्यं सुवर्णञ्च मणिमुक्ताफलादिकम् ।
परेषां ये न गृह्णन्ति स्तेयभावेन धीधनाः॥175॥

ते तद्व्रतप्रसादेन भवेयुर्निधिभागिनः ।
नाना संपत्सहस्रेण मण्डिताः परजन्मनिः ॥176॥

यत्र लोभग्रहग्रस्ताः परद्रव्यं हरन्ति च ।
तैः संहृताः परप्राणाः परं पापं किमुच्यते ॥177॥

यो मूढश्चोरयित्वा च परद्रव्यं गृहं नयेत् ।
तेन स्वमूलनाशश्च विहितो नात्र संशयः ॥178॥

ततो दुःखी दरिद्री च रोगी शोकी विरूपकः ।
परद्रव्यापहारेण संसारे संसरत्परम् ॥179॥

तस्मात्सन्तोषतो नित्यं मनोवाक्काययोगतः ।
स्तेयत्यागो दृढं भव्यैः पालनीयः सुखप्रदः ॥180॥

स्तेयप्रयोगकस्तेयाहृतादानं विलोपनम् ।
हीनाधिकं तथा मानं सदृशे वस्तुमिश्रणम् ॥181॥

एते स्तेय व्रतस्यापि व्यतीचाराश्च पञ्च वै ।
संत्याज्या व्रतरक्षार्थं धीधनैर्सर्वथा त्रिधा ॥182॥

जिनपतिकथितं ये स्तेयदोषं च मत्वा ।
मनसि विशदचित्तास्तद्व्रतं पालयंति ।

इह परभवलक्ष्मीः शर्मसम्प्राप्यते वै ।
परमसुखनिधानं प्राप्नुवन्त्येव भव्याः ॥183॥

यत्सन्तः सर्वथा नित्यं परस्त्रीषु पराङ्मुखा।
स्वनारीष्वेव सन्तुष्टास्तच्चतुर्थमणुव्रतम् ।।184।।

हावभावविलासाद्या स्वयं गृहमागता[1] ।
परस्त्रीसर्वथा त्याज्या सद्भिः सच्छीलधारिभिः ।।185।।

ते धीराः पण्डिताः शूरास्ते भव्या गुणसागराः ।
मनोवाक्कायतो नित्यं ये परस्त्रीपराङ्मुखाः ।।186।।

परस्त्रीरूपमालोक्य सन्तो यान्ति नतानना ।
मेघधारा हता वृद्धा यान्ति वा वृषभा द्रुतम् ।।187।।

न्यायोपार्जितभोगाश्च सतां चित्तेषु सर्वथा ।
प्रीतये न भवन्त्येव कथ्यन्ते न्यायवर्जिताः ।।188।।

परपाणिग्रहाक्षेपानंगक्रीडाविटत्वकम्[2] ।
भूरिभोगतृषा चापीत्वरिकागमनं तथा ।।189।।

पञ्चैतेऽपि व्यतीचाराश्चतुर्थाणुव्रते मताः ।
सन्तः स्वव्रतसिध्यर्थं सनयजन्त्येव तानपि ।।190।।

एवं येऽत्र महाभव्या मनोवाक्काययोगतः ।
परस्त्रियं त्यजन्त्युच्चैस्ते लभंते परमं पदम् ।।191।।

परस्त्रीलंपटो मूढः पापं वैरं विधाय च ।
प्रायेण दुर्गतिं याति तस्मात्तां दूरतस्त्यजेत् ।।192।।

कामदेवाकृतिं चापि नरं वीक्ष्य परं तथा ।
भ्राता मेयं पिता चेति चिन्तनीयं कुलस्त्रियाः ।।193।।

1.गृहमागतः इति ब प्रतौ
2.विटल्वकम् इति स प्रतौ

विशदचंद्रकरद्युतिनिर्मला भवति कीर्तिरनुत्तरसंपदा।
जिनपतेर्वचनामृतपायिनां विमलशीलवतामिह देहिनाम् ॥194॥

धनधान्यसुवर्णादौ चीरकर्पूरकादिषु।
चतुः पदादिके संख्या पञ्चमं तदणुव्रतम् ॥195॥

संख्यां विना न सन्तोषो जायते भुवि देहिनाम्।
यथा भूरिनदीतोयैर्नैव तृप्तिः सरित्पतेः ॥196॥

इति ज्ञात्वा बुधैः कार्यं परिमाणं परिग्रहे।
जायते[1] येन सन्तोषो लोकद्वयसुखावहः ॥197॥

अतिवाहनं तथातिसंग्रहश्च विषादकः।
भूरिलोभो महाभारवाहनं पापकारणम् ॥198॥

पञ्चमाणुव्रतस्यैते विक्षेपाः पञ्चधा स्मृताः।
तेपि त्याज्या व्रतोपेतैः सज्जनैर्धर्महेतवे ॥199॥

इत्युच्चैर्जिनभाषितानि नितरां प्रीत्या प्रमादोज्झिताः।
पञ्चाणुव्रतसुव्रतानि सुधयः सुश्रावका नित्यशः ॥
ये भव्याः प्रतिपालयन्ति जगति प्राप्यात्र सत्सम्पदाम्।
ते पश्चाद्भवभूरिसिंधुतरणं कृत्वा लभंते शिवम् ॥200॥

अणुव्रतानि पञ्चेति कथितानि मुनीश्वरैः।
श्रावकाणां तथा रात्र्यभुक्तिः षष्टमणुव्रतम् ॥201॥

पतत्कीटपतंगादेर्भक्षणान्निशिभोजनम्।
महापापप्रदं त्याज्यं मांसव्रतविशुद्धये ॥202॥

रात्रौ स्नानविवर्जनं दिनपतेर्नो दृश्यते दर्शनम्।
मुग्धैश्चापि न भक्ष्यते कणचरैर्धान्यादिकं चवर्णम्।
तत्किं धर्मवतां विशुद्धमनसां सत्प्राणिनां युज्यते।
रात्रौ भोजनमामवृद्धिजनकं सामान्यवद्दुःखदम् ॥203॥

1.जायतो इति अ प्रतौ

मक्षिका कारयत्येव वांति कंठक्षतिं वचः ।
करोति भक्षिता तत्र यूका चापि जलोदरम् ॥204॥

पुरा केनापि विप्रेण भुञ्जता निशिभोजनम् ।
मण्डूकोऽपि मुखे क्षिप्तः का वार्ता सूक्ष्मजन्तुषु ॥205॥

ततो भव्यैर्जिनेन्द्रोक्तं व्रतेषु प्रीतमानसैः ।
निशाहारः सदा त्याज्यो मनोवाक्कायशुद्धितः ॥206॥

संत्यज्य घटिके द्वे द्वे दिनस्यांते मुखेपि च ।
सर्वथा भोजनं कार्यं धर्मसारविचक्षणैः ॥207॥

सामान्यतो निशायां च जलं ताम्बूलमौषधम् ।
गृह्णन्ति चेह गृह्णंतु नैव ग्राह्यं फलादिकम् ॥208॥

येऽत्र भव्या निशाहारं संत्यजंति चतुर्विधम् ।
षण्मासो रूपवासानां[1] तेषां संवत्सरे शुभम् ॥209॥

रात्रिभुक्तिपरित्यागव्रतोपेतैर्विचक्षणैः ।
अन्धकारे दिने चापि भोक्तव्यं नैव सर्वदा ॥210॥

इत्यादि युक्तितो नित्यं रात्रिं भुक्तिं त्यंजति ये ।
ते भवन्ति महाभव्याः स्वकुलाम्भोजभास्कराः ॥211॥

रात्रिभोजनसंत्यागाद्रूपसौभाग्यसम्पदा ।
सत्कुलं विमलां कीर्तिकान्तिशान्तिगदोज्झिताम् ॥212॥

पुत्रपौत्रादिबंधुत्वं मणिमुक्ताफलादिकम् ।
स्त्रियो वा पुरुषाश्चापि प्राप्नुवन्ति स्ववाञ्छितम् ॥213॥

काणांधाबधिरामूका दुःखदारिद्र्यपीडिताः ।
रात्रिभोजनपापेन भवन्ति सुखवर्जिताः ॥214॥

1.तूपवामानां

जन्तवोऽन्य भवे चेति मत्वा भव्याः स्वमानसे ।
स्वर्गमोक्ष[1] सुखप्राप्त्यै रात्रिभुक्तिं त्यजन्त्वलम् ॥215॥

जिनपतिकथितं वै धर्मसारं विदित्वा ।
परमपदमुदारं प्राप्यते येन भव्यैः ॥216॥

कुगतिशतनिवारं पुण्यसारं भजन्तु ।
विशदविपुलं चिन्तावर्जनं रात्रिभुक्तेः ॥217॥

तथा सुश्रावकैः कार्यं मौनं सद्भोजनादिषु ।
ज्ञानस्य विनयार्थं हि संतोषार्थं च धीधनैः ॥218॥

मलमूत्रोज्झने स्नाने पूजने परमेष्ठिनाम् ।
भोजने सुरते स्तोत्रे सतां मौनव्रतं मतम् ॥219॥

यत्किञ्चिदुच्यते वाक्यमक्षरैरेव तज्जनैः ।
ज्ञानप्रकाशान्युच्चैस्तानि सन्ति महीतले ॥220॥

ततः सुश्रावकैर्भव्यैर्ज्ञानस्य विनयश्रिये ।
सप्तस्थानेषु कर्तव्यं मौनं शर्मशतप्रदम् ॥221॥

एवं श्रीमद्गणाधीशैः प्रोक्तं मौनव्रतं शुभम् ।
ये भव्याः पालयन्त्युच्चैस्तेषां स्यात् ज्ञानसम्पदाम् ॥222॥

सरस्वत्याः प्रसादेन दिव्यनादो भवेत्तराम् ।
सौभाग्यं सुन्दरत्वं च मौनव्रतविशुद्धितः ॥223॥

यथा भवन्ति पद्मानि स्वच्छतोयप्रयोगतः ।
तथा मौनव्रतेनात्र स्यात्सतां ज्ञानसम्भवः ॥224॥

चापल्यं दन्तबन्धेन जल्पनं तीव्रहुंकृतिम् ।
हास्यं च लिखनं चापि भोजनावसरे त्यजेत् ॥225॥

1.सुर्गामोक्ष... इति स प्रतौ

अग्निवत्सर्वभक्षित्वं परित्यज्य दृढव्रती ।
शान्तताभावमापन्नः कुर्यात्सद्भोजनं सुधीः ॥226॥

तथा सुश्रावकाणाञ्च सप्तधा चांऽतरायकः ।
भोजनावसरे प्रोक्तो मूलव्रतविशुद्धये ॥227॥

मांसरक्तार्द्रचर्मास्थि पूयं वीक्ष्य मृताङ्गिकम् ।
भोजनं परिहर्त्तव्यं प्रत्याख्यानान्न सेवनात् ॥228॥

तथा चाण्डालकादीनां दर्शने वचने श्रुते ।
मलादिदर्शने[1] चापि त्याज्यं भोज्यं विचक्षणैः ॥229॥

जलानां गालनं पुण्यं सतां प्राहुर्मुनीश्वराः ।
सदा जीवदयासिध्यैः गाढवस्त्रेण सर्वथा ॥230॥

उक्तञ्च- षट्त्रिंशदंगुलं वस्त्रं चतुर्विंशतिविस्तृतम् ।
तद्वस्त्रं द्विगुणीकृत्य तोयं तेन तु गालयेत् ॥231॥

प्रमादो नैव कर्तव्यो जलानां गालने बुधैः ।
श्रीमज्जैनमते दक्षैः सदाजीवदयापरैः ॥232॥

पिबन्ति गालितं तोयं येत्र भव्या विचक्षणाः ।
अन्यथा पशुभिस्तुल्याः पापतोविकलाशयाः ॥233॥

गालितं तोयमप्युच्चैः सन्मूर्छति मुहूर्त्ततः ।
प्रासुकं यामयुग्माच्च सदुष्टं प्रहराष्टकात् ॥234॥

कर्पूरैः लालवगाद्यैः सुगंधैः सारवस्तुभिः ।
प्रासुकं क्रियते तोयं कषायद्रव्यकैस्तथा ॥235॥

जैनधर्मे तथा नीतिमार्गे सद्भिः प्रकीर्तितम् ।
जलस्य गालनं धर्मः प्रसिद्धो भुवनत्रये ॥236॥

1.मलापिदर्शने इति अ प्रतौ

दृष्टिपूतं न्यसेत्पादं[1] पटपूतं जलं पिबेत् ।
सत्यपूतं वदेद्वाक्यं मनःपूतं समाचरेत् ।।237।।

यस्माज्जलं समानीतं गालयित्वा सुयत्नतः ।
तज्जीवसंयुतं तोयं तत्रोच्चैर्मुच्यते बुधैः ।।238।।

एवं यत्नं प्रकुर्वन्ति ये सदा जलगालने ।
भवन्ति सुखिनो नित्यं ते भव्याः धर्मवत्सलाः ।।239।।

कंदं मूलं च सन्धानं कान्जिकं वह्निदूरगम् ।
नवनीतं पुष्पशाकं विल्वालाबुफलं त्यजेत् ।।240।।

त्यजेदनंतकायित्वाच्छृंगवेरादिकं सदा ।
तुच्छेन भक्षितेनापि येन पापं भवेन्महत् ।।241।।

जिनेन्द्रवचने प्रीता ये भव्याः सद्दयान्विताः ।
तैर्नित्यं कंदमूलञ्च सर्वं त्याज्यं मद्यप्रदम् ।।242।।

सन्धानं त्रसजीवानां शरीरसमिश्रितम् ।
किं परं भक्षिते तस्मिन् प्रयाति पिशितव्रतम् ।।243।।

एकेन्द्रियादिका जीवा जायन्ते शीतकाञ्जिके ।
तस्मात्तद्व्रतरक्षार्थं कांजिकं शीतलं त्यजेत् ।।244।।

उक्तञ्च-
चदुंएइंदियविणिछह अट्ठहंतिणि हवन्ति ।
दहचउरिंदी य जीवडा बारह पञ्च णभन्ति ।।245।।

मूहूर्तद्वयतः पश्चाज्जीवाश्चैकेंद्रियादयः ।
जायन्ते नवनीतेऽपि तत्तस्मात्त्यज्यते बुधैः ।।246।।

गोर्महिष्याः पयश्चापि वत्सोत्पत्तिदिनात्तथा ।
संत्याज्यं सर्वथा सद्भिः पक्षेमेकं विचक्षणैः ।।247।।

1.निसेत्पादं इति अ,ब प्रतयोः , निस्येत्पादं इति स प्रतौ

दुग्धे तक्रपरिक्षेपाद्दधितक्रं दिनद्वयम् ।
ग्राह्यं ततः परं भव्यैर्वर्जनीयं च सर्वदा ॥248॥

इत्यादिकं परित्याज्यं यत्प्रोक्तं श्रीजिनागमे ।
कन्दमूलादिकं वस्तु तत्त्याज्यं श्रावकोत्तमैः ॥249॥

तथा श्रावकलोकानां दिग्देशाऽनर्थदण्डकम् ।
गुणव्रतं त्रिधा प्राहुर्मुनीन्द्राः श्रुतधारिणः ॥250॥

मर्यादां मृत्युपर्यन्तं कृत्वा यत् सर्वदिक्षु वै ।
गम्यते न ततो बाह्यं तदाद्यं स्याद्गुणव्रतम् ॥251॥

नदीसमुद्रगिर्यादियोजनाद्यैर्विचक्षणैः ।
मर्यादा सात्र विज्ञेया देशग्रामादिभिस्तथा ॥252॥

उर्द्ध्वार्धस्तिर्यगाक्रान्तिः क्षेत्रवृद्धिश्च विस्मृतिः ।
दिग्व्रतस्याप्यतीचाराः पञ्चैते ज्ञानिभिःस्मृताः ॥253॥

देशव्रतं तथा प्रोक्तं यद्दिशालस्य संहृतिः ।
दिनं प्रति स्वशक्त्या च क्रियते श्रावकोत्तमैः ॥254॥

तस्य चापि गृहग्रामनदीयोजनकादिभिः ।
मर्यादां मुनयं प्राहुः परमागमचक्षुषः ॥255॥

प्रेषणशब्दानयनं रूपाभिव्यक्तिरत्र च ।
पुद्गलक्षेपणं पञ्चातीचारा देशसद्व्रते ॥256॥

पापोपदेशकं हिंसादानाऽपध्यानदुःश्रुतीः ।
प्राहुः प्रमादचर्यां च पञ्चानर्थादिदण्डकान् ॥257॥

पशुक्लेशवाणिज्यादि हिंसारंभप्रवंचनैः ।
उपदेशो हि यः सोऽत्र ज्ञेयः पापोपदेशकः ॥258॥

खड्गाद्यायुधरज्वादि श्रृंखलामुशलार्चिषाम् ।
दानं दुःखप्रदं प्रोक्तं हिंसादानं बुधोत्तमैः ॥259॥

शत्रूणां द्वेषभावेन वधबंधनामारणैः ।
परस्त्रयादिषु दुश्चिंता त्वपध्यानमुदाहृतम् ॥260॥

रागद्वेषमहारम्भः हिंसामिथ्यात्ववर्द्धिनी ।
दुःश्रुतिः सुश्रुतज्ञैश्च सा प्रोक्ता पापकारिणी ॥261॥

भूमितोयाग्निवातादिवनस्पतीविराधनम् ।
वृथाऽटनादिकं चेति चर्या प्रोक्ता प्रमादजा ॥262॥

मार्जारं कुर्कुरं कीरं वानरं चित्रकादिकान् ।
पाराथतादिकान् गेहे पोषयन् पापभाग् भवेत् ॥263॥

उक्तञ्च- लोहलखुविसुसणु मयणुदुद्दहभरणुपसुभारु ।
बंडि अणत्थहं पिडिपडिउं किमतरहसि संसारु ॥264॥

कन्दर्प्यं चापि कौत्कुच्यं मौखर्यं सुप्रसाधनम्[1] ।
अत्रासमीक्षिताधिकरणं पञ्च व्यतिक्रमाः ॥265॥

तथा शिक्षाव्रतान्युच्चैर्जगुश्चत्वारि[2] साधवः ।
सामायिकं सदा पर्वोपवासो निर्जराकरः[3] ॥266॥

भोगोपभोगवस्तूनां सदा संख्यासुखप्रदा ।
संविभागोऽतिथीनाञ्च क्रमात्तद्विस्तरं ब्रुवे ॥267॥

सर्वथा सर्वसावद्यत्यागश्च समयं भवेत् ।
सामायिकं व्रतं पूतं प्राहुः सद्धर्मवेदिनः ॥268॥

1.सुप्रसादतः इति स प्रतौ

2.शिष्यात्रति इति अ-स प्रतयोः, शिख्यात्रत... इति ब प्रतौ

3.निर्जकरकराः इति अ प्रतौ

समत्वं सर्वजीवेषु संयमः शुद्धभावना।
आर्तरौद्रपरित्यागस्तद्धि सामायिकं व्रतम् ॥269॥

चैत्यालये तथैकांते गृहे वा स्वस्थचित्तभाक्।
स्थानं पद्मासनं स्थित्वा कुर्यात्सामायिकं सुधीः ॥270॥

चैत्यपञ्चगुरूणाञ्च भक्त्यादि क्रमयोगतः।
महावैराग्यभावेन द्वित्रिसंध्यं तदाचरेत् ॥271॥

उक्तञ्च- जिणवयणधम्मचेईय परमेट्ठि जिणालयाणणिच्चं पि।
जं वंदणं तियालं कीरई सामाइयं तं खु ॥272॥

एकोऽहं शुद्धबुद्धोऽहं कर्मभिर्वेष्टिनोऽपि च।
संसारे कोऽपि मे नाहं नैव कस्येति चिन्तयेत् ॥273॥

चिन्तारम्भं मदं द्वेषं कामक्रोधादिचिन्तनम्।
यथा कालं परित्यज्य सुधीः सामायिकं भजेत् ॥274॥

शीतोष्णादिकबाधाञ्च दंशाद्यैश्चोपसर्गकम्।
जिनेन्द्रवचने धीरः सहमानस्तदा श्रयेत् ॥275॥

केशबंधस्तदामुष्टिबंधः पल्यंकबंधनम्।
वस्त्रादि बंधनश्चेति प्राहुस्तत्समयं बुधाः ॥276॥

उक्तपञ्चव्रतानां हि पूरणं धर्मकारणम्।
नित्यं सामायिकं भव्याः संकुर्युर्दुःखवारणम् ॥277॥

पूर्वाचार्यक्रमेणोच्चैर्ये कुर्वन्ति विचक्षणाः।
सामायिकं त्रिशुद्ध्या च भवभ्रमणनाशनम् ॥278॥

ते भव्याः श्रीजिनेन्द्राणां महाभक्तिपरायणाः।
क्रमात्स्वर्मोक्षजं सौख्यं प्राप्नुवन्त्येव निर्मलम्॥279॥

मनोवाक्काययोगानां त्रिभिर्दुःप्रणिधानकैः ।
निरादरास्मृती सामायिके पञ्चव्यतिक्रमाः ।।280।।

अष्टम्याञ्च चतुर्दश्यां प्रोषधः क्रियते सदा ।
कर्मणां निर्जराहेतुः श्रावकाचारचंचुभिः ।।281।।

अन्नपानं च खाद्यं च लेह्यं चेति चतुर्विधम् ।
आहारं संत्यजेद्भव्यः प्रोषधस्य दिने सुधीः ।।282।।

पूर्वस्मिन् दिवसे चैकं भक्तं प्रोक्तं सुयुक्तितः ।
उपवासं विधायोच्चैः पारणादिवसेऽपि च ।।283।।

स प्रोषधोपवासस्तु समुत्कृष्टः प्रकीर्तितः ।
तद्दिने पञ्चपापानां संत्यागोऽपि विधीयते[1] ।।284।।

मलस्नानं तथा नस्यं नेत्रयोः कज्जलादिकम् ।
शरीरे मण्डनं चापि संत्यजेदुपवासयुक् ।।285।।

श्रीमज्जिनेन्द्रसञ्ज्ञानं गुरूणां पादसेवया ।
धर्मध्यानेन भव्येन स्थातव्यं तद्दिने सुखम् ।।286।।

धर्मोपदेशपीयूषं श्रवणांजलिभिः सुधीः ।
संपिवन् पाययंश्चान्यानुपवासे शुभं भजेत् ।।287।।

एवं सुयुक्तितो भव्यः प्रोषधं यः करोत्यलम् ।
कर्मणां निर्जरा तस्य संभवेन्मुनिभिर्मतम् ।।288।।

अवीक्ष्य ग्रहणं वस्तु मोचनास्तरणः[2] तथा ।
अनादरास्मृती पञ्चप्रोषधेऽपि व्यतीक्रमाः ।।289।।

भोगपभोगयोस्त्यागे यमश्च नियमो मतौ ।
यावज्जीवं यमो ज्ञेयो नियमः शक्तिकालभाक् ।।290।।

1.विधायते इति ब प्रतौ

2.मोचनास्तरणो इति अ - ब प्रतयोः

अन्नपानादिताम्बूलं भुज्यते भोगवस्तु यत् ।
स भोगः कथ्यते सद्भिर्धर्मशास्त्रविचक्षणैः ॥291॥

वस्त्रालंकारणं यानं वाहनं शयनं स्त्रियः ।
भाजनादिकवस्तूच्चैरूपभोगः प्रभाषितः ॥292॥

भोगोपभोगयोस्तत्र या संख्या क्रियते बुधैः।
शिक्षाव्रतं तृतीयं स्यात्तद्धिशर्मशतप्रदम् ॥293॥

अत्यादरः स्मृतिर्नित्यं लौल्यं सानुभवं तृषा ।
भोगोपभोगसंख्यायामतीचाराश्च पञ्च वै ॥294॥

संविभागो भवेत्त्यागस्त्यागो दानं च पूजनम् ।
तद्दानं भक्तितो देयं सुपात्राय यथाविधिः ॥295॥

तत्सुपात्रं त्रिधा प्रोक्तं समुत्कृष्टं च मध्यमम् ।
जघन्यं च समाख्यातं मुनींद्रैर्ज्ञानलोचनैः ॥296॥

महाव्रतानि यः पञ्च तिस्रोगुप्तीर्निरंतरम् ।
समितीः पञ्च संधत्ते स मुनिः पात्रमुत्तमम् ॥297॥

निर्ग्रंथोऽसौ महापात्रं यानपात्रमिवोत्तमः ।
मुनिः संसारवाराशौ सुधीः स्वपरतारकः ॥298॥

सम्यक्त्वेन समायुक्तो व्रतैर्द्वादशभिर्युतः ।
स श्रावको भवेत्पात्रं मध्यमं धर्मवत्सलः ॥299॥

केवलं सारसम्यक्त्वं यो बिभर्ति विचक्षणः ।
स जघन्यं सुधीः पात्रं सदृष्टिर्जिनभक्तिभाक् ॥300॥

इति त्रिविधपात्रेभ्यो दानं देयं चतुर्विधम् ।
नित्यं दयापरैर्भव्यैर्यथा योग्यं यथाविधिम् ॥301॥

विधिर्दातुर्गुणा दान भेदाः प्रोक्ता जिनागमे।
तान् संक्षेपेण संवक्ष्ये पूर्वाचार्यक्रमेण च ॥302॥

पुण्यात्स्वगृहमायाते सुपात्रे मुनिसत्तमे ।
श्रावकेण विधिः कार्यो नवधा शर्मकारणम् ॥303॥

प्रतिग्रहोच्चैः सुस्थानं पादक्षालनमर्चनम्।
नतिस्त्रियोगभोज्येषु शुद्धयो नवधा विधिः ॥304॥

श्रद्धा भक्तिरलोभत्वं दया शक्तिः क्षमा परा।
विज्ञानं सप्तधा चेति गुणा दातुः प्रकीर्तिताः ॥305॥

पात्रं मे गृहमायातु समायाते च सन्मुनौ।
सन्निधानं मया प्राप्तं प्रीतः शुद्धियुतो[1] भवेत् ॥306॥

आहारावधि[2] तत्पार्श्वे सेवां कुर्वन् प्रतिष्ठते।
महाधर्मानुरागेण श्रावको भक्तिमान् स च ॥307॥

राज्यादिकार्यमेतस्माद्भविष्यति मुनेर्मम।
इतीच्छा वर्जितो दाता स भवेल्लोभ वर्जितः ॥308॥

कार्यार्थं स्वगृहस्यांते कीटकादीन् विलोकयन्।
सम्प्रयात्येति यो दाता दयावान् स प्रकीर्त्यते ॥309॥

साधिके च व्यये जाते कातरो यो न जायते।
शक्तिमान् स भवेद्दाता गम्भीरः सागरादपि ॥310॥

स्त्रीपुत्रादिकृते दोषे दानकालेन कुप्यति।
स श्रावकः क्षमायुक्तो भण्यते स विदांवरैः ॥311॥

पात्रापात्रविशेषज्ञो गुणदोषविचारवान्।
देयादेयं विजानाति स दाता ज्ञानवान् सुधीः ॥312॥

---

1. श्रद्धायुतो इति ब प्रतौ

2.आहारविधि इति ब प्रतौ

तथा चोक्तं - दातृ विज्ञानं विवर्णं विरसं विद्धमसात्म्यं[1] प्रमृतं च यत्
मुनिभ्योन्नं न तदेयं यच्च भुक्तं गदावहम् ॥313॥

उच्छिष्टं नीचलोकार्हमन्योद्दिष्टं विगर्हितम् ।
न देयं दुर्जनस्पृष्टं देवयक्षादिकल्पितम् ॥314॥

ग्रामांतरात् समानीतं मंत्रानीतमुपायनम् ।
न देयमापणक्रीतं विरुद्धं वा यथार्तुकम् ॥315॥

आहारौषधशास्त्राख्यं निर्भयाख्यं चतुर्विधम् ।
श्रीमज्जिनागमे प्रोक्तं सतां दानं सुखप्रदम् ॥316॥

पवित्रैर्नवभिः पुण्यैर्दातृसप्तगुणैर्युतः ।
अन्नदानं ददात्युच्चैर्भक्तितः शक्तिपूर्वकम् ॥317॥

यः श्रावकः सुपात्राय स भवेत्पुण्यभाजनम् ।
भवे भवे सुखी नित्यं कुगतिं नैव पश्यति[2] ॥318॥

धनैर्धान्यैर्जनैर्युक्ता रोगशोकविवर्जिताः ।
रूपसौभाग्यसम्पन्नाः कीर्त्या व्याप्तत्रिविष्टपाः ॥319॥

महाकुलां महासत्वा महाराज्यादिसम्पदाः।
भव्या भवन्ति ते सर्वे सुपात्राहारदानतः ॥320॥

स्वर्गादिसुखसम्प्राप्ते रत्नदातुः किमुच्यते ।
यद्गृहं तीर्थनाथोऽपि समायाति स्वयं यतः॥321॥

तथा भव्यैः प्रदातव्यं दानमौषधसंज्ञकम् ।
जीवानां रोगतप्तानां जीवदानोपमं शुभम् ॥322॥

येन त्रिविधपात्रेभ्यो दत्तमौषधमुत्तमम् ।
भवे भवे भवेन्नित्यं स दाता रोगवर्जितः ॥323॥

1.विसंविद्ध इति अ प्रतौ
2.पस्यति इति अ प्रतौ

व्याधितश्चांगनाशः स्यादंगनाशे कुतस्तपः।
जिनेन्द्रतपसा शून्यः कथं प्राणी लभेच्छिवम् ॥324॥

तस्माद्भव्यैः प्रयत्नेन महाधर्मानुरागतः।
साधर्मिकादिकेभ्यो वै देयं दानं सदौषधम् ॥325॥

श्रीमज्जिनेन्द्रोक्तं शास्त्रं त्रैलोक्यपूजितम्।
सुश्रावकैः सुपात्राय तद्देयं शर्मकोटिदम् ॥326॥

ज्ञानदानेन पात्रस्य सद्दातापरजन्मनि।
जानाति सर्वशास्त्राणि कीर्त्या व्याप्तजगत्त्रयः ॥327॥

यत् ज्ञानं लोचनप्रायं वर्तते सर्वदेहिनाम्।
तद्दीयंते सुपात्राय किं सुपुण्यमतः परम् ॥328॥

ततः शास्त्रं जिनेन्द्रोक्तं स्वर्गमोक्षसुखप्रदम्।
लिखित्वा लेखयित्वा च शक्तितो भक्तिपूर्वकम् ॥329॥

शास्त्रदानं सुपात्राय देयं संज्ञानसिद्धये।
सुश्रावकैर्महाभव्यैः संसाराम्भोधितारकम् ॥330॥

तथा भव्यैः प्रदातव्यं दानं चाभयसंज्ञकम्।
जन्तुभ्यो भयभीरुभ्यो निर्भयोरुसुखप्रदम् ॥331॥

येन भव्येन जन्तुभ्योः दत्तं दानं सुनिर्भयम्।
कृतं ते नात्र जीवानां दशप्राणप्ररक्षणम्[1] ॥332॥

तेन दानेन तद्दाता निर्भयो भुवने[2] भवत्।
शूरोधीरोतिगम्भीरो विशुद्धः हृदयः सुधीः ॥333॥

1.दशप्राणरक्षणम् इति ब प्रतौ

2.भुवनेश्वरः इति स प्रतौ

दयार्थं दीयते सर्वं दानं सद्भोजनादिकम् ।
साक्षाद्दयाकृता तेन दत्तं येनाभयं शुभम् ॥334॥

इति ज्ञात्वा सुपात्राय देयं तद्दानमुत्तमम् ।
अन्यत्रापि यथा योग्यमभयं शर्मदं बुधैः ॥335॥

एवं त्रिविधपात्रेभ्यो दानं भक्त्या चतुर्विधम् ।
यैर्दत्तं भुवने भव्यैस्तैः सिक्तो धर्मपादपः॥336॥

उक्तञ्च च- य आचष्टे संख्यां गगनतलनक्षत्रविषयामिदं
वा जानीते कति चुलुकमानो जलनिधिः ।
अभिज्ञो जीवानां परिभवपरावर्तकथने
प्रमाणं पुण्यस्य प्रथयतु सुपात्रार्पितधने ॥337॥

पात्रं जिनाश्रयी चापि संपोष्यः श्रावकैः सदा ।
सर्वथा विपरीतो यः स संत्याज्यो विवेकिभिः ॥338॥

उक्तञ्च- मिथ्यादृग्भ्यो ददद्दानं दाता मिथ्यात्ववर्धकः ।
पन्नगास्ये पयोदत्तं केवलं विषवृद्धिकृत् ॥339॥

सुपात्रपात्रयोर्दानं भेदो लोके भवेन्महान् ।
शुद्धपात्रं यथा यानं पात्रं स्वपरतारकम् ॥340॥

कुपात्रं च भवेल्लोके कुधीः स्वपरवञ्चकः ।
यः पाषाणसमाज्ञेयो मिथ्यादृष्टिः कुतात्विकः ॥341॥

उक्तञ्च- उत्कृष्टपात्रमनगारमणुव्रताढ्यम् ।
मध्यं व्रतेन रहितं सदृशं जघन्यम् ।
निर्दर्शनं व्रतनिकाययुतं कुपात्रम् ।
युग्मोज्झितं नरमपात्रमिदं हि विद्धि ॥342॥

यथा स्वच्छजलं चापि वृक्षभेदेषु भूतले ।
नानाप्रकारमाप्नोति पात्रभेदात्तथाशनम् ॥343॥

पात्रदानं भवेद्दातुर्महाफलशतप्रदम् ।
मृष्टभूमौ यथा बीजं क्षिप्तं भूरिफलप्रदम् ॥344॥

उप्तं क्षारक्षितौ यद्वद्बीजं चापि वृथा भवेत् ।
तथा कुपात्रजं दानं दातुर्निष्फलतां व्रजेत् ॥345॥

इत्यादि पात्रभेदज्ञो यः सुपात्राय भक्तितः ।
नित्यं दानं ददात्युच्चैः स हि दाता विचक्षणः ॥346॥

एवं सुपात्रदानेन मनोवाञ्छितसम्पदाम् ।
धनंधान्यं सुवर्णञ्च मणिमाणिक्यमुत्तमम् ॥347॥

स्वर्गादिसुखमुत्कृष्टं कुलं परिजनादिकम् ।
सम्प्राप्य क्रमतो भव्याः लभन्ते शाश्वतं पदम् ॥348॥

इति मत्वा महाभव्यैः सुपात्रेभ्यः सुभक्तितः ।
दानं चतुर्विधं ज्ञेयं शर्मकोटिविधायकम् ॥349॥

सचित्तपत्रके क्षिप्तं तेनाच्छादनविस्मृती ।
दाने निरादारः पञ्च मत्सरत्वं व्यतिक्रमाः ॥350॥

ये भव्या जिनधर्मकर्मणि रताः सुश्रावकाः सज्जनाः ।
ते नित्यं निजभक्तिशक्तिसहिताः प्रीताः प्रमादोज्झिता।
पात्रेभ्यो वरभोजनादि विशदं दानं चतुर्लक्षणम् ।
दत्वा शर्मशतप्रदं शुभतरं दिव्यां भजन्तु श्रियम् ॥351॥

पूजा श्रीमज्जिनेन्द्राणां पादपद्मद्वये सदा ।
महाभव्यैः प्रकर्तव्या लोकद्वयसुखप्रदाः ॥352॥

तत्र पूर्वं जिनेन्द्राणां शक्तिश्चेद्भक्तिपूर्वकम् ।
प्रासादं कारयित्वोच्चैर्ध्वजाद्यैः परिशोभितम् ॥353॥

स्वर्णरत्नादिनिर्माणाः प्रतिमाः पापनाशनाः।
तत्प्रतिष्ठां विधायोच्चैर्गरिष्ठं विधिपूर्वकम् ॥354॥

तत्र संस्थापयंत्येव ये भव्याः शुद्धमानसाः।
पञ्चकल्याणकैर्भक्त्या ते लभन्ते परां श्रियम् ॥355॥

उक्तञ्च- बिम्बादलोन्नतियवोन्नतिमेव भक्त्या।
ये कारयन्ति जिनसद्मजिनाकृतिञ्च।
पुण्यं तदीयमिह वागपि नैव शक्ता।
स्तोतुं परस्य किमुकारयितुर्द्वयस्य ॥356॥

जिनेन्द्राणां केवलज्ञानं सम्पदांकितैः।
पूजादिभिः साध्यं किं नु भव्याः सुखार्थिनः ॥357॥[1]

सामान्यतोऽपि देवेन्द्रः चक्रिलक्ष्मीर्न दुर्लभाम्।
तेषामासन्नभव्यानां जिनभक्तिविधायिनाम् ॥358॥

यदुक्तञ्च- एकापि समर्थेयं जिनभक्तिर्दुर्गतिं निवारयितुं।
पुण्यानि च पूरयितुं दातुं मुक्तिश्रियं कृतिनः ॥359॥

पञ्चामृतैर्जिनेन्द्रार्चा ये नित्यं स्नापयन्ति च।
ते स्नाप्यन्ते महाभव्याः सुराधीशैः सुराचले ॥360॥

तथा जलादिभिर्द्रव्यैरष्टभेदैर्जिनाधिपान्।
सम्पूजयन्ति ये भव्यास्ते पूज्यन्ते सदामरैः ॥361॥

इन्द्रनागेन्द्रचन्द्रार्कैश्चक्रवर्त्यादिभिर्मुदा।
श्रीजिनेन्द्राः सदापूज्या जगत्त्रयहितंकराः ॥362॥

तेषां श्रीमज्जिनेन्द्राणां केवलज्ञानसम्पदाम्।
किं तैः पूजादिभिःसाध्यं किं नु भव्याः सुखार्थिनः॥363॥

1.स प्रतौ अनुपलब्धः

ये पूजयन्ति सद्भक्त्या धर्मतत्वविदांवराः ।
श्रीजिनेन्द्रपदाम्भोजद्वयं स्वर्मोक्षसौख्यदम् ॥364॥

ते भव्या भुवने पूज्या भूत्वा पश्चाद्यथाक्रमम् ।
केवलज्ञानसाम्राज्यं संलभन्ते जगद्धितम् ॥365॥

तथा भव्यैः समभ्यर्च्य श्रीजिनेन्द्रान् सुखप्रदान् ।
संस्तुतिर्भक्तितः कार्या सर्वपापप्रणाशिनी ॥366॥

ततो जाप्यं जगत्सारं कर्तव्यं परमेष्ठिनाम् ।
मनोवाक्कायसंशुद्ध्या दुर्गतिक्षयकारणम् ॥367॥

मन्त्रोऽयं त्रिजगत्पूतः सुपञ्चत्रिंशदक्षरः ।
संजप्यो भुवने भव्यैः सर्वदुःखक्षयंकरः ॥368॥

एतन्मन्त्रप्रसादेन तिर्यञ्चोऽपि दिवंगताः ।
का वार्ता परभव्यानां युक्तितस्तन्निसेविनाम् ॥369॥

उक्तञ्च

प्रापदैवं तव नुतिपदैर्जीवकेनोपदिष्टैः ।
पापाचारी मरणसमये सारमेयोऽपि सौख्यम् ।
कः सन्देहो यदुपलभते वासव श्रीप्रभुत्वम् ।
जल्पन् जाप्यैरमलमणिभिस्त्वन्नमस्कार चक्रम् ॥370॥

तथा गुरूपदेशेन जपः कार्यो जगद्धितः ।
षोडशाद्यक्षरैर्भव्यैर्यथागममुदाहृतः ॥371॥

यदुक्तं-

पणतीससोलछप्पण च दुदुगमेगं च तहयकाएह।
परमेट्ठिवाचयाणं अणं च गुरूवदेसेण ॥372॥

तथा चोक्तं –

पुष्पैः पर्वभिरम्बुजबीजस्वर्णार्क कान्तरत्नैर्वा।
निःकम्पिताक्षवलयः पर्यंकस्थो जपं कुर्यात् ॥373॥

यथा जिनस्तथासिद्धः शास्त्रं गुरूपदाम्बुजम् ।
चर्चनीयं सदाभव्यैर्लोकद्वयसुखप्रदम् ।।374।।

पूज्यपूजाक्रमेणोच्चैर्भव्यपूज्यतमो भवेत् ।
ततो भव्यः सुखार्थी च पूज्यपूजां न लंघयेत् ।।375।।

अनेकैर्भव्यसन्दोहैर्भरतादिभिरुत्तमैः ।
श्रीमज्जिनेन्द्रपूजायां फलं प्राप्तं महत्तरम्[1] ।।376।।

तद्वर्णने क्षमः कोत्र लोके श्रीमज्जिनं विना ।
किं तु पूजाफलस्योच्चैर्दृष्टांते दुर्दरोमतः ।।377।।

यदुक्तंश्रीसमन्तभद्रस्वामिभिः –

अर्हच्चरणसपर्या महानुभावं महात्मनामवदत् ।
भेकः प्रमोदमत्तः[2] कसुमेनैकेन राजगृहे वीरार्थम्[3] ।।378।।

एवं जिनागमे प्रोक्तं सप्तक्षेत्रेषु भक्तितः ।
सुश्रावकैर्धनं बीजं देयं शर्मशतप्रदम् ।।379।।

यदुक्तं-

जिणभवणं बिम्बपोथय संघसरूवाइं सत्तखेत्तेसु।
जं ववीयं धणबीयं तमहं अणुमोयए सुकयं ।।380।।

इत्युच्चैर्जिनपुंगवान् शुभरतान्[4] देवेन्द्रचन्द्रार्चितान् ।
ये भव्याः भव्यसिंधुतारणपरान् सम्पूजयन्ति त्रिधा ।
ते भव्यास्त्रिदशादि सौख्यमतुलम् सम्प्राप्य राजादिकम् ।
पश्चात्सिद्धिसुखं विनाशविमुखं सम्प्राप्नुवन्ति क्रमात् ।।381।।

गुणव्रतत्रयं चापि शिक्षाव्रतचतुष्टयम् ।
श्रावकाणां बुधाः प्राहुः शीलसप्तकमित्यलम् ।।382।।

---

1. महत्तराम इति अ प्रतौ

2.परमिदं ब प्रतौ नास्ति

3.वीरार्चम् इति अ प्रतौ

4.शुभतरान् इति अ प्रतौ

पञ्चाणुव्रतशीलसप्तकमिति प्रोक्तानि च द्वादश।
श्रद्धानां मुनिसत्तमैः शुभतराण्येवं व्रतानि ध्रुवम्।
ये भव्याः प्रतिपालयन्ति नितरां ते प्राप्य सत्सम्पदाम्।
देवन्द्रादिसमुद्भवां शिवपदं पश्चाल्लभन्ते क्रमात् ।।383।।

तथा चैकादशप्रोक्ताः प्रतिमाः पूर्वसूरिभिः।
श्रावकाणां जगत्सारः सम्पदा सुखदा सदा ।।384।।

श्राद्धो दार्शनिकः पूर्वो द्वितीयो व्रतिको मतः।
सामायिकस्तृतीयस्याच्चतुर्थः प्रोषधव्रती ।।385।।

सचित्तविरतिश्चान्यो रात्रिभुक्तिविवर्जितः।
सप्तमो ब्रह्मचारी च प्रारम्भरहितोष्टमः ।।386।।

परिग्रहग्रहैर्मुक्तः श्रावको नवमो मतः।
दशमोनुमतेर्दूरः परो नोद्दिष्टभुक्तिभाक् ।।387।।

तेषामेकादशस्थानां श्रावकाणां जिनोक्तिभिः।
संक्षेपांल्लक्षणं वक्ष्ये श्रृण्वंतु सुधियो जनाः ।।388।।

द्यूतं मांसं सुरा वेश्या पापर्द्धिः परदारता।
स्तेयेन सह सप्तेति व्यसनानि त्यजेद्बुधः ।।389।।

एतैः सप्तमहादोषैर्मुक्तोमूलगुणाष्टकः।
श्रीजिनेन्द्रपदाम्भोजः सेवनैकमधुव्रताः ।।390।।

सम्यग्दर्शनसंशुद्धो जैनधर्मे महारुचिः।
दर्शनप्रतिमाधारी श्रावकः स मतो बुधैः।।391।।

अणुव्रतानि पञ्चैव त्रिप्रकारं गुणव्रतम्।
शिक्षाव्रतानि चत्वारि यो धत्ते स द्वितीयकः ।।392।।

सामायिकं त्रिसंध्यं यः करोत्यत्र त्रिशुद्धितः ।
निश्चयेन विनीतात्मा तृतीयः श्रावकः स च ॥393॥

अष्टम्यां च चतुर्दश्यां प्रोषधं नियमेन यः ।
विदधाति सदा शुद्धः श्रावकः स चतुर्थकः ॥394॥

सचित्तफलतोयादि वस्तु योनात्ति सर्वथा ।
सचित्तविरतः सोऽत्र दयामूर्तिस्तु पञ्चमः ॥395॥

अन्नपानं तथा खाद्यं लेह्यं रात्रौ हि सर्वदा ।
नैव भुंक्ते पवित्रात्मा स षष्ठो दिनशीलभाक् ॥396॥

त्रिधा वैराग्यसम्पन्नो यः सदा ब्रह्मचर्यभाक् ।
मनोवाक्कायतो भव्यः स श्राद्धः सप्तमो मतः ॥397॥

सेवाकृष्यादिवाणिज्यप्रारम्भाद्रहितः सदा ।
सर्वप्राणिदयायुक्तः[1] स प्रोक्तः श्रावकोष्टमः॥398॥

बाह्याभ्यन्तरसङ्गेषु ममत्वपरिवर्जितः ।
महासंतोषसम्पन्नः संभवेन्नवमः सुधीः ॥399॥

यदुक्तं-

क्षेत्रं वास्तु धनं धान्यं द्विपदं च चतुष्पदम् ।
यानं शय्यासनं[2] कुप्यं भाण्डं चेति बहिर्दश ॥400॥

मिथ्यात्ववेदहास्यादि षट् कषायचतुष्टयम् ।
रागद्वेषौ च संगाः स्फुरंतरंगाश्चतुर्दश ॥401॥

बाह्यग्रंथविनिर्मुक्ता बहवः पापकर्मणा ।
अन्तः परिग्रहत्यागी स भव्यो दुर्लभो भुवि ॥402॥

सर्वसावद्यकार्येषु विवाहादिषु सर्वदा ।
विद्यतेऽनुमतिर्नैव यस्याऽसौ दशमः सुधीः ॥403॥

1.प्राणिदयासक्तः इति स प्रतौ

2.सय्यासनं इति अ प्रतौ

गृहं त्यक्त्वा वनं गत्वा मुनीनां चरणान्तिके।
ब्रह्मवेषधरो धीमान् स चैकादशको भवेत् ॥404॥

तस्य भेदद्वयं प्राहुरेक वस्त्रधरः सुधीः।
प्रथमोऽसौ द्वितीयस्तु यती कोपीन[1] मात्र भाक् ॥405॥

यः कोपीनधरो[2] रात्रि प्रतिमायोगमुत्तमम्।
करोति नियमेनोच्चैः स सदा धीरमानसः॥406॥

लोचं पिच्छं च संधत्ते भुंक्तेऽसौ चोपविश्य च।
पाणिपात्रेण पूतात्मा ब्रह्मचारी स चोत्तमः ॥407॥

कृतादिकं परित्यज्य श्रावकाणां गृहे सुधीः
उद्दंडभिक्षया भुंक्ते चैकवारं सयुक्तितः ॥408॥

त्रिकालयोगे नियमो वीरचर्या च सर्वथा।
सिद्धांताध्ययनं सूर्यप्रतिमा नास्ति तस्य वै ॥409॥

षडाद्यास्ते जघन्याः स्युर्मध्यमाश्च ततस्त्रयः।
उत्कृष्टो द्वौ परौ प्रोक्तौ श्रावकेषु जिनागमे ॥410॥

पापं जन्तोः सदा शत्रुर्द्धर्मो मित्रं जगत्त्रये।
यो भव्यश्चेति जानाति सोऽत्र ज्ञाता बुधैर्मतः[3]॥411॥

श्रीमज्जैनमतं पूतं पवित्रीकृतभूतलम्।
मत्वा सम्यक्त्वसंयुक्तो यो धर्मप्रतिपालकः ॥412॥

स भव्यो भुवनाम्भोजभास्करो जगदर्चितः।
सम्भूत्वा केवलज्ञानी क्रमान्मुक्तिश्रियं[3] भजेत् ॥413॥

1.कौपी इति स-द प्रतयोः

2.कौपी इति स-द प्रतयोः

3.ज्ञाताबुधैर्गतः इति स प्रतौ

4. क्रमान्मुक्तिश्रीयं इति अ प्रतौ

इत्येवं जिनदेवशास्त्रनिपुणैः प्रोक्ता मुनीन्द्रैः शुभैः ।
सम्यक्त्वादिगुणान्विता शुचितराश्चैकादशस्थानिकाः ।
ये भव्याः प्रतिमाः सुरेन्द्रमहिताः शक्त्या भजन्त्युच्चकैः।
ते दिव्याच्युतकल्पसौख्यनिलयाः पश्चाल्लभन्ते शिवम् ॥414॥

तथा श्रीमज्जिनेन्द्राणां तत्त्वसारविचक्षणैः ।
अन्ते सल्लेखनाकार्या धीरवीरैकमानसैः ॥415॥

तस्या विधिः समाख्यातः पूर्वाचार्यैर्जगद्धितैः ।
तं संक्षेपेण वक्ष्येऽहं यथागममनुत्तरम् ॥416॥

महोपसर्गके जाते दुर्भिक्षे दुष्टरोगके ।
जरादौ निःप्रतीकारे सतां सन्याससत्क्रियाम् ॥417॥

दानपूजातपशीलफलं प्राहुर्मुनीश्वराः ।
तदुच्चैर्यत्प्रकुर्वन्ति सन्तः सल्लेखनाविधिम् ॥418॥

तत्र सद्भिर्जिनेन्द्राणां महाधर्मानुवेदिभिः ।
त्यक्त्वा परिग्रहं सर्वं मनोवाक्काय शुद्धितः ॥419॥

रागद्वेषादिकं चापि परित्यज्य पुरा त्रिधा ।
महाक्षमामृतैर्वाक्यैः सर्वान् संतोष्य सज्जनान्[1] ॥420॥

गुरूणामग्रतो भक्त्या समालोच्य कृताघकम् ।
सुश्रावकैर्भवेच्छक्तिस्तदा ग्राह्यं महाव्रतम् ॥421॥

शोकं भयं मदं त्यक्ता जीविते मरणे तथा ।
चिंतां सर्वां परित्यज्य कार्या कर्मक्षये मतिः॥422॥

श्रीमज्जिनमते धीरैः महसंतोषशालिभिः ।
शनैःशनैः परित्यज्य चतुर्धाहारकं क्रमात् ॥423॥

1.सज्जनात् इति स प्रतौ

भव्यैः पञ्चनमस्कारः संस्मृत्यासक्तमानसैः।
अनन्यशरणीभूतैः कार्यं प्राणविसर्जनम् ॥424॥

अवश्यं मरणे प्राप्ते मर्तव्यं नात्र संशयः ।
कथं न क्रियते सद्भिः संयासः सर्वसौख्यदः॥425॥

इत्थं येऽत्र प्रकुर्वन्ति सन्यासं ते महाधियः ।
सौधर्मादिषु कल्पेषु प्राप्नुवन्ति महासुखम् ॥426॥

अणिमादिगुणोपेतं दिव्यरूपं च सम्पदाः ।
सुरांगनाः समासाद्य भुक्त्वा भोगान् पुनश्च ते ॥427॥

अणिमामहिमालघिमागरिमां तर्द्धानकानरूपित्वम् ।
प्राप्ति प्रागम्य वशित्वे शित्वा प्रतिहतत्वमिति वैक्रियकाः॥428॥[1]

भूतलेऽत्र समागत्य प्राप्य दिव्यकुलादिकम् ।
पश्चादुत्कृष्टतो रत्नत्रयाद्यान्ति शिवालयम् ॥429॥

यत्र सिद्धा निराबाधा विशुद्धाः कर्मवर्जिताः ।
अनन्तसुखसम्पन्नाः संतिष्ठतेऽष्टभिर्गुणैः॥430॥

अनन्तान्तकालेऽपि नैव तेषां च विक्रिया ।
एवं मत्वा[2] जिनेन्द्रोक्ते धर्मे कार्या मतिः सदा ॥431॥

जीविते मरणे वाञ्छा भयं मित्रस्पृहा तथा ।
निदानं चेति पञ्चैते सन्यासे च व्यतिक्रमाः ॥432॥

इति श्रीनेमिनाथोक्तं धर्मं श्रुत्वा तदा सभा ।
भास्करस्योदये शीघ्रं पद्मिनीव मुदं ययौ ॥433॥

1.अ प्रतौ एव वर्तते

2. एवमत्व इति पाठं अ प्रतौ

(शार्दूलविक्रीडित)

इत्थं सर्वसुरासुरार्चितपदः श्रीनेमिनाथो जिनो ।
धर्मं शर्मकरं जगत्त्रयहितं स्वर्गापवर्गप्रदम् ।।
सद्रत्नत्रयलक्षणं शुभतरं सम्प्राह भव्यास्तदा ।
संश्रुत्वा भवसिन्धुतारणपरं नत्वा श्रीजिनं तं श्रिताः ।।434।।

इति त्रिभुवनैकचूडामणिश्रीनेमिजिनपुराणे भट्टारकश्रीमल्लिभूषणशिष्याचार्य श्रीसिंहनन्दिनामांकिते ब्रह्मनेमिदत्तविरचिते धर्मोपदेशव्यावर्णनोनामैकादशोऽधिकारः ।।11।।

द्वादशोऽधिकारः

अथ श्रीनेमिनाथोऽसौ केवलज्ञानभास्करः ।
गणैर्द्वादशभिः सेव्यो भुवनत्रयसम्मतः ॥1॥

सर्वविद्यापतिः स्वामी लोकालोकप्रकाशकः[1] ।
सर्वतत्त्वार्थसन्दोहमूलकर्त्ता जगद्गुरुः ॥2॥

भुक्त्यादिदोषनिर्मुक्तः सन्त्यक्तश्चोपसर्गकैः ।
चतुर्वक्त्रोऽपि सर्वत्र सत्यमार्गोपदेशकः ॥3॥

स्वभावमहिमोत्पन्नं व्योमगामित्वमाचरन् ।
द्विषड्भेदगणश्चापि प्राणिबाधाविवर्जिताः ॥4॥

गव्यूतीनां चतुर्दिक्षु नित्यं शतचतुष्टये ।
महासुभिक्षतासारप्रसन्नीकृतभूतलः ॥5॥

दिव्यकायप्रभावोत्थमछायत्वं सदा भजन् ।
समत्वं नखकेशानां नेत्रास्पदं समुद्वहन् ॥6॥

घातिकर्मक्षयोत्पन्नैरेतैः स्वामिविराजितः ।
गुणैः प्रव्यक्तमहात्म्यैर्दशातिशयसंज्ञकैः ॥7॥

प्रणम्य प्रार्थितो भक्त्या देवेन्द्रेण जगद्गुरुः ।
विहारार्थं च भव्यानां वाञ्छता परमोदयम् ॥8॥

धर्मोपदेशपीयूषैः स्वामिन् सर्वजनप्रियैः ।
भव्योत्पलसमूहोऽयं तर्पणीयस्त्वया विभो ॥9॥

इत्येवं प्रार्थितः स्वामी कृतकृत्योऽपि तीर्थंकृत् ।
भव्यपुण्योदयेनोच्चैर्विहारं कृतवांस्तदा ॥10॥

कर्तुमिच्छां विना चापि स स्वामी शक्रपूजितः ।
चक्रे विहारमत्युच्चैः स्वभावः कोऽपि तादृशाम् ॥11॥

---

1. लोकप्रकाशकः इति द प्रतौ

तदा सर्वेऽपि देवेन्द्रा जिनेन्द्रगमनोत्सवे।
क्षोभं प्रापुः समुद्भवाः सुरकोटिप्रवीचयः[1] ॥12॥

नभोभागं समापूर्य तदा ते सुरसत्तमाः।
जयकोलाहलं चक्रुः परमानन्दनिर्भराः ॥13॥

विस्तीर्णं च तदाकाशं देवयाने विमानके[2]।
निश्छिद्रं सम्बभौ सर्वं सज्जनानां कुलं यथा ॥14॥

देवदेवांगनास्तत्र नभोभागे प्रमोदतः।
जय जीवेति नन्देति पुष्पवृष्टिं प्रचक्रिरे ॥15॥

तदा शक्राज्ञया व्योम्नि निराधारेऽपि तत्प्रभोः।
प्रभावाद्गच्छतः पादमूले भक्त्या जगद्गुरोः ॥16॥

हेमांबुजं सुखस्पर्शि[3] सुगंधीकृतदिङ्मुखम्।
प्रत्येकं प्रस्फरद्रत्नकर्णिकं सन्दधुः सुराः ॥17॥

सहस्रदलसंयुक्ते पद्मरागप्रकेसरे।
सद्रत्नकर्णिके तस्मिन् दिव्यहेमाम्बुजोपरि ॥18॥

व्रजन्नेमिजिनः स्वामी सम्बभौ भुवनार्चितः।
यथाकाशे शरच्चन्द्रः कोऽपि वा जनवल्लभः ॥19॥

तदा तत्काञ्चनं पद्मं प्रभोः पादाम्बुजाश्रितम्[4]।
मकरन्दं[5] किरत्प्रोच्चैर्ददानमिवा[6] रुचत् ॥20॥

एवं पद्मानि सप्तानि[7] पृष्टतः सप्तचाग्रतः।
प्रभोः संशोभितान्युच्चैः कनत्काञ्चनकानि वै ॥21॥

1.प्रवीचकः इति स प्रतौ
2.विमानकैः इति ब प्रतौ
3.सुखस्पर्श इति अ प्रतौ
4.बुजाश्रयतम् इति स प्रतौ
5.मकरं इति अ प्रतौ
6.ज्ञानमिवा इति अ प्रतौ
7.सप्तापि इति ब-स-द प्रतीषु

तत् पार्श्वेषु तथान्यानि हेमपद्मानि रेजिरे।
प्रभोर्विहारकाले च निधानानीव खांगणे ॥22॥

इत्युच्चैः कमलैर्दिव्यैः नभोभागस्तदा बभौ।
पद्माकरो यथा देवः कान्ति तोयेन सम्भृतः ॥23॥

एवं तदा जगत्स्वामी विहारसमयेऽरुचत्।
दुन्दुभीनां समूहोत्थनादगर्जितदिक् तटः ॥24॥

समन्तात्पवनोद्धूतैः ध्वजव्रातैर्विराजितः।
आह्वयद्भिरिवप्रीत्या भव्यौधान् धर्महेतवे ॥25॥

तदा भानु परिस्पर्द्धि सहस्रारै र्विराजितम्।
प्रभोरग्रे जगत्सारं धर्मचक्रं चलद्बभौ ॥26॥

धर्मचक्रं प्रभोरग्रे प्रस्फुरं दिव्यतेजसा।
विश्वं धर्ममयं कर्त्तुं समुद्यतमिवाऽरुचत् ॥27॥

सर्वार्द्धमागधीयोरुभाषयां[1] प्रविराजितः।
स स्वामी त्रिजगत्जन्तुकृत मैत्रीपरिग्रहः ॥28॥

भव्यपद्माकराणां च विकाशं जनयन् भृशम्।
नभोभागे बभौ देवो व्रजन् वा कोऽपि भास्करः ॥29॥

तदैतैति सर्वत्र नभोभागे सुरासुराः।
परस्परं कृतानन्दां घोषयन्ति स्म भक्तितः ॥30॥

केचिद्गायन्ति नृत्यन्ति च भान्ति स्म परस्परम्।
नाकिनः परमानन्दात् प्रभोऽग्रे तदा भृशम् ॥31॥

महिम्ना च प्रभोरुच्चैर्बभौ व्योमतलं तदा।
अत्यन्तनिर्मलं सर्वं सतां वा मानसं शुभम् ॥32॥

1.भाषायां इति अ प्रतौ

दिशाः सर्वास्तु सञ्जाताः रजो मुक्ताविशेषतः ।
सुप्रसन्नाः सतां चित्तं वृत्तयो वा सुखप्रदाः ॥33॥

तदा देवाः प्रभूत्साहं सम्पेठुः परमादरात् ।
किं नराश्च जगुः स्वामि यशः कुन्देदुनिर्मलम् ॥34॥

खेचराश्चापि सत्कीर्तिर्विभोः पापप्रणाशिनीम् ।
पठन्ति स्म नभो रंगे सा स्त्री का भक्तिनिर्भरा ॥35॥

जाता मही तदादर्शसन्निभा रत्ननिर्मिता ।
सुपवित्रा मतिर्वोच्चैर्भव्यानां कण्टकोज्जिता ॥36॥

मरुत्कुमारदेवाश्च योजनप्रमितां महीम् ।
धूलिकण्टकपाषाणनिर्मुक्तां चक्रिरेऽग्रतः ॥37॥

तथा मेघकुमारास्ते दिव्यगन्धोदकोत्करैः ।
सुगन्धीकृतविश्वासं सञ्चक्रुर्वृष्टिमुत्तमां ॥38॥

गोधूमशालिमुग्दादिसर्वनिष्पन्नधान्यकैः ।
जिनेन्द्रागमने रेजे कुलस्त्री वा मही तदा ॥39॥

सर्वर्त्तुफलपुष्पोघैः सर्वत्र तरवस्तदा ।
प्रोत्तुंगा नम्रतां भेजुः सज्जना वा जगद्धिताः[1] ॥40॥

इत्यादिसर्वस्योघैः फलैः पुष्पप्रवालकैः ।
बभौ तदा सदा भूमिर्भव्यानां शर्मदायिनी[2] ॥41॥

विहारं कुर्वन्तो जातः प्रभोर्वायुश्च पृष्ठतः ।
महिम्ना वा विभोर्भक्तिः सोऽपि कर्तुं समुद्यतः ॥42॥

तदा सर्वत्र भव्यानां अकस्मात्परमोदयः ।
बभूव परमानन्दो निधाने वा गृहागते ॥43॥

1.श्लोकोऽयं स प्रतौ अपूर्णः अस्ति
2.श्लोकोऽयं स प्रतौ अपूर्णः

भृंगारतालकुम्भादिमंगलद्रव्यसपंदः ।
देवांगनां प्रभोरग्रे संवहन्ति स्म भक्तितः ॥44॥

एते चतुर्दशव्यक्तं स्वामिनोऽतिशयाः शुभाः ।
त्रिदशैरुपकल्पन्ते परमानन्दनिर्भरैः ॥45॥

प्रभोरग्रे तदा व्योम्नि दिव्यदेवांगनाः गणाः ॥
रूपसौभाग्यसम्पन्ना नटन्ति[1] स्म प्रमोदतः ॥46॥

चारणैर्मुनिभिर्देवविद्याधरशतैस्तदा ।
सेव्यमानो नभोमार्गे स स्वामी भक्तितो मुदा॥ 47॥

भूमिमार्गानुगैर्भव्यैश्चतुःसंघैरलंकृतः ।
पशुभिश्च समाराध्यो देवदेवो जगद्गुरुः ॥48॥

एवं व्योममहीं व्याप्य गणो द्वादशभिर्युतः ।
चतुस्त्रिंशन्महाश्चर्यैः प्रातिहार्यैर्विभूषितः ॥49॥

श्रीमन्नेमिजिनः स्वामी जगत्त्रयपितामहः।
पूतात्मा भव्यपुण्येन पवित्रीकृतभूतलः ॥50॥

यादवेन्द्रकुलाम्भोजभास्करो भुवनोत्तमः ।
भव्यचूडामणिः स्वामी सुरासुरनरार्चितः ॥51॥[2]

सारसौराष्ट्रदेशादीन् गूर्जरावन्तिचोलकान् ।
कीरकुंकणकाश्मीरानंगबंगकलिंगकान् ॥52॥

कर्णाटलाटभोटादिसर्वानार्यमहीस्थितान् ।
विहारं कृतवानुच्चैः सर्वभव्यैकबान्धवः ॥53॥

सर्वसन्देहसन्दोहहारिणा शर्मकारिणा ।
स्वदिव्यध्वनिना देवो हत्वा मिथ्यातमश्चयम् ॥54।

1.नंदंति इति ब प्रतौ
2.अ प्रतौ संख्यागणनायां त्रुटिः

भव्यान् सम्बोधयामाससमार्गरत्नत्रयात्मकम् ।
तेऽपि भव्याः समादाय स्वर्गमोक्षश्रियं श्रिताः ॥55॥

श्रीमांस्तीर्थंकरो देवो यत्र शास्ता जगद्गुरुः ।
को वा तत्वं न जानाति चेद्भव्यो वर्तते भुवि ॥56॥

एवं श्रीनेमिनाथोऽसौ सर्वशक्रादिपूजितः ।
आर्यभूमिविहत्युच्चैः सर्वसन्तापनाशकः ॥57॥

पुरीं द्वारवतीं प्राप्य पवित्रीकृतभूतलः ।
स्थित: रैवतकोद्याने[1] गणो द्वादशभिर्युतः ॥58॥

शक्राज्ञया तदा शीघ्रं कुबेरो जिनभक्तिभाक् ।
तत्रापि पूर्ववद्दिव्यां समवादिसृतिं व्यघात् ॥59॥

मानस्तम्भादिसंपन्नां तां सभां भुवनाश्रिताम् ।
अलञ्चकार स स्वामी भानुमानिव पद्मिनी ॥60॥

तन्निशम्य त्रिखण्डेश कृष्णनामान्त्यमोहरिः ।
पद्माख्यो बलदेवश्च सम्यग्दृष्टिशिरोमणिः ॥61॥

षडंगसैन्यसंयुक्तौ[2] तौ तदा प्रीतबान्धवौ ।
स सम्भ्रमं समागत्य परिवारपरिष्कृतौ ॥62॥

तां सभां दूरतो वीक्ष्य सत्पताकाशतोन्नताम् ।
आह्वयन्तीमिव प्रोच्चैर्भव्यौघान् प्रीतिमापतुः ॥63॥

ततः प्रदक्षिणी कृत्य जयकोलाहलस्वनैः ।
तां प्रविश्य सभां पूतां पवित्रीकृतभूतलाम् ॥64॥

वीक्ष्यमाणौ च तच्छोभां भव्यचेतोनुरञ्जिनीम् ।
सन्तोषं कमपि प्राप्तौ सम्प्राप्ते वा निधौ शुभे ॥65॥

1.स्थितोरैरैवतकोद्याने इति स प्रतौ
2.खडंगसैन्यसंयुक्तौ इति ब प्रतौ

मानस्तम्भेषु चैत्योरुपादपेषु जिनेशिनाम् ।
सिद्धार्थपादपेषु प्रतिमाः स्तूपगिरिष्ठा अपि ॥66॥

पूजयित्वा जगत्सारैः पूजाद्रव्यैर्मनोहरैः ।
ततः श्रीमण्डपे तुंगे शुद्धस्फटिकनिर्मिते ॥67॥

त्रिमेखले महापीठे स्वर्णरत्नैर्विराजिते ।
दिव्यसिंहासने चापि स्वमहिम्ना जगद्गुरुम् ॥68॥

चतुर्भिरंगुलैर्व्योम्नि सुस्थितं श्रीजिनेश्वरम् ।
अनन्तज्ञानदृग्वीर्यसत्सुखं[1] नेमिनायकम् ॥69॥

इन्द्रनागेन्द्रचन्द्रार्का: खेचराद्यैः समर्चितम् ।
महामुक्ताफलोपेतछत्रत्रयविभूषितम् ॥70॥

हतशोकमहाशोकपादपेन विराजितम् ।
पतन्निर्झरसंकाशेश्चामरैर्वीजितं सुरैः ॥71॥

दुन्दुभीनां समूहेन गर्जिताखिलभूतलम् ।
कोटिप्रभा तु प्रभास्पर्द्धिजाततेजप्रमण्डलम् ॥72॥

देवदेवांगनामुक्तचारुमन्दारसुन्दरैः ।
जातीचम्पकपद्माद्यैः पुष्पवृष्ट्यर्चितक्रमम् ॥73॥

दिव्यध्वनिसमुत्पन्नवचनामृतवर्षणैः ।
द्वादशोरुसभाभव्या मनोनेत्रप्रतर्पणम् ॥74॥

देवदेवं जगद्वन्द्यं संसाराम्भोधिपारदम् ।
तं समालोक्य सन्तुष्टस्त्वं[2] जयेति प्रणेमतुः ॥75॥

विशिष्टाष्टमहाद्रव्यैस्तोयगन्धाक्षतादिभिः ।
जातीचम्पकपद्माद्यैः पादपद्मद्वयं प्रभोः ॥76॥

1.सत्सुषं इति अ प्रतौ
2. संतुष्टौ त्वं इति अ-ब प्रतयोः

पूजयामासतुः प्रीत्या चारुभी रत्नदीपकैः ।
कृष्णागुरुमहाधूपैः फलैर्नानाविधैर्मुदाम् ॥77॥

स्वामिपादद्वयस्याग्रे दत्वा चार्थं सुखप्रदम् ।
चक्रतुः स्तवनं चेति परमानन्दनिर्भरौ ॥78॥

त्वं देवभुवनाम्भोजभास्करं परमोदयः ।
मिथ्यामततमोस्तोमं नाशको विश्वभासकः ॥79॥

त्वं त्रिकालस्वरूपज्ञस्त्वं सदासर्वपूजितः ।
त्वं भव्यानां सदाधारो निर्मदो योगिवन्दितः ॥80॥

त्वं प्रभो! पावनो नित्यं परमानन्दकारणम् ।
दुर्गतेर्वारको देवो देवदेवैः समर्चितः ॥81॥

त्वं पतिः सर्वजन्तूनां त्वं गुरुः स्वगुणैर्गुरुः ।
पिता पितामहः स्वामिंस्त्वं शरण्योऽत्र देहिनाम् ॥82॥

अनन्तास्ते गुणा देव विशुद्धाः पारवर्जिताः ।
गम्भीराः सागराच्चापि प्रोत्तुंगाश्च सुराचलात् ॥83॥

पादमूले प्रभो तेऽद्य सर्वलोकैकशर्मदे ।
योऽहि तत्वं न जानाति निर्भाग्यो भुवने स च ॥84॥

भो स्वामिन्! भवतां पादपद्मयोश्चिन्तनेन वै।
यत्सुखं प्राप्यते भव्यैस्तत् स्वप्नेन्यैश्चदुर्लभम् ॥85॥

ततोऽस्माकं जगन्नाथ श्रीमत्पादाम्बुजद्वये ।
आसंसारमहाभक्तिर्भूयात्सर्वार्थसाधनी ॥86॥

इत्यादिभिर्महास्तोत्रैः स्तुत्वा तं भुवनेश्वरम् ।
मुहुर्मुहुः प्रणम्योच्चै मन्यमानो कृतार्थताम् ॥87॥

वरदत्तादिगणीन्द्रानन्येषां च तपस्विनाम् ।
पादाम्भोजद्वयं नत्वा महाभक्तिपरायणैः ॥88॥

नरकोष्टे स्थितौ चारुचेतसौ नतमस्तकौ ।
जिनेन्द्रचरणां भोजे दत्तदृष्टिः नरेश्वरः ॥89॥

तदा श्रुत्वा जिनेन्द्रोक्तं धर्मस्वर्गापवर्गदम् ।
दानपूजाव्रतोपेतं शीलपर्वोपवासकम् ॥90॥

ततो नत्वा जिनाधीशं सुराधीशार्चितक्रमम् ।
त्रिखण्डेशो हरिः प्राह विनयेन कृताञ्जलिः ॥91॥

स्वामिन् श्रीमत्प्रसादेन तत्वं ज्ञातुं[1] म मस्पृहा ।
वर्तते तद्भवेत्कीदृक् प्रभो! त्वं वक्तुमर्हसि ॥92॥

तत्प्रश्नतः प्रभु: प्राह श्रीमन्नेमिजिनेश्वरः ।
तत्तत्वं विस्तरेणौच्चैर्भव्यलोकैकबान्धवः ॥93॥

तदा तस्य प्रभोस्तीर्थकृत् सुपुण्यप्रभावतः[2] ।
वक्तुमिच्छां विना चापि मुखाब्जान्निर्गते ध्वनिः ॥94॥

ताल्वोष्टकरणग्रामपरिक्षेपविवर्जितः ।
प्रस्पष्टाक्षरसन्दोहसर्वसन्देहनाशकः ॥95॥

नानाभाषामतप्राणिवृन्दसंप्रीणनक्षमः ।
युक्तं नैव विकारोऽस्ति दर्पणे रूपवीक्षणे ॥96॥

श्रुणु त्वं भो महाभव्य! भूपते ते गदाम्यहं ।
तत्वं तत्वस्वरूपं च तत्फलं च यथाक्रमम् ॥97॥

जीवादिकालपर्यंताः षड्भेदास्तस्य चागमे ।
तान् प्रवक्ष्ये यथा तेषां स्वभावो लक्ष्यते त्वया ॥98॥

जीवाजीवपदार्थानां याथात्म्यं तत्वमुच्यते ।
तन्निश्चयो भवेदत्र भव्यानां मुक्तिकारणम् ॥99॥

1.ज्ञात्वं इति ब प्रतौ
2.सुप्रभावतः इति ब प्रतौ

सामान्यतो भवेदेकं प्रकारं तत्वनामतः ।
जीवाजीवाप्रभेदेन द्विधा तत्वं प्रकीर्तितम् ॥100॥

मुक्तामुक्तावजीवस्तु तत् त्रिधा च प्रवतर्ते ।
जीवो मुक्ताश्च संसारी कथ्यते परमागमे ॥101॥

संसारी च द्विधा जीवो भव्याभव्यप्रभेदतः ।
एवं चतुर्विधं विद्धि त्वं तत्वं दृष्टिकारकम्[1] ॥102॥

पञ्चास्ति कायाभेदेन पञ्चधा तत्प्रकीर्तितम् ।
ते जीवपुद्गलाकाशधर्माधर्मा इति ध्रुवम् ॥103॥

तेऽपि कालेन संयुक्तास्तत्वभेदाः षडेव च ।
तथानन्तप्रकाराशश्च विस्तरेण जिनागमे ॥104॥

चेतनालक्षणो जीवः शाश्वतः सोऽत्रवस्तुतः ।
मनुष्यादिकपर्यायैः कथ्यते सोऽप्यशाश्वतः ॥105॥

ज्ञाता दृष्टा च कर्त्ताऽसौ संसारी पुण्यपापयोः ।
भोक्ता च वर्तते जीवः शरीरपरिमाणभाक् ॥106॥

गुणवानूर्द्धगतिः सोऽपि ज्ञेयो बुधसत्तमैः ।
संसारे पर्यटन्नित्यं संसारसूरिभिर्मतः[2] ॥107॥

स्वप्रदेशोपसंहारविसर्पाभ्यां प्रदीपवत् ।
गत्यादिमार्गणोपाये मृग्यते सोऽपि धीधनैः ॥108॥

उक्तं च

गतीन्द्रिये च कायश्च योगवेदकषायकाः ।
ज्ञानसंयमदृग्लेश्याः भव्यसम्यक्त्वसंज्ञिनः ॥109॥

आहारकेण युक्तानि मार्गणास्थानकानि वै ।
एतैश्च चतुर्दशोपायैर्गुणस्थानैश्च लक्ष्यते ॥110॥

1.दृष्टिकारणम् इति ब प्रतौ
2.संसारमुनिभिर्मतः इति स प्रति

तस्यौपशमिको भावः क्षायिको मिश्रकोऽपि च ।
स्वतत्वमुदयोत्थश्च पारिणामिक इत्यपि ॥111॥

एतैर्गुणैस्तु विज्ञेयो जीवोऽयं निश्चयाद् बुधैः ।
द्विधा तस्योपयोगः स्यात् ज्ञानदर्शनभेदभाक् ॥112॥

अष्टधा ज्ञानमाम्नातं चतुर्धा दर्शनं मतम् ।
साकारं ज्ञानमित्याहुर्भेदग्रहणतो बुधाः ॥113॥

सामान्यमात्रनिर्भासादनाकारं च दर्शनम् ।
इत्यादिभिर्गुणै र्युक्तो ज्ञेयो जीवो विचक्षणैः ॥114॥

यतः पूर्वमजीवीच्च जीवत्यत्र जन्मसु ।
जीविष्यतीति तत्वज्ञैः जीवोऽयं प्रतिपादितः ॥115॥

अस्य सन्ति दश प्राणास्ततः प्राणी प्रकीर्तितः ।
नानाजन्माश्रितत्वाच्च जन्तुश्चापि प्रचक्ष्यते ॥116॥

क्षेत्रमस्य स्वरूपं स्यात् क्षेत्रज्ञस्तद्विमर्शणात् ।
शयनादुरुभोगेषु पुरुषः प्रतिपादितः ॥117॥

आत्मनात्मानमत्युच्चैः पुनात्यत्र ततो बुधैः।
अयं पुमानिति प्रोक्तः परमागमवेदिभिः ॥118॥

नित्यं सर्वभवेषूच्चैरित्यात्मापि प्रकथ्यते ।
अष्टकर्मान्तरस्थाच्च सोन्तरात्मा प्रजल्पितः ॥119॥

ज्ञश्चज्ञानगुणोपेताज्जीवो ज्ञानीति भाषितम् ॥
इति पर्यायनामोघैर्ज्ञेयोऽसौ जैनतत्विकैः ॥120॥

शाश्वतोऽयं भवेज्जीवस्तत्पर्याया विनश्वराः ।
स चोत्पादव्ययध्रौव्यगुणत्रयविराजितः ॥121॥

इत्यादिगुणसम्पन्नं ये चात्मानं विन्दन्त्यलम् ।
ते सम्यग्दृष्टयो भव्याः परे मिथ्यादृशो मताः ॥122॥

नास्त्यात्मानमिव मोक्षोऽस्ति नैवं कर्ता न कर्मभुक्।
मिथ्यादृशामिति प्रोक्तं तत्परित्यज्य पापकृत् ।।123।।

यथोक्तलक्षणोपेतं तमात्मानं विनिश्चिवन् ।
पुनः सोऽपि भवेज्जीवः संसारी मोक्षभागपि ।।124।।

चतुर्विधेऽत्र संसारे श्वभ्रतिर्यग्नरामरे ।
सरन् कर्मवशो जीवः संसारीति प्रजल्पितः ।।125।।

सम्यग्दर्शनसंज्ञानचारित्रैर्भुवनोत्तमैः ।
सर्वकर्मविनिर्मुक्तो मुक्तोऽनन्त[1] सुखान्वितः ।।126।।

आप्तागमपदार्थानां श्रद्धानं यच्चनिर्मलम् ।
सम्यग्दर्शनमाम्नातं पूर्वतन्मोक्षसाधनम् ।।127।।

ज्ञानं जीवादिभावानां सुस्वभावप्रकाशकम् ।
अज्ञानतिमिरख्याप्तिनाशनं धर्मदेशनम् ।।128।।

त्रयोदशप्रकारं हि मुनेर्हिंसादिवर्जनम् ।
चारित्रं सर्वमाध्यस्थं लक्षणं च भवेच्छुभम् ।।129।।

तत्रायं यच्च सम्पूर्णं दर्शनज्ञानवृत्तकम् ।
साक्षात् तदेव सम्प्रोक्तं सन्मुनेर्मोक्षकारणम् ।।130।।

विद्यमाने जगत्सारे सम्यक्त्वे सफलं भवेत् ।
ज्ञानवृत्तं च भव्यानां स्वर्गमोक्षसुखप्रदम् ।।131।।

ज्ञानं च दृष्टिचारित्रं संयुक्तं मुक्तिसाधनम् ।
ज्ञेयं श्रीजिनसेनादिसूरिभिः प्रतिभासितम् ।।132।।

चारित्रं दर्शनज्ञानविहीनं न शिवप्रदम् ।
अन्धकस्योद्यमो यद्वन्नैव सारफलप्रदः ।।133।।

1.अनंतानंत इति ब प्रतौ

उक्तं च सम्यक्त्वाद् दुर्गतेर्नाशः कीर्तिर्ज्ञानाद् निन्दितात् ।
चारित्रात् पूजिता लोके त्रिभिरेव विमुक्तता ॥134॥
एकैकं सर्वथा चोच्चैरंगीकृत्यात्र दुर्दशः ।
षट्प्रकाराश्च सञ्जाताः संसारे ते स्वकर्मणा ॥135॥

श्रीसर्वज्ञेन यत् प्रोक्तं पवित्रं धर्मलक्षणम् ।
तत्सत्यं मोक्षदं नान्यच्चेति दर्शनशुद्धिता ॥136॥

आप्ताश्चाष्टादश प्रोक्तंदोषैर्मुक्तः क्षुधादिभिः ।
केवलज्ञानसम्पन्नस्तदाभासाः परे भुवि ॥137॥

श्रीमज्जिनेन्द्रचंद्रस्य तस्य द्वयवचनं[1] शुभम् ।
स एवागमसारस्तु परं चान्यद्वचो मलम् ॥138॥

पदार्थस्तु द्विधा ज्ञेयो जीवाजीवप्रभेदभाक् ।
श्रीमत्सर्वज्ञदेवोक्ततत्वज्ञैः सम्प्रकीर्तितः ॥139॥

पूर्वोक्तलक्षणोपेतो भवेज्जीवो जिनागमे ।
भव्याभव्यप्रमुक्तत्वात्सोऽपि त्रेधा पुनर्मतः ॥140॥

भविष्यत् सिद्धिको भव्यः स्वर्णपाषाणसन्निभः[2] ।
अभव्यस्त्द्विपक्षः स्यादन्धपाषाणवत् सदा ॥141॥

दुष्टकर्माष्टनिर्मुक्तो मुक्तः सिद्धो गुणाष्टकः ।
त्रैलोक्यशिखरारूढो व्यक्तानन्तसुखाकरः ॥142॥

निरञ्जनो निराकारः साकारोऽपि निराकृतिः ।
यस्य स्मरणमात्रेण भव्याः संयान्ति तत्पदम् ॥143॥

इत्यादिजीवसद्भावं त्वं विजानीहि निश्चयात् ।
अतस्ते हं हरे वक्ष्ये श्रृण्वजीवस्य लक्षणम् ॥144॥

अजीवो नाम तत् तत्त्वं पञ्चधा परिकीर्तितम् ।
धर्माधर्मनभःकालपुद्गलाख्यमिति ध्रुवम् ॥145॥

1.द्वयवनं इति अ प्रतौ
2.संन्निभः इति ब प्रतौ

जीवपुद्गलयोर्गत्युपग्रहस्यैव कारकः।
धर्मास्तिकायकः प्रोक्तो न स्वयं प्रेरकः स च ॥146॥

मत्स्यस्य गमने यद्वज्जलं स्यात् कारणं महत्।
न तं तत् प्रेरयत्येव तथा धर्मस्तयोर्द्वयोः ॥147॥

अधर्मोऽपि भवेज्जीवपुद्गलस्थितिकारकः।
गच्छतोर्न तयोश्चापि बलात्कारेण रक्षकः ॥148॥

तिष्ठतः पथिकस्योच्चैः सुछाया स्थितिकारणम्।
भवेत्सापि स्वयं नो तं स्थापयेत् स तथा तयोः ॥149॥

जीवाजीवादिपञ्चानामवकाशप्रदं मतम्।
आकाशं तदमूर्तस्स्याद् स्पर्शव्यापिनिःक्रियम् ॥150॥

वर्तनालक्षणः कालो वस्तुनो वर्तते ध्रुवम्।
यथायोग्यं च पर्यायैर्भाषितो जिनपुंगवैः ॥151॥

यथा कुलालचक्रस्य भ्रमणोऽधः शिलास्वयम्।
धत्ते निमित्ततां लोके तथा कालोपि तद्गुणः ॥152॥

व्यवहारकालतो वै मुख्यकालोऽपि लक्ष्यते।
यथाटव्यां करीन्द्रोऽपि ज्ञेयस्तद्बलो वीक्षणात् ॥153॥

स कालो लोकमात्रैः स्वैरणुभिः सम्प्रवर्तते।
परस्परं संकीर्णैः रत्नानां राशिवद् ध्रुवम् ॥154॥

तस्याणवः पृथग्भूताः वर्तन्ते सर्वदायतः।
अकालोऽयं ततः प्रोक्तः कालो वै केवलेक्षणैः ॥155॥

प्रदेशप्रचयत्वाच्च पञ्चान्ये पूर्वसूरिभिः।
प्रोक्ताः पञ्चास्तिकायास्ते जीवपुद्गलकादयः ॥156॥

धर्माधर्मनभकालाश्चत्वारोमी बुधैर्मताः।
आमूर्ता निःक्रिया नित्यं स्वस्वभावेन सुस्थिताः ॥157॥

अमूर्तो निश्चयात् प्रोक्ता पूर्वं जीवोऽपि भो हरे!
मूर्तिमत् पुद्गलद्रव्यं तद् भेदास्ते गदाम्यहम् ।।158।।

गन्धवर्णरसस्पर्शशब्दाद्याः पुद्गला मताः ।
पूरणाद्गलनाच्चापि जातास्तन्नामरूढ़िकाः ।।159।।

स्कन्धाणुभेदभावत्वात् पुद्गलः सद्विधा भवेत् ।
स्निग्धरूक्षात्मकाणूनां सन्दोहः स्कन्धको मतः ।।160।।

द्वयाणुकादिर्महास्कंधपर्यन्तो विस्तरोऽस्य च ।
छायातपतमोज्योत्स्ना पानीयादिप्रभेदभाक् ।।161।।

उक्तं च श्रीमहापुराणे

अणवः कार्यलिंगाः स्युः द्विस्पर्शाः परिमण्डलाः।
एकवर्णरसाः नित्याः स्युरनित्याश्च पर्ययैः ।।162।।

सूक्ष्मसूक्ष्मास्तथा सूक्ष्माः सूक्ष्मस्थूलात्मकाः परे ।
स्थूलसूक्ष्मात्मकाः स्थूलाः स्थूलस्थूलाश्च पुद्गलाः ।।163।।

सूक्ष्मसूक्ष्मोऽणुरेकः स्यादृश्यो स्पृश्य एव च ।
सूक्ष्मास्ते कर्मणः स्कन्धाः प्रदेशानन्त्ययोगतः ।।164।।

शब्दः स्पर्शो रसो गंधः सूक्ष्मस्थूलो निगद्यते ।
अचाक्षुषत्वे सत्येषामिन्द्रियग्राह्यतेक्षणात् ।।165।।

स्थूलसूक्ष्माः पुनर्ज्ञेयाश्छायाज्योत्स्नातपादयः ।
चाक्षुषत्वेऽप्य' संहार्य रूपत्वाद्विघातकाः ।।166।।

द्रवद्रव्यं जलादि स्यात् स्थूलभेदनिदर्शनम् ।
स्थूलस्थूलः पृथिव्यादिभेद्यः स्कन्धः प्रकीर्तितः ।।167।।

तथाचोक्तं

अइ थूलथूलथूलं थूलं सुहुमं च सूहुमथूलं च ।
सुहुमं च सुहुमसुहुमं धराइयं होइ छब्भेयम् ।।168।।

---

1 .चाक्षुषतेप्य इति ब प्रतौ

त्रिषष्टिलक्षणञ्चापि पुराणं भुवनोत्तमम् ।
चतुर्गतिमहाभेदान् कालत्रयसमाश्रितान् ॥175॥

सर्वं सर्वेश्वरस्तस्मै स च प्राह सुरार्चितः ।
भास्करोऽयं यथा विश्वं द्योतयत्येव निर्मलम् ॥176॥

पुढवीजलं च छाया चउरिंदिय विसयकम्मपाउग्गम्।
छव्विहभेयं भणियं पुग्गलदव्वं जिणिंदेहिं ॥169॥

इत्यादिकपदार्थानां श्रीजिनेन्द्रेण भाषिते ।
लक्षणे योऽत्र श्रद्धानं धत्ते मोक्षं स गच्छति ॥170॥

एवं नेमिजिनः स्वामी लोकालोकैकतत्ववित्[1] ।
षट्द्रव्याणि समाख्याय पुनस्तस्मै धरेशिने ॥171॥

केशवाय सुभक्ताय विनयानतमौलये ।
कानिचित् तत्वबीजानि सञ्जगौ परमेश्वरः ॥172॥

जीवाजीवास्रवं बन्धं संवरं निर्जरां पराम् ।
मोक्षं तत्साधनोपायं द्विधा रत्नत्रयं शुभम् ॥173॥

तत्फलं स्वर्गमोक्षं च संजगाद् जगद्गुरुः ।
सर्वं त्रैलोक्यसारं च विस्तरेण गुणाकरः ॥174॥

एवं नेमिजिनेन्द्रोक्तं तत्त्वसारं जगद्धितम् ।
बलदेवेन संयुक्तः श्रुत्वाऽसौ केशवो मुदा ॥177॥

प्राप सम्यक्त्वसद्रत्नं कार्यकोटिप्रसाधनम्।
संतुष्टस्तत् पदाम्भोजं न नामबहुभक्तितः ॥178॥

ततस्तौ परमानन्दनिर्भरौ बलकेशवौ ।
पीतसद्धर्मपीयूषौ चक्रतुश्च प्रभोः स्तुतिम् ॥179॥

---

1 .लोकालोके इति अ प्रतौ

तथान्येऽपि महाभव्याः श्रुत्वा वाणीं जगद्गुरोः ।
किञ्चित् सम्यक्त्वसद्रत्नं केचिद्दीक्षां सुखप्रदाम्[1] ॥180॥

केचनाणुव्रतान्युच्चैः समादाय सुभक्तितः ।
श्रीजिनेन्द्रपदाम्भोजः प्रसादात् सुखिनोऽभवन् ॥181॥

एवं प्रभोः सभा सर्वा द्वादशप्रमिता तदा ।
जिनवाक्यामृतैर्गाढं सन्तृप्ता शर्मदायकैः ॥182॥

एवं तत्वार्थसद्वक्ता यः स्वामी भुवनोत्तमः ।
केवलज्ञानसच्चन्द्रः स कुर्याद्भवतां सुखम् ॥183॥

स श्रीनेमिजिनोदेवो देवदेवैः समर्चितः ।
दद्यान्मे स्वपदाम्भोजभक्तिं कल्याणकारिणीम् ॥184॥

(शार्दूलविक्रीडित)

इत्थं सर्वसुरासुरार्चितपदः श्रीनेमिनाथो जिनो।
लोकालोकविकाशनैकचतुरः सत्केवलज्ञानभाक् ।
भव्यांभोरुह भास्करो गुणनिधिर्मिथ्यातमो नाशकः ।
कुर्यात्सारसुखं जगत्त्रयहितः स्वमोक्षदः सत्सताम् ॥185॥

इतित्रिभुवनैकचूड़ामणिश्रीनेमिजिनपुराणेभट्टारकश्रीमल्लिभूषणशिष्याचार्य श्रीसिंहनन्दिनामांकिते ब्रह्मनेमिदत्तविरचिते तीर्थविहारतत्वोपदेशव्यावर्णनो नाम द्वादशोऽधिकारः ॥12॥

1.सुखप्रदाम् इति द प्रतौ

त्रयोदशोधिकारः

अथ श्रीवसुदेवस्य[1] या भार्या देवकी सती ।
सा नत्वा वरदत्ताख्यं गणीन्द्रप्रतिभाषता[2] ॥1॥

भो स्वामिन्! शुद्धचारित्रैः पवित्रीकृत भूतलम् ।
भिक्षार्थं गृहमायातं मुनीनां युगलत्रयम् ॥2॥

तद्विलोक्य महास्नेहः सञ्जातो मानसे मम ।
तत्र किं कारणं देव! सर्वं त्वं वक्तुमर्हसि ॥3॥

तन्निशम्य गुरुः प्राह संज्ञानमयविग्रहः ।
श्रुणु त्वं देवि ते वच्मि तेषां सम्बंधमुत्तमम् ॥4॥

अत्र जम्बूमतिद्वीपे भरतक्षेत्रमध्यगे ।
मथुराख्ये पुरे रम्ये जिनेन्द्रभवनैर्युते ॥5॥

सूरसेनो महाराजः प्रजापालनतत्परः।
प्रतापनिर्जिताराति मण्डलो नीतिमण्डितः ॥6।

तत्रैव सत्पुरे श्रेष्ठी भानुदत्तोतिधार्मिकः ।
तत्प्रिया यमुना दत्ता साध्वी सद्रूपमण्डिताः ॥7॥

तयोर्ज्येष्ठसुतो जातो सुभानुर्भानुवत्तराम् ।
भानुकीर्तिद्वितीयस्तु भानुषेणस्तृतीयकः ॥8॥

भानुनामा चतुर्थस्तु सूरदेवस्तु पञ्चमः ।
सूरदत्ताभिधः षष्ठः सप्तमः सूरसेनवाक् ॥9॥

1.वासदेवस्य इति ब प्रतौ

2.गणीन्द्रं प्रत्यभाषत इति द प्रतौ

अथैकस्मिन् दिने तत्र मथुरायां महीपतिः।
पूर्वोक्तसूरसेनाख्यो भानुदत्तोऽपि सद्वणिक् ॥10॥

प्रणम्य परया भक्त्या मुनिं चाभयन दिनम् ।
धर्ममाकर्ण्य जैनेन्द्रं शर्मसारशतप्रदम् ॥11॥

त्रिधा वैराग्यमासाद्य त्यक्त्व राज्यादिसम्पदाम् ।
मुनी बभूवतुस्तौ द्वौ निजात्मपरतारकौ ॥12॥

श्रेष्ठिनो यमुना दत्ता प्रिया वैराग्यतस्तदा ।
जिनदत्तार्यिकाभ्यर्णे सापि दीक्षां समाददे ॥13॥

तस्यास्ते सप्तमपुत्राये सुभानुप्रमुखाः खलाः ।
सप्तव्यसनसंसक्ताः सञ्जाताः पापकर्मणा ॥14॥

अन्यायकारिणः सर्वे क्रूरा वा यमदूतकाः ।
पुरान्निर्घाटिता राज्ञा चौरकर्मणि तत्पराः ॥15॥

अवन्तिविषयं गत्वा तत्रास्त्युज्जयिनी पुरी ।
तस्याः श्मशानके चापि निशाभागे भयानके ॥16॥

कनिष्ठं सूरसेनाख्यस्तत्र धृत्वा परेपि षट् ।
पुरं चोरयितुं याता यावत् तावत् कथान्तराम् ॥17॥

तत्पुराधिपतिस्तत्र वृषभध्वजसंज्ञकः ।
दृढ़प्रहारी नामाभूत् तद्भृत्यः सुभटाग्रणीः ॥18॥

वप्रश्रीस्तत्प्रियातस्यां वज्रमुष्टिः सुतोऽभवत् ।
महाशूरसहस्राणामग्रणीश्चितिनिर्भयः ॥19॥

विमलेन्दुः परः श्रेष्ठी तत्प्रिया विमला सती ।
तयोर्मंगी सुता जाता रूपलावण्यमण्डिता ॥20॥

सा तस्य वज्रमुष्टेश्च प्रियाप्राणप्रियाभवत् ।
अन्यदा भूभुजा सार्द्धं वसन्तसमयेऽखिलाः ॥21॥

क्रीडां कर्तुं वनं प्रापुः पौरास्ते परमादरात् ।
तदा मंगी वनं यातुं पुष्पमालाभिलाषिणीम् ॥22॥

ज्ञात्वा वप्रश्रिया वज्रमुष्टिमात्रातिदुष्टया ।
कालसर्पं घटे क्षिप्त्वा पुष्पमालाभिरुत्कटम् ॥23॥

मृष्टवाक्यैश्च पापिन्या मालार्थं प्रेरितास्तु सा ।
तव योग्या मया माला स्थापिता कलशे स्तुषे ॥24॥

किं न कुर्वन्त्यः पापिन्यो योषितः कुपिताः हृदि ।
सर्पिण्यो वा परप्राणहारिण्योऽत्र महीतले ॥25॥

ततस्तां सापि गृह्णन्ती मालां कुम्भस्थितेन च ।
दुष्टेन कालसर्पेण दष्टा मंगी सुपापिना ॥26॥

मूर्छिता तद्विषेणोच्चैः सर्वांगेषु महीतले ।
सम्पपात गतप्राणसमाना सम्बभूव च ॥27॥

मोहेनान्धो यथा प्राणी न जानाति हिताहितम् ।
नैव वेत्ति स्म सा तत्र तथा मंगी विषान्विता ॥28॥

तदा वप्रश्रिया शीघ्रं सा पुनर्दुष्टचेतसा ।
पलालवर्त्या संवेष्ट्य सा संक्षिप्ता श्मशानके ॥29॥

वनक्रीड़ावसाने च प्रियासंसक्तमानसः ।
ततः सोऽपि समागत्य वज्रमुष्टिर्महाभटः ॥30॥

मंगीमवीक्ष्यमाणः सन्मातरं व्याकुलोऽवदत् ।
मंगी क्व वर्तते मातस्तदाकर्ण्य दुराशया ॥31॥

वप्रश्रीः प्राह भो पुत्र! सा दष्टा कालभोगिना।
अस्माभिर्मोहितो नैव दग्धा ते प्राणवल्लभाः ॥32॥

किं त्वा वेष्ट्य पलालोरु रज्वा घोरे श्मशानके।
क्षिप्ता तथैव पुत्रोऽपि तदाकर्ण्य भटाग्रणी ॥33॥

करवालं करे कृत्वा शीघ्रमेव विनिर्गतः।
गत्वा प्रेतवनं घोरं हा हा मंगीति शोकवान् ॥34॥

रात्रौ तत्र समालोक्य श्मशाने भूरिभीतदे।
महाध्यानस्थितं पूतं वरधर्मं मुनीश्वरम् ॥35॥

नत्वा जगाद तं भक्त्या भो स्वामिन्! मे प्रियां यदि।
सम्प्रेक्षेऽहं तदा पादौ श्रीमतां शर्मदायकौ ॥36॥

सहस्रदलपद्मोघैः पूजयिष्यामि सर्वथा।
इत्याशास्य ततो घोरे श्मशाने पर्यटन् पुनः ॥37॥

तन्मुनेः स्पर्शवातेन निर्विषतां विलोक्यं च।
पलालवर्तिकां मुक्त्वा समानीयान्ति कं मुनेः ॥38॥

अत्र तिष्ठ प्रिये स्वामीपादपद्मान्तिके सुखम्।
आनयामि सरोजानि पूजनार्थं महामुनेः ॥39॥

इति प्रिया गुरोः पादमूले धृत्वा प्रमोदतः।
स्वयं च गतवान् पद्मान् समानेतुं भटोत्तमः ॥40॥

तदा प्रछन्नभावेन सूरसेनः स्थितौ द्रुमैः।
सर्वं विलोक्य तद् वृत्तं मंग्याश्चित्तं परीक्षितुम् ॥41॥

तस्मिन् गते ततो मंग्याः समीपं स विनोदतः।
समागत्य निजं रूपं सम्प्रदर्श्य[1] मनोहरम् ॥42॥

1.ते प्रदर्श्य इति अ प्रतौ

नानाहास्यविलासाद्यैर्विकारजनितैस्तराम् ।
रञ्जयामास तच्चितं महाधूर्तशिरोमणिः ॥43॥

सापि प्राह तदा मंगी तदा संसक्तमानसा ।
नयत्वं मां त्वया सार्द्धमागमिष्यामि भो भटः! ॥44॥

सोऽपि धूर्तः पुनः प्राह भर्ता तेऽयं महाभटः ।
तस्माद्बिभेमि मच्चित्ते तत्त्वां गृह्णामि नैव च ॥45॥

मंगी जगाद मा भैषीर्मानसे भो भटोत्तमा ।
किं करिष्यत्यसौ मूढः वराको हन्यते मया ॥46॥

इत्यादिप्रीतितस्तत्र तयोः सञ्जल्पने सति ।
पद्मान्यादाय वेगेन वज्रमुष्टिस्समागतः ॥47॥

दत्वा मंग्याः करे खड्गं सम्पूज्य कमलैर्मुने ।
पादपद्मं द्वयं यावन्नमस्कारं करोत्यलम् ॥48॥

तावन्मंग्याः च तं हन्तुं करालः करवालकः ।
निक्षिप्तस्तत्छिरो देशे खड्गस्तत्र पतन्नपि॥49॥

शूरेण शूरसेनेन स्खलितः स्वकरेण च ।
सूरसेनांगुलिं छित्वा तदा भूमौ पपात सः[1] ॥50॥

वज्रमुष्टिस्तदालोक्य मा भयं कुरु भो प्रिये!
इति प्राह तदा सापि भीताहं राक्षसात्[2] प्रभोः ॥51॥

वृथोत्तरं ददावित्थं सत्यं माया तदुद्भवा ।
एतत्सर्वं समालोक्य सूरसेनः स तस्करः ॥52॥

महावैराग्यसम्पन्नः स्वचित्ते चतुरोत्तमः ।
चिन्तयाभास भव्यात्मा धिक् धिक् संसारवेष्टितम् ॥53॥

1.पपातत इति अ प्रतौ

2.रक्षसात् इति ब-द प्रतयोः

यन्निमित्तं महाकष्टं पापं च क्रियते सदा।
ताः स्त्रियो वञ्चिकाश्चैवं पापिन्यः प्राणनाशिकाः ॥54॥

बहिरुज्वलतोपेताः दुष्टाश्चान्ते स्त्रियो भुवि[1]।
किं पाकफलमाला वा सद्यः सन्तापदायिका ॥55॥

मूढास्तासु[2] महाप्रीतिं कृत्वा संज्ञानवर्जिताः।
अधोगतिं प्रयांत्याशु करिणः करिणीषु वा ॥56॥

अतः पंचेंद्रियोत्पन्नैर्भोगैर्भोगिभयानकैः।
अस्माकं[3] पूर्यतामत्र[4] संसारे दुखसागरे ॥57॥

इत्यादिकं सुवैराग्यं यावदास्ते स चिन्तयन्।
तावत् सुभानुमुख्यास्ते चौर्येणो पात्र सद्वनाः ॥58॥

षड्बान्धवाः समागत्य[5] धनं धृत्वा तदग्रतः।
कनिष्ठं भ्रातरं प्राहुर्गृहाणु तव भागकम् ॥59॥

सूरसेनस्तदालोक्य सञ्जगाद स्वबान्धवान्।
नाहं गृह्णामि वो द्रव्यं भीतः संसारदुःस्थितो ॥60॥

संयमं संग्रहीष्यामि तदाकर्ण्य च तेऽवदन्।
संयमं ग्रहणो हेतुः कस्ते जातो वद ध्रुवम् ॥61॥

ततः सोऽपि लघुर्भ्राता दर्शयित्वा निजांगुलिम्।
छिन्नां तेषां तथा स्वस्य मंग्यश्चरितं जगौ ॥62॥

तेऽपि सर्वं समाकर्ण्य स्त्रीचरित्रं सुदारुणम्।
कारणं सर्वपापस्य तन्मत्वा मानसे दृढ़म् ॥63॥

1.भुविस्त्रियो इति अ प्रतौ
2.मूढात्मासु इति स प्रतौ
3.अस्मात् इति स प्रतौ
4.पर्यातामत्र इति स प्रतौ
5.समोध्यस्य इति स प्रतौ

संसारदेहभोगेषु विरक्तास्त्रिप्रकारतः ।
निर्मोहकरवालेन मोहजालं निहत्य च ॥64॥

मत्वा जीर्णतृणं सर्वं त्यक्त्वा शीघ्रं धनादिकम् ।
सप्त ते भ्रातरो धीराः वरधर्मं मुनीश्वरम् ॥65॥

नत्वा भक्त्या तपो रत्नरञ्जिताखिलभूतलम् ।
दीक्षामादाय जैनेन्द्री बभुवुर्मुनयस्तराम् ॥66॥

जिनदत्तार्यिका पार्श्वे तेषां भार्याश्च निर्मलाः ।
सर्वाः श्रीमज्जिनेन्द्रोक्तं तपः प्रापुः सुखप्रदम् ॥67॥

उज्जयिन्याः वने नेद्युः सुस्थितान् सप्ततान् मुनीन् ।
शुद्धरत्नत्रयोपेतान् गम्भीरान् सागरादपि ॥68॥

वज्रमुष्टिः समालोक्य सम्प्रणम्य कृतादरः ।
श्रीमतां सारसौभाग्यरूपलावण्यशालिनाम् ॥69॥

नवेऽपि यौवने दिव्ये जगच्चेतोऽनुरंजने ।
को दीक्षा ग्रहणे हेतुः पृच्छति स्मेति सद्भटः ॥70॥

तेऽपि तत्कारणं प्राहुर्यथा जाता मुनीश्वराः ।
तत्समाकर्ण्य सोऽप्याशु वज्रमुष्टिर्भटाग्रणी ॥71॥

तमेव वरधर्माख्यं नमस्कृत्य महामुनिम् ।
दीक्षां जग्राह भव्यात्मा सर्वसंगविवर्जिताम् ॥ 72॥

सत्यमासन्नभव्यानां जन्तूनामत्र भूतले ।
किं न वा कारणं चास्यातपो लक्ष्म्याः समागमे ॥73॥

आर्यिकास्ताश्च संवीक्ष्य नत्वा भक्तया प्रमोदतः ।
महायौवनकालेऽपि भवत्यो रूपमण्डिताः ॥74॥

तपः श्रीमज्जिनेंद्रोक्तं संप्राप्ताः केन हेतुना ।
मंगी प्राह ततस्ताभिः सर्वं तस्याः समीरितम् ॥75॥

तन्निशम्य तदा मंगी निंदां कृत्वा निजात्मनः ।
महावैराग्यसंपन्ना तासां पार्श्वे तपोऽग्रहीत् ॥76॥

सुभानु मुनिमुख्यास्ते मुनयः सप्तनिर्मलाः ।
महातपस्तरां कृत्वा प्रांते सन्यासपूर्वकम् ॥77॥

त्रयस्त्रिंशाः सुरा जाताः स्वर्गे सौधर्मसंज्ञके ।
द्विसागरोपमायुष्कः देवेन्द्रेणापि मानिताः ॥78॥

तत्र सौख्यं चिरं भुक्त्वा ततश्च्युत्वा स्वपुण्यतः ।
पूर्वस्मिन् धातकीखण्डे क्षेत्रे तत्रस्थे भारते ॥79॥

रूप्याद्रिदक्षिणश्रेण्यां नित्यालोकपुरे पुरे ।
चित्रचूलः खगाधीशो देवी नाम्ना मनोहरी ॥80॥

सुभानुवरदेवोऽभूत् तयोश्चित्रांगदः सुतः ।
तयोरेव परे ते पि षड्पुत्राः यज्ञिरे यमाः ॥81॥

गरुडध्वजो द्वितीयस्ततो गरुडवाहनः।
चतुर्धा मणिचूलाख्यः पञ्चमः पुष्पचूलवाक् ॥82॥

गगनादिनन्दनाख्यो गगनादिचरः परः ।
सप्तैते भ्रातरो जाताः सारसम्पद्विराजिताः ॥83॥

तत्रैव दक्षिणश्रेण्यां राजामेघपुराधिपः ।
धनञ्जयः खगाधीशः सर्वश्रीस्तस्य भामिनी ॥84॥

तस्याः पुत्री समुत्पन्ना रूपसौभाग्यसंयुता ।
धनश्रीनामतः ख्याता सती सद्गुणमण्डिताः ॥85॥

तथा तत्रैव रूप्याद्रौ जातो नन्दपुरे प्रभुः ।
नाम्ना श्रीहरिषेणोऽस्य श्रीकान्ताख्या प्रियाभवत् ॥86॥

हरिवाहननामाऽभूत्तयोः पुत्रो विशुद्धधीः ।
धनश्रियो भवत्येव स सम्बन्धेन मैथुनः ॥87॥

तत्रैव भरतस्थायामयोध्यायां स्वयंवरे ।
धनश्रीर्मालया प्रीत्या स्वीचक्रे हरिवाहनम्॥88॥

तत्पतेः पुष्पदन्ताख्य चक्रिणो वनितोऽभवत् ।
प्रीतिंकराभिधा तस्याः सुदत्तस्तनयः कुधीः ॥89॥

स पापी कोपतो दुष्टो गर्विष्टश्चक्रिणः सुतः।
हरिवाहनमाहत्य सञ्जग्राह धनश्रियम् ॥90॥

तद्वैराग्येण ते सप्त तत्र चित्रांगदादयः ।
भूतानन्दाख्यतीर्थेशाः पादमूले जगद्धिते ॥91॥

गृहीत्वा संयमं सारं प्रतिपाल्य यथाक्रमं ।
प्रांते सन्यासस्य माहेन्द्रस्वर्गे सामानिकाः सुराः ॥92॥

भूत्वा तत्र सुखं दिव्यं भुक्त्वा ते सप्तसागरान् ।
तस्मादागत्य पुण्येन क्षेत्रेऽस्मिन् भारते शुभे ॥93॥

कुरुजांगलदेशस्थे हस्तिनाख्ये पुरे महान् ।
श्वेतवाहननामाभूद्वणिक् सत्पुण्यकारकः ॥94॥

श्रेष्ठिनी बन्धुमत्याख्या तस्यां पूर्वं सुभानुवाक् ।
शंखो नाम सुतो जातः सुधीः श्रीजिनभक्तिभाक् ॥95॥

तत्पुराधिपतेर्गंगदेवनाम्नो महीपतेः ।
सुदेव्यानन्दयशसः परे ते षडनुजोऽभवन् ॥96॥

गंगाख्यो नन्ददेवश्च खड्गमित्रश्च नन्दवाक् ।
सुनन्दो नन्दिखेणाख्यो यमलास्ते परस्परम् ॥97॥

ततश्च नन्दयशसो देव्यागर्भे पुनः सति ।
तस्यां सगंगदेवाख्यः राजा जातः परान्मुखः ॥98॥

तदा नन्दयशा राज्ञी ज्ञात्वा भूपं परान्मुखम् ।
भाविपुत्रप्रभावोऽयं धात्रिकां रेवती जगौ ॥99॥

सापि धात्री सुते जाते तं नीत्वा बालकं द्रुतम् ।
श्रेष्ठिन्यै बन्धुमत्यै च सन्ददौ तत्रापि बालकः ॥100॥

निर्नामक इति ख्यातो वृद्धिं प्राप यथासुखम् ।
अन्यदा गंगदेवस्य भूपतेस्तान् सुतान् वने ॥101॥

गंगनामादिकान् षट् च भुञ्जानान् वीक्ष्य शंखवाक् ।
निर्नामकं प्रतिपाह भुंक्ष्वैतेस्त्वमपीत्यमा ॥102॥

निर्नामकस्तदाकर्ण्य तैः षड्भिर्बान्धवैः समम् ।
भोक्तुं स्थितस्तमालोक्य राज्ञी नन्दयशा क्रुधा॥103॥

पादेन ताडयामास कस्यायं चेति वेगतः ।
तदालोक्य शुचं प्राप्तौ शंखनिर्नामकौतराम् ॥104॥

तथैकदा नृपेणामा गंगदेवनतौ पुनः ।
शंखनिर्नामकौ गत्वा द्रुमसेनं महामुनिम् ॥105॥

अवधिज्ञानिनं नत्वा धर्ममाकर्ण्य शर्मदम्।
शंखः प्राह मुने स्वामिन्! सर्वमव्यवहितंकरः ॥106॥

निर्नामकाय भो देवः! देवी नन्दयशा स्वयं ।
कारणेन विना गाढ़ं कथं कुप्यति निर्दयम् ॥107॥

तन्निशम्य मुनिः प्राह द्रुमसेनोऽवधीक्षणः ।
सुराष्ट्रविषये राजा गिर्यादिनगरे पुरा ॥108॥

नाम्ना चित्ररथः ख्यातस्तस्यामृतरसायनः ।
स्तूपकारः पलं पक्तुं चतुरः पापकृत्तराम् ॥109॥

तस्मै स लम्पटो राजा ददौ ग्रामान् द्विषट् कुधीः ।
कदाचित्सोऽपि भूपालो नाम्ना चित्ररथः पुनः ॥110॥

सुधर्माख्यमुनेः पार्श्वे धर्मं श्रुत्वा जिनेशिना ।
ज्ञात्वा जीवादिकं तत्वं श्रद्धां कृत्वा सुनिश्चलम् ॥111॥

राज्यं मेघरथायोच्चैर्दत्वा पुत्राय धीमते ।
सर्वं त्यक्त्वा मुनिर्जातः सुधीः स्वपरतारकः ॥112॥

सुतो मेघरथश्चापि सञ्जातः श्रावकोत्तमः ।
सूपकारस्य तान् ग्रामान् गृहीत्वा चैककं ददौ ॥113॥

तन्निमित्तं स पापात्मा सूपकारो दुराशयः।
बद्धवैरो मुनौ तस्मिन्नेकदा तं मुनीश्वरम् ॥114॥

चर्यागतं[1] कुधीरुष्टः पक्वं घोषातकीफलम् ।
अभोजयच्च तद्भुक्त्वा सुधर्मोऽपि महामुनिः ॥115॥

उर्जयन्ताचले स्वामी तद्विषेण प्रपीडितः[2] ।
दर्शनज्ञानचारित्रतपसां प्रतिपालकः ॥116॥

कृत्वा सन्यासकं शीघ्रं महमिन्द्रोपराजिते ।
जघन्यायुः समासाद्य स्थितस्तत्र सुखान्वितः ॥117॥

1.चर्यायातं इति स प्रतौ

2.प्रपीडिताम् इति द प्रतौ

सूपकारोऽपि पापेन तृतीयं नरकं गतः ।
तत्र दुखं चिरं प्राप्य ततो निर्गत्य कष्टतः ॥118॥

संसारे सुचिरं दुःखं भुञ्जानः स परिभ्रमन् ।
द्वीपेऽस्मिन् भारते[1] क्षेत्रे देशे मलयसंज्ञके ॥119॥

ग्रामे पलाशकूटाख्ये यक्षदत्तगृहेशिनः ।
सञ्जातो यक्षदत्तायां यक्षनामा सुतः कुधीः ॥120॥

पुनस्तयोः सुतो जातो यक्षिलस्तु द्वितीयकः ।
तयोर्मध्ये स्वपापेन यो ज्येष्ठो यक्षनामकः ॥121॥

स लोकैः निर्दयत्वाच्च प्रोक्तो निरनुकम्पकः ।
द्वितीयस्तु दयालुत्वात् सानुकम्पः स जल्पितः ॥122॥

एकदा सानुकम्पेन वार्यमाणो दुष्टधीः ।
ज्येष्ठो दयाविनिर्मुक्तः शकटं भाण्डसम्भृतम् ॥123॥

मार्गास्थितान्धसर्पस्योपरि प्रापयति स्म सः ।
सर्पोऽपि कष्टतो कामनिर्जरो मरणं गतः ॥124॥

पुर्याश्वेतं बिकायां स वासवाख्यमहीपतेः ।
जाता सुता वसुन्धर्यां नाम्ना नन्दयशास्त्वसौ ॥125॥

पुनर्निरनुकम्पश्च सानुकम्पेन सादरम् ।
त्वयेदृशं महापापं कर्त्तव्यं नैव बान्धवः ॥126॥

इति प्रबोधितो भ्राता[2] सम्प्राप्योपशमं तदा ।
स्वायुरन्ते बभूवात्र सोऽयं निर्नामकस्ततः ॥127॥

1.भरत इति अ प्रतौ

2.भ्रात्रा इति ब प्रतौ

पूर्वपापोदयादस्मै राज्ञी नन्दयशाः स्वयं।
कुप्यतीति समाकर्ण्य गंगदेवो महीपतिः ॥128॥

षट् पुत्रास्तेऽपि शंखश्च तथा निर्नामकोऽपि च।
निर्विन्नासंसृतैर्गाढं दीक्षित्वा मुनयोऽभवन् ॥129॥

तथा नन्दयशा राज्ञी रेवती धात्रिकापि च।
सुव्रताख्यार्यिका[1] पार्श्वे गृहीत्वा संयमं दृढम् ॥130॥

अन्यजन्मनि पुत्राणामेषां लाभे च वर्द्धनैः।
निदानं चक्रतुस्ते द्वे मूढत्वादार्यिके तदा ॥131॥

ततः सर्वेऽपि ते तीव्रं तपः कृत्वा जिनोदितम्।
महाशुक्रे स्वपुण्येन जाताः सामानिकाः सुराः ॥132॥

सागरान् षोडश प्रोच्चैः सुखं भुक्त्वा मनोहरम्।
तस्मादागत्य भो देवि! यः शंखाख्यः चरः सुरः ॥133॥

पद्माख्यो बलदेवोऽभूद्वसुदेवस्य नन्दनः।
रोहिणीतनुजो धीरः सम्यग्दृष्टिशिरोमणिः ॥134॥

मृगावत्याख्यविषये दशार्णपुरभूपतेः।
देवसेनस्य चोत्पन्ना धनदेव्याश्च देवकी ॥135॥

त्वं सानन्दयशाः स्त्रीत्वमुपगम्य निदानतः।
जाता शिवदेवस्य सती प्राणप्रियाप्रियाः ॥136॥

तथा मलयं देशे च भद्दिलाख्यपुरे[2] शुभे।
सुदृष्टिश्रेष्टिनो भार्या सञ्जाते रेवती चरी ॥137॥

1.सुव्रतीख्यार्यिका इति ब प्रतौ

2.भद्रिलाख्यपुरे इति द-ब प्रतयोः

नाम्नालका सतीसारदानपूजा विराजिता ।
जिनेन्द्रचरणाम्भोजसेवनैकमधुव्रता ॥138॥

प्राक्तनाः षट्कुमारास्ते स्वर्गादागत्य पुण्यतः ।
सर्वे ते युगलीभूत्वा देवक्याश्चाभवन् सुताः ॥139॥

तथा ते मुक्तिगामित्वा शक्रादेशेन वेगतः ।
नाम्ना नैगमदेवेन समुत्पत्तिक्षणे मुदा ॥140॥

नीत्वा कंसभयात् तस्याः अलकायाः समर्पिताः ।
तया पूर्वभवप्रीत्या श्रेष्ठिन्या पोषितास्तराम् ॥141॥

तत्राद्यो देवदत्ताख्यो द्वितीयो देवपालवाक् ।
अनीकदत्तस्तृतीयश्चतुर्थोऽनीकपालकः ॥142॥

शत्रुघ्नः पञ्चमः पुत्रः षष्टस्तु जितशत्रुवाक् ।
अस्मिन्नैव भवे सर्वे भाविसिद्धि[1] वधूवरा ॥143॥

विरक्तो यौवनारम्भे दीक्षित्वा[2] मुनयोऽभवन् ।
भिक्षार्थं गृहमायातान् समालोक्य च तान् मुनीन् ॥144॥

जन्मान्तरा गतस्नेहात् पुनस्ते मानसे शुभे ।
महास्नेहः समुत्पन्नाः परमानन्ददायकः ॥145॥

पूर्वनिर्नामकोयोऽभून्मुनिः कुर्वन्महातपः ।
तृतीयकेशवस्योच्चैः स्वयम्भूनामधारिणाः ॥146॥

नानाविभूतिमालोक्य त्वत्र चामरकादिकाम्।
तत्रासक्तमना मृत्वा सुरो भूत्वा सुलोभतः ॥147॥

तस्मादागत्य ते पुत्र कृष्णनामान्तिमो हरिः ।
हत्वा कंसजरासंधौ त्रिखण्डेशो बभूव सः ॥148॥

1.भावसिद्धि इति अ प्रतौ

2.दक्षित्वा इति ब प्रतौ

श्रुत्वा स्वभवसम्बंधं पुत्राणां च विशेषतः ।
सन्तुष्टा मानसे गाढं देवकी सा शुभाशया ॥149॥

तदा सा देवकी देवी परमानन्दनिर्भराः ।
वरदत्तगणीन्द्रस्य पादद्वैतं न नाम च ॥150॥

तथा सर्वेऽपि ते भव्याः देवक्याः भवविस्तराम् ।
श्रुत्वा श्रीमद्गणाधीशं तं नमन्ति स्म भक्तितः ॥151॥

(शार्दूलविक्रीडित)

देवेन्द्रार्चितपादपद्मयुगलस्त्रैलोक्यचूड़ामणिः ।
कामक्रूरकरीन्द्रवृन्ददमने पञ्चाननः पावनः ।
लोकालोकविलोकनैकचतुरः संसारविच्छेदको ।
भव्यानां गुणरत्नराशिरतुलो नेमीश्वरः शंक्रियात् ॥152॥

इतित्रिभुवनैकचूड़ामणिश्रीनेमिजिनपुराणेभट्टारकश्रीमल्लिभूषणविरचिते महादेवीपद्मनामबलदेवकृष्णनामनारायणोदिभवावलीव्यावर्णनो नामत्रयोदशोऽधिकारः ॥13॥

चतुर्दशोऽधिकारः

अथ प्रणम्य तं भक्त्या पटराज्ञी हरेर्गुरुम् ।
सत्यभामापि स्वं पूर्वं भवसम्बन्धविस्तरम् ॥1॥

पृच्छति स्म गणीन्द्रोऽपि वरदत्तो गुणाकरः ।
सञ्जगाद कृपासिन्धुर्जैनतत्वविदांवरः ॥2॥

श्रणु देवि ! प्रवक्ष्येऽहं शीतलाख्यजिनेशिनः ।
तीर्थान्ते श्रीजिनेन्द्राणां धर्मेनाशं प्रयान्ति च ॥3॥

भद्दिलाख्यपुरे[1] जातो नाम्ना मेघरथो नृपः ।
तस्य राज्ञी च सञ्जाता नन्दाख्या प्राणवल्लभा ॥4॥

भूतिशर्मा द्विजस्तत्र कमला ब्राह्मणी तयोः ।
मुण्डशालायनः[2] पुत्रो वेदवेदांगपारगाः ॥5॥

महाकामातुरः पापी लम्पटो वनितासु च ।
मिथ्याकर्मोदयात् सोऽपि मुण्डशालायनोऽन्यदा ॥6॥

स्वेच्छया गोमही कन्या हिरण्यादिकदानकम् ।
प्रशस्य नूतनं काव्यं कृत्वा स्वार्थवशाद्विधीः ॥7॥

राज्ञो[3] मेघरथस्याग्रे वाचयित्वा पुनर्जगौ ।
राजन्नेतानि दानानि शर्मकारीणि भूतले ॥8॥

दीयन्ते ब्राह्मणेभ्यश्च हलादिमुशलैः सह ।
येन स्वर्गादिकं देव प्राप्यते भूरिशस्तराम् ॥9॥

किं तपोभिर्वृथा देहः दण्डनैर्भोगखण्डनैः ।
सन्यासे मरणैः किं वा वृथा प्राणविवर्जनैः ॥10॥

1.भद्दिलाख्यपुरे इति अ प्रतौ
2. मुंडशालायिनःइति ब प्रतौ
3. राज्ञौ इति ब-द प्रतयोः

अस्माकं गोसवे यज्ञे हन्यन्ते पशवः प्रभो ।
भक्ष्यते चामिषं स्वैरं पोष्यन्ते विषयाःसुखम् ॥11॥

सूत्रामणौ महायज्ञे मद्यपानं निजेच्छया ।
कृत्वा मातृभगन्यादिसेवनं क्रियते तथा ॥12॥

तत्रापि ब्राह्मणेभ्यश्च श्रृंगारसहिताः स्त्रियः ।
महामञ्चकसंयुक्ताः दीयन्ते धर्महेतवे ॥13॥

इत्यादिकैर्महापापोपदेशैर्निजवाञ्छितैः ।
कारयित्वा कुदानानि गृहक्षेत्रादिकानि च ॥14॥

तदा मेघरथं नाना राजानं मुग्धमानसम्।
निर्बुद्धींश्च[1] तथा लोकान् वञ्चकायामास दुष्टधीः ॥15॥

तेऽपि कालादिदोषेण कृत्वा तस्य वचो वृथा ।
भूरि संसारवारासौ सम्प्रापुर्मज्जनं जनाः ॥16॥

स्वयं च मद्यमांसादिपरस्त्री सेवनं तथा ।
कृत्वा दुध्यानतश्चान्ते मृत्वा पापशतैर्भृतः ॥17॥

सप्तमं नरकं प्राप्तस्तत्र दु:खशतानि च ।
छेदनं भेदनं शूलारोपणं क्रकचैस्तथा ॥18॥

विदारणं महाभ्राष्ट्रं क्षेपणं तलनादिकम्[2] ।
क्षुधातृष्णादिकैर्दुखं सम्प्राप्तं सुचिरं तदा ॥19॥

सत्यं जिनेन्द्रवाक्येषु परमानन्ददायिषु ।
परान्मुखे[3] महापापी किंवा दुखं न याति सः ॥20॥

तस्मान्निर्गत्य कष्टेन पूर्वपापेन पीडितः ।
मध्ये मध्ये महाक्रूरः पशुर्भूत्वा पुनर्मृतः ॥21॥

1.निर्बुद्धी इति ब प्रतौ
2.तलानादिकं इति ब प्रतौ
3.परान्मुखो इति अ प्रतौ

परेषु नरकेषूच्चैः[1] षट्सु भुक्त्वा च दारुणम् ।
दुखं क्रमेण दुर्बुद्धिः पापकर्मरतस्ततः ॥22॥

गन्धमादनशैलाग्रान्निर्गता या महानदी।
गन्धावतीति विख्याता तत्तटेति मनोहरे ॥23॥

भल्लुकि नाम पल्यां[2] च भिल्लो जातः स पापतः।
कालाख्यश्चैकदा सोऽपि वरं धर्ममुनीश्वरम् ॥24॥

प्रणम्य मधु मद्यं च मांसं त्यक्त्वा ततोऽमृतः ।
विजयार्द्धेऽलकापुर्य्यां राज्ञः पुरुबलस्य च ॥25॥

ज्योतिर्मालाप्रिया तस्यां पुत्रो हरिबलोऽभवत् ।
पूर्वव्रतप्रसादेन रूपादिगुणमण्डितः ॥26॥

एकदानन्तवीर्याख्य मुनीन्द्रचरणद्वयम् ।
नत्वा हरिबलः सोऽपि गृहीत्वा द्रव्यसंयमम् ॥27॥

प्रान्ते सौधर्मकल्पे च देवो भूत्वा ततश्च युतः ।
रूप्याद्रौ च सुकेत्वाख्या रथनूपुरभूपतिः ॥28॥

विद्याधरेऽधिपस्तस्य राज्ञी नाम्ना स्वयंप्रभा ।
तयोः सुता समुत्पन्ना सत्यभामात्वमीदृशी ॥29॥

कदाचित्ते पिता प्राह नत्वा नैमित्तिकं मुदा ।
पुत्रीमेकस्य भो! ब्रूहि प्रिया चैषा भविष्यति ॥30॥

तदा नैमित्तिकश्चाह कुशलाख्यो विचक्षणम् ।
भरतार्द्धपतेः कृष्णचक्रिणः प्राणवल्लभा ॥31॥

पट्टदेवी जगत्ख्याता भविष्यति न संशयः ।
श्रुत्वा नैमित्तिकं प्रोक्तं मत्वा सत्यं स्वमानसे ॥32॥

---

1. नारकेषूच्चैः इति ब प्रतौ
2.पल्लयां इति अ प्रतौ

ततः सुकेतुना तेन पित्रा ते चक्रिणे[1] मुदा ।
दत्वा त्वं विधिना चास्य पट्टदेवीत्यभूरिह ॥33॥

समाकर्ण्य तदा सत्यभामा स्वभवचेष्टितम् ।
संतुष्टा मानसे गाढ़ं को न तुष्टो गुरूक्तिभिः ॥34॥

अथ प्रणम्य सद्भक्त्या गणीन्द्रं रुक्मणी जगौ ।
ब्रूहि भो करुणासिंधो ममापि भवसंततिम् ॥35॥

मुनीन्द्रः प्राह भो देवि जंबूद्वीपे मनोहरे ।
पवित्रे भारते क्षेत्रे देसे मगधनामनि ॥36॥

नाम्ना सोमो द्विजो जातो लक्ष्मी ग्रामे धनैर्युतः ।
ब्राह्मणी तस्य संजाता नाम्ना लक्ष्मीमतिः प्रिया ॥37॥

रूपलावण्यसौभाग्यमंडिता कुलगर्विता ।
भूरि लक्ष्मीयुता चापि सैकदा मंडनप्रिया ॥38॥[2]

सर्वश्रृंगारसंयुक्ता कुंकुमेन च मंडनम् ।
कृत्वा दर्शोद्यता वीक्ष्य मुनिं भिक्षार्थमागतम् ॥39॥

समाधिगुप्तनामानं तपोरत्नाकरं परं ।
पापिनीधर्मनिर्मुक्ता चक्रे तन्निन्दनं महत् ॥40॥

कस्मादयं समायातो नग्नो लिप्तो मलैस्तराम् ।
निर्लज्जो मंगलं स्नानं विलेपनविवर्जितः ॥41॥

निराश्रयः सदादुःखी भिक्षाहारी गृहे गृहे।
महादुर्गंधदेहोपि कथं दृष्टो मयाऽशुभः ॥42॥

एवं निन्दां विधायोच्चैश्चक्रे निष्टी[3] वनं पुनः ।
तदोदुंबर कुष्ठेन पीडिता पापकर्मणा ॥43॥

1.चक्रिणो इति ब प्रतौ

2.ब प्रतौ अनुपलब्धः

3 .निष्टा इति ब प्रतौ

वेष्टिता[1] मक्षिकालक्षैः कालैर्वा पापपुंजकैः ।
भग्नाशांगुलीदेशा नष्टकेशा बभूव सा ॥44॥

दुर्गंधदूषितागाढं संत्यक्ता सज्जनैर्जनैः ।
तीव्रवेदनां या तप्ता वह्नौ वा लोहपुत्तली ॥45॥

रूपलावण्यसौभाग्यं सर्वनष्टं क्षणार्द्धतः ।
याचमानापि न प्राप्ता भिक्षां पापोदयेन च ॥46।

सत्यं लोकऽत्र साधूनां महाचारित्रशालिनाम् ।
यो निंदको महापापी सभवेद्दुखभाजनम् ॥47॥

ततो लक्ष्मीमतिः सा च ब्राह्मणी पापकर्मणा ।
शुनीव[2] तर्जिता सर्वैः स्थिता शून्य गृहे क्वचित् ॥48॥

मृत्वार्त्तध्यानतो मोहात् तस्यैव ब्राह्मणस्य च ।
गेहे छुछुंदरी जाता सोमस्य हृदयेऽन्यदा ॥49॥

धावमानापि तेनोच्चैर्निर्दयं प्रांगणे क्रुधा ।
निक्षिप्ता मरणं प्राप्ता भूत्वा तत्रैव गर्दभः ॥50॥

पूर्वाभ्यांसेन तद्गेहं गर्दभः स पुनः पुनः ।
समागछंश्च तच्छात्रैस्ताडितो लकुटादिभिः[3] ॥51॥

भग्नपादस्ततो नष्टो व्याकुलो व्रणपीडितः ।
कूपे पपात पापेन[4] तत्र मृत्वा च कष्टतः ॥52॥

संजातः शूकरश्चांधो ग्रामेयः सोपि कुर्कुरैः[5] ।
निष्ठुरैर्भक्षितो मृत्वा महाकष्टेन पापतः ॥53॥

1.वेष्टितः इति अ प्रतौ
2.सुनीव इति अ प्रतौ
3.लकुठादिभिः इति ब प्रतौ
4. कूपेपपानपापेन इति अ प्रतौ
5.कुकुरौः इति अ प्रतौककुरैः इति ब प्रतौ च

ततश्च मंदिरग्रामे नद्युत्तारणकर्मकृत्[1]।
मत्स्याख्यो धीवरस्तस्य मंडूका नाम[2] कामिनी ॥54॥

तयोः पुत्री बभूवाति दुर्गंधाब्राह्मणीचरा[3]।
नामतः पूतिकालोकैः सा प्रोक्ता पूर्वपापतः ॥55॥

तज्जन्मांतरं सोपि धीवरोयऽमगोचरः ।
जातो मातापि मंडूका मृतायुः क्षयतस्ततः ॥56॥

पोषिता सा च कष्टेन मातामह्यपि पूतिकाः।
संजाता प्रौढकन्या च सैकदा काललब्धितः ॥57॥

विचिकित्सा नदीतीरे समालोक्य पुरातनम् ।
समाधिगुप्तनामानं प्रतिमायोग[4] धारिणम् ॥58॥

मुनीश्वरं प्रणम्याशु संभूत्वा शांतमानसा ।
मुनीन्द्रस्य तदा तस्य महाचारित्रधारिणः ॥59॥

शरीरे संस्थितान् दंशमशकान् कष्टदायकान् ।
स्फेटयंती स्थिता स्वस्य वस्त्रेणौच्चैर्दयान्विता ॥60॥

निशाप्रांते मुनिः सोपि प्रोद्गते च दिवामणौ ।
उपविष्टः सुखं स्वामी जैनतत्वविदांवरः ॥61॥

तत्पादपद्मयोर्मूले भव्यानां शर्मदायिनी ।
नत्वा सापि स्थिता यावत् तां जगाद मुनीश्वरः॥62॥

धर्मं जीवदयामूलं सत्यशौचादिसंयुतम् ।
श्रीमज्जिनेन्द्रचंद्रोक्तं सुरासुरसमर्चितम् ॥63॥

1.नद्यत्तारण इति अ प्रतौ

2. मंडकानाम इति अ-द प्रतयोः

3. दुर्गंधाब्राह्मणीवरी इति ब-स-द प्रतीनाम्

4. प्रतिमायोग्य इति अ प्रतौ

स्वर्गमोक्षसमुत्पत्तिकारणं सा निशम्य च ।
निजै र्भवांतरैः सार्द्धं महादुखशतं प्रदैः ।।64।।

मद्यमांसमधुत्यागैर्वटादिफलवर्जनम् ।
अणुव्रतानि सत्पर्वोपवासादिकमाददे ।।65।।

ततोन्यदा मुनिं नत्वा तं गुरुं शर्मकारणम् ।
सा पूतिका व्रतोपेता विनयानतमस्तका[1] ।।66।।

गच्छंतीभिर्जिनाचार्थमार्यिकाभिः समं मुदा ।
ग्रामान्तरं तदा गत्वा पालयंती व्रतानि च ।।67।।

कुर्वंती प्रासुकाहारं तासामाधारतः सुखम् ।
वंदंती श्रीजिनं देवं देववृंदैः समर्चितम् ।।68।।

एवं कालं सुखं नीत्वा चैकदा कस्यचिद्गिरेः ।
गुहायां सुस्थिता चारुव्रतशीलोपवासिनी ।।69।।

कयापि तत्र पूर्वोरुजन्मसख्या प्रशंसिता ।
प्रांते सन्यस्य संजाता साच्युतेंद्रस्य[1] वल्लभाः ।।70।।

पल्यानां पंचपंचाशत् प्रमाणं सुखमुत्तमम् ।
तत्र भुक्त्व ततस्तस्मात् समागत्य महीतलम् ।।71।।

विदर्भविषये रम्ये कुंडलाख्यपुरे शुभे ।
वासवस्य महीभर्त्तुः श्रीमत्याश्च सुताभवः ।।72।।

रुक्मिणीति भुवि विख्याता त्वं स्वपुण्योदयात् शुभे ।
सारसौभाग्यसंपन्ना गुणरुपविराजिता ।।73।।

अथास्ति तोमलाख्यायां नगर्यां भेषजो नृपः ।
तस्य भेषजराजस्य मद्रीराज्ञी गुणोज्वला ।।74।।

1.नतमस्तिका इति अ-स प्रतयोः

2.साच्युतेन्द्र इति अ प्रतौ

तयोस्त्रिनेत्रसंयुक्तः शिशुपालः सुतोऽभवत् ।
तत् तृतीयं समालोक्य भालस्थं नयनं तदा ॥75॥

महाश्चर्यं समासाद्य भेषजाख्येन भूभुजा ।
किमेतस्य फलं ब्रूहि पृष्टो नैमित्तको जगौ ॥76॥

यस्य दर्शनमात्रेण तृतीयं नयनं शिशोः ।
विनाशं यास्यति व्यक्तं तेनायं सिंह निष्पते ॥77॥

तथैकदा नृपः सोपि मद्रीपुत्रादिभिर्युतः ।
पुरीं द्वारवतीं प्राप्तो वासुदेवं समीक्षितुम् ॥78॥

तत्र श्रीवासुदेवस्य दर्शनादेव तस्य च ।
शिशुपालस्य भालस्थमगान्नेत्रमदृश्यताम्[1] ॥79॥

तदा मद्री च तं नत्वा हरिं भय समाकुला ।
देहि भो भूपते मह्यं पुत्रभिक्षां जगाविति ॥80॥

त्रिखंडाधिपतिः प्राह भो मातस्ते सुतस्य च ।
शतापराधपर्यंतं मच्छकासाद्भयं नहि ॥81॥

ततो हरेः समासाद्य पुत्ररक्षावरं मुदा ।
सर्वे भेषजभूपाद्याः स्वपुरीं प्रागमन् सुखम् ॥82॥

तत्रासौ शिशुपालस्य शिशुत्वेपि प्रतापवान् ।
जित्वा शत्रुनृपान् सर्वान् संजातो बलवान् भृशम् ॥83॥

तथा तृष्णातुरः सोपि शिशुपालो दुराशयः ।
हरिं जित्वापि सर्वेषां स्वयं स्वामी भवाम्यहम् ॥84॥

इति स्वगर्वसंपन्नः पापतः स बभूव च ।
यथा क्षयक्षणे दीपः स्वशिखां वर्द्धयेद्भुविः ॥85॥

1.मृगान्नित्रम् इति ब प्रतौ

एवं काले प्रयात्युच्चैः कदाचित्तेपि ता सुते ।
त्वां दातुं शिशुपालाय वासवाख्यः कृतोद्यमः ।।86।।

तदा तत्सर्वमाकर्ण्य नारदः कलहप्रियः ।
कृष्णं प्रतिसमागत्य संजगाद प्रभो श्रुणु ।।87।।

विदर्भविषये राजा वासवः कुंडले पुरे ।
श्रीमती कामिनी तस्य तयोः पुत्री च रुक्मिणी ।।88।।

सर्वलक्षणसंपूर्णा रूपसौभाग्यशालिनी ।
किमालापैः परैर्देव सा कन्या वा सुरांगना ।।89।।

योग्यातवैव भो नाथ ना परस्य कदाचन ।
चूडारत्नं शिरोदेशे शोभते न पुनः पदे ।।90।।

सा कन्या दीयते तेन बुद्धिहीनेन भूभुजा ।
शठाय शिशुपालाय किमकार्यमतः परम् ।।91।।

मुक्ताफलमहामाला तेजसा द्योतिताखिला ।
वानरस्य गले देव क्षिप्यते किं बुधैर्जनैः ।।92।।

इत्यादि नारदेनोक्तं महाकलहकारिणा ।
श्रुत्वा नारायणः सोयं प्रज्वलन् कोपवह्निना ।।93।।

षडंगसैन्यसंयुक्तो गत्वा तत्र त्रिखंडराट् ।
शतापराधिनं शत्रुं शिशुपालं मदोद्धतम् ।।94।।

हत्वा त्वां च समानीय पट्टराज्ञी चकार च ।
महोत्सवेन भो पुत्री परमानंदनिर्भरः ।।95।।

इत्थं मत्वा मुनीन्द्राणां भो सुते गुणशालिनाम् ।
रत्नत्रयपवित्राणां कार्ये नैव जुगुप्सनम्[1] ।।96।।

1.जगुप्सुनम् इति द प्रतौ, जगप्सुनम् इति ब प्रतौ

इति श्रीवीरदत्ताख्यगणीन्द्र वचनं शुभम्।
श्रुत्वा सा रुक्मिणी राज्ञी संतोषं परमं ययौ।।97।।

अथ प्रणम्य योगीन्द्र तमेव भुवनोत्तमम् ।
हरेः प्रिया तृतीया च सती जांबवती जगौ ।।98।।

भो स्वामिन्मे पुराजन्म वृत्तं त्वं वक्तुमर्हसि ।
तन्निशम्य गुरुः प्राह जंबूद्वीपे मनोहरे ।।99।।

मेरोः पूर्वविदेहे च सुदेशः पुष्कलावती ।
वीतशोकपुरे तत्र संजातो दमको वणिक् ।।100।।

धनैर्द्धान्यैर्जनैर्युक्तः पूर्वपुण्यप्रसादतः ।
भार्या देवमतिस्तस्य तत्पुत्री देविलाऽभवत् ।।101।।

सा दत्ता वसुमित्राय कस्मैचित्तदनंतरम् ।
कर्मणा विधवा भूत्वा निर्विण्णा भोगदेहतः ।।102।।

जिनदेवं मुनिं नत्वा तपो लात्वा विधाय च ।
मृत्वा प्रांते महामेरोः पवित्रे नंदने वने ।।103।।

संजाता व्यंतरी देवी रूपलावण्यमंडिता ।
भुक्त्वा चतुरशीत्युक्तसहस्राब्दायुरुज्वलम् ।।104।

विषये पुष्कलावत्यां पुरे विजयसंज्ञके ।
मधुषेणस्य वैश्यस्य बंधुमत्यां सुताजनिः[1] ।।105।।

नाम्ना बंधुयशा साररूपादिगुणमंडिता।
जिनदेव भुवासार्द्धं स्वसख्या जिनदत्तया ।।106।।

प्रोषधादितपः कृत्वा सन्यासेन गतासुका ।
सौधर्मेऽभूत्कुबेरस्य प्रिया तस्मादपि च्युता ।।107।।

1.मत्यांजनिः इति ब-द प्रतयोः

सा पूर्व्यां पुंडरीकिण्यां वज्रनामा वणिग्वरः ।
स्त्रियां तस्य सुभद्रायां सुमतिः पुत्रिकाऽभवत् ॥108॥

सा कदाचिद् गृहं प्राप्तां भिक्षार्थं सुव्रतार्यिकाम् ।
प्रतिगृह्य महाभक्त्या पादप्रक्षालनादिकैः ॥109॥

दत्वा तस्यै शुभाहारं सारसौख्यविधायकम् ।
रत्नावलीमुपोष्योच्चैस्ततो मृत्वा स्वपुण्यतः ॥110॥

ब्रह्मलोके तथा भूत्वा देवी भुक्त्वा[1] महासुखम् ।
अत्रैव विजयार्द्धाद्रेरुत्तरश्रेणिसुस्थिते ॥111॥

जांबवाख्ये पुरे रम्ये जांबवाख्यखगेशिनः ।
जंबूषेण महादेवी तस्यां जांबवती सुता ॥112॥

त्वं जातासि महारूपसारसौभाग्यसंयुता ।
तदा पवनवेगस्य महाविद्याधरेशिनः ॥113॥

श्यामलायाः सुतो जातो नम्याख्यो मैथुनस्तव ।
त्वदर्थं सोन्यदा स्थित्वा ज्योतिर्नामवनांतरे ॥114॥

स प्राह पितरं ते च[2] भो मामश्रूयतां वचः ।
देया जांबवती मह्यं नोचेद्दाहात्य वेगतः ॥115॥

ग्रहीष्यामीति तच्छ्रुत्वा पिता ते जांबवः क्रुधा ।
खादितुं प्रेषयामास विद्यां माक्षिकसंज्ञिकाम् ॥116॥

तदा तस्य कुमारस्य नमेर्मातुलकः परः ।
किं नराख्यपुराधीशो यक्षमाली खगेश्वरः ॥117॥

समागत्य नमेस्तस्य महास्नेहेन वत्सलः ।
तत्साहाय्यं तदा कुर्वन् सर्वविद्याछिदाद्रुतम् ॥118॥

1.भुक्ता इति अ-स प्रतयोः
2.पितरं तेवै इति ब प्रतौ

स्वविद्यया छिनत्ति स्म तां विद्यां मक्षिकां तदा।
तन्निशम्य समायातो भ्राता ते जांबवात्मजः ॥119॥

नाम्ना जंबुकुमारस्तु गर्जन् वा सागरस्तराम्।
छेदयामास तस्यापि विद्यां तां यक्षमालिनः ॥120॥

मानभंगं तदा प्राप्य खगेशो यक्षमालिकः।
भीत्वा क्वापि गतः शीघ्रं भास्कराद्वातमश्चयः ॥121॥

तत्रापि नारदो मत्वा तत् सर्वं कलहप्रियः।
आगत्य माधवं प्राह तव रूपं मनोहरम् ॥122॥

श्रुणु त्वं भो धराधीश दामोदर मयोदितम्।
जंबवाख्यखगेंद्रस्य जंबुषेणा समुद्भवा ॥123॥

सुता जांबवती पूता निर्जिताखिलदेवता।
रूपेण परमानंददायिनी तव योग्यका ॥124॥

तत्समाकर्ण्य कृष्णोपि त्वदासक्तो बभूव च।
गत्वा भूरि बलोपेतो विजयार्द्धांतिके स्थितः ॥125॥

जंबुवाख्यं खगाधीशं मत्वा दुःसाध्यमुत्कटः।
सोपवासस्तदा रात्रौ दर्भशय्यां समाश्रितः ॥126॥

तत्र रात्रौ हरेर्यस्तु बांधवः पूर्वजन्मनि[1]।
यक्षलाख्यपवित्रात्मा सानुकंप द्वितीयवाक् ॥127॥

कृत्वा तपो जिनैः प्रोक्तं स्वर्गमोक्षैकसाधनम्।
महाशुक्रे सुरो जातो महाविभवसंयुतः ॥128॥

पूर्वस्नेहेन चागत्य विद्यासाधनसद्विधिम्।
दत्वा कृष्णाय संतोषात् स्वस्थानं वेगतो गतः ॥129॥

---

1. सर्वजन्मनि इति अ प्रतौ

नारायणोपि संतुष्टो विधिना तेन च स्वयं।
मंत्रेण संविधायाशु क्षीरसागरमुत्तमम् ॥130॥

तत्राहि शयने स्थित्वा धीरो मास चतुष्टयम्।
सिंहादिवाहिनीं विद्यां परां गरुड़वाहिनीम् ॥131॥

द्वे विद्ये साधयामास कंसारिः कार्य कोटिदे।
ते द्वे विद्ये समारुह्य क्रमाद्वलिहरी प्रभू ॥132॥

गत्वा तत्र रणे युद्धा विजित्वा जांबुवं नृपम्।
त्वां समानीय सद्भूत्या कृष्णोयं परमादरात् ॥133॥

महादेवी पदे युक्त्या योजयामास भो सुते।
पूर्वपुण्येन जंतूनां किं न स्यादिह भूतले ॥134॥

तत्सर्वं मुनिनाथोक्तं साक्षाद्दृष्टमिव स्फुटम्।
श्रुत्वा जांबवती तुष्टा भक्तितस्तं न नाम सा ॥135॥

अथ श्रीवरदत्ताख्यं तं प्रणम्य गणाधिपम्।
पृच्छति स्म सुसीमाख्या देवी स्वभवविस्तरम्[1] ॥136॥

देवसेना तयोः पुत्री यक्षदेवी बभूव सा।
कदाचिद गृहमायातं धर्मसेनं मुनीश्वरम् ॥143॥

मासोपवासिनं भक्त्या प्रतिगृह्य सुयुक्तितः।
तस्मै दत्वा शुभाहारं यक्षदेवी सुखप्रदम् ॥144॥

तदा स प्राह योगीन्द्रो भव्यानुग्रहतत्परः।
पूर्वस्मिन् धातकीखंडे तन्मेरोः पूर्वदिग्गते ॥137॥

सुदेशे मंगलावत्यां रत्नसंचयसत्पुरम्।
विश्वदेवः प्रभुस्तत्र[2] तस्य देवी त्वनुंधरी ॥138॥

1.विस्तरामं इति स प्रतौ
2.प्रभुस्तस्य इति स प्रतौ

अयोध्यापतिना सार्द्धं युद्धे तस्मिन् महीपतौ ।
विश्वदेवे मृते शोकान्महामोहाग्रहा हताः ॥139॥

अनुंधरी निषिद्धापि मंत्रवर्गैरनेकशः।
प्रविश्य पावकं कष्टं मृत्वा तत्र च मूढधीः ॥140॥

विजयार्द्धगिरौ जाता व्यंतरी निजकर्मणा।
दशवर्षसहस्राणि जीवितत्वा सा पुनर्मता ॥141॥

अस्मिन् जंबूमतिद्वीपे भरते सुमनोहरे ।
शालिग्रामे तदा यक्षगृहिणो गृहमंडिनी ॥142॥

पुनः प्रणम्य तं भक्त्या गुरूसारगुणैर्गुरुम् ।
समादाय व्रतं किंचिन्महाशर्मशतप्रदम् ॥145॥

सैकदा च वने रंतुं गता तत्र स्वकर्मणा ।
नष्टा मेघभयाच्छ्रीघ्रं प्रविष्टा च गुहां गिरेः ॥146॥

तत्रापि पापिनां कष्टं भक्षिता जगरेण च ।
महासर्पेण संत्यक्ता दशप्राणान् प्रवेगतः ॥147॥

हरिवर्षं समासाद्य क्षेत्रं तद्दानपुण्यतः ।
भुक्त्वा मध्यमभोगादि भूभोगान् सुमनोहरान् ॥148॥

भोगभूमिं ततो मुक्त्वा भूत्वा भवनवासिनाम् ।
लोके नागकुमारस्य देवी नागी ततश्च्युता ॥149॥

जंबूद्वीपे महामेरोः पूर्वभागे मनोहरे ।
देशे च पुष्कलावत्यां निवेसे सारसंपदाम ॥150॥

नगर्यां पुंडरीकिण्याशोकाख्यस्य भूपतेः ।
सोमश्रियः स्त्रियो भूत्वा श्रीकांतानामतः सुता ॥151॥

सा कदाचित् सती नत्वा जिनदत्तार्यिकांतिके ।
दीक्षामादाय वैराग्यादापोष्पकनकावलीम्[1] ॥152॥

1.वैराग्यादुपोष्पकनकावलीं इति ब प्रतौ

तपस्यंती ततः प्रांते संन्यासविधिपूर्वकम् ।
मृत्वा माहेन्द्रकल्पेऽभूत्सादेवी रूपमंडिता ॥153॥

समासाद्य महाभोगान् स्वर्गे पंचेन्द्रियोचितान् ।
तस्मादागत्य पुण्येन भारतेस्मिन् मनोहरे ॥154॥

सुराष्ट्रवर्द्धनाख्यस्य भूपतेर्गुणशालिनः ।
ज्येष्ठायां त्वं सुता जाता सुसीमाख्या गुणोज्वला ॥155॥

भूत्वा विष्णोर्महादेवी शोभसे संपदान्विता ।
जिनधर्मप्रसादेन सर्वसंप्राप्यते सुते ॥156॥

इत्याकर्ण्य गुरोर्वाक्यं परमानंददायकम् ।
सा सुसीमा हरेर्भामा संतुष्टामानसे सती ॥157॥

अथ प्रणम्य तं भक्त्या गुरुं गंभीरमानसम् ।
अपृच्छत् स्वभवश्रेणिं लक्ष्मणा माधवप्रिया ॥158॥

कारुण्यैकरसः सोपि संजगाद गणाधिपः ।
जंबूद्वीपस्य पूर्वस्मिन् विदेहे विषयो महान् ॥159॥

पुष्कलादिवती तत्र जातोरिष्टपुरे प्रभुः ।
वासवाख्यः प्रिया तस्य नाम्ना वसुमती सती ॥160॥

तयोः पुत्रश्च संजातः सुषेणाख्यो गुणैर्युतः ।
केनचित् कारणेनोच्चैर्वासवो भूपतिस्तदा ॥161॥

मुनेः सागरसेनस्य पादमूले जगद्धिते ।
दीक्षामादाय पूतात्मा मुनिर्जातो विचक्षणः ॥162॥

सत्यं संसारभीरुणां भव्यानां गुणशालिनाम् ।
संपदा त्यजने किं वा कारणं न महीतले ॥163॥

तत्प्रिया वसुमत्याख्या[1] पुत्रस्नेहेन मंदधीः ।
स्थित्वा गृहे दुराचारं कुर्वंती पापकर्मणाम् ॥164॥

1.वसुमत्या इति द प्रतौ

मृत्वा सा कानने घोरे भिल्ली जाता कदाचन ।
नंदिवर्धननामानं मुनींद्रं जितमन्मथम् ॥ 165॥

सा भिल्ली भावतो नत्वा चारणं तं जगद्धितम् ।
श्रावकाणां व्रतान्याशु समादाय पुनर्मृता ॥ 166॥

संबभूवाष्टमे स्वर्गे देवेंद्रस्यापि नर्त्तकी ।
रूपसौभाग्यसंपन्ना देवानां मोहनौषधीः ॥167॥

ततः स्वर्गात् समागत्य प्रांते चास्मिन् खगाचले ।
खगेंद्रो दक्षिणे श्रेण्यां सिद्धे चंद्रपुरे महान् ॥168॥

महेंद्राख्यः प्रिया तस्य स्वनाम्नानुंधरी सती ।
तयोः कनकमालाख्या सा पुत्री समजायत ॥ 169॥

सिद्धविद्या कदाचित् सा समारब्धस्वयंवरे ।
स्वीचक्रे मालयां प्रीत्या कुमारं हरिवाहनम् ॥170॥

एकदा भक्तितो गत्वा सती कनकमालिका ।
जिनेन्द्रभवनोपेतं सिद्धकूटं मनोहरम् ॥171॥

तत्र नत्वा मुनिं भक्त्या नाम्ना यमधरं शुभम् ।
तत्समीपे समाकर्ण्य स्वभवांतरसंचयम् ॥172॥

मुक्तावलीमुपोष्योच्चैस्ततो मृत्वा स्वपुण्यतः ।
सनत्कुमारदेवेन्द्रप्रिया सा संबभूव च ॥173॥

नवपल्यायुषा युक्ता सुखं भुक्त्वा मनोहरं ।
भारतेऽत्र समागत्य सुप्रकारपुरेशिनः ॥174॥

संवराख्यस्य ह्रीमत्यां स्त्रियां जातासि लक्ष्मणा ।
पुत्री लक्षणसंयुक्ता पूर्वपुण्येन शोभिता ॥175॥

द्वयोः कनीयसी भ्रात्रोः श्रीपद्मध्रुवसेनयोः ।
भगिनी त्वं गुणैर्ज्येष्ठा जिनेंद्रवचने रता ॥176॥[1]

1.अप्रतौ अनुपलब्धः

खगः पवनवेगाख्यः कोप्यागत्य हरिं प्रति ।
वर्णयामास ते रूपं शोभां च भुवनोत्तमम् ॥177॥

कृष्णेन प्रेषितः सोपि त्वां समानीय युक्तितः ।
ददौ दामोदरायोच्चैर्विभूत्यासौ च माधवः ॥178॥

योजयामास तं प्रीत्या पट्टदेवी पदे शुभे ।
त्वां भो देवि स्वपुण्येन किं न स्यादिह भूतले ॥179॥

सा लक्ष्मणेति संश्रुत्वा परमानंदनिर्भरा ।
भक्त्या तस्य गणींद्रस्य न नाम चरणद्वयम् ॥180॥

अथ प्रणम्य तं भक्त्या वरदत्तं गणाधिपम् ।
वासुदेवस्ततः प्राह भो प्रभो गणनायकम् ॥181॥

गांधारीगौरीपद्मावतीनां जन्मान्तरावलीः ।
ब्रूहि भो करुणासिंधो विशुद्धगुणमंदिरम् ॥182॥

सोपि तत्प्रश्नतः स्वामी संजगाद पुरा किल ।
गांधारी पूर्वजन्मेदं जंबूद्वीपेऽत्र विश्रुते ॥183॥

सुकोशलो महादेशः संभृतः सर्वसंपदा ।
तत्रायोध्यापते रुद्रनाम्नो राज्ञी गुणोज्वला ॥184॥

विनयश्रीः सुविख्याता दानपूजा सुतत्परा ।
सिद्धार्थाख्यवने रम्ये सैकदा पुण्ययोगतः ॥185॥

बुद्धार्थमुनये भक्त्या दत्वा हारं मनोहरम् ।
मृत्वा तद्दानपुण्येन प्राप्तोत्तरकुरुक्षितिम् ॥186॥

तत्र भोगांश्चिरं भुक्त्वा तस्माच्चंद्रस्य भामिनी ।
ज्योतिर्लोके[1] समुत्पन्ना नाम्ना चंद्रवतीति सा ॥187॥

1.जोतिर्लोके इति ब प्रतौ

ततो जंबूमति द्वीपे निश्चले च खगाचले।
दक्षिणश्रेणी संस्थोरु[1] पुरे गगनवल्लभे ॥188॥

विद्युद्वेगः खगाधीशो विद्युद्वेगापि तत्प्रिया।
समागत्य तयोः पुत्री सरुपानामतो भवत् ॥189॥

नित्यालोकपुरेशाय विद्याविक्रमशालिने।
महेंद्रविक्रमाख्याय दत्ता सा युक्तितस्तदा ॥190॥

एकदा तौ जिनेंद्राणां मेरुचैत्यालयेषु च।
पूजार्थं भक्तितो गत्वा नत्वोच्चैश्चारणं मुनिम् ॥191॥

पवित्रं श्री विनीताख्यं धर्मं श्रुत्वा जिनोदितम्।
महेन्द्रविक्रमो जातस्तदंते स मुनिस्तदा ॥192॥

सुरूपा तत्प्रियां सा च सुभद्राख्यार्यिकांतिके।
गृहीत्वा संयमं चारुः तपः कृत्वायुषः क्षये ॥193॥

सन्यासेन समुत्पद्य स्वर्गे सौधर्मसंज्ञके।
एकपल्योपमायुष्का देवी भुक्त्वा सुखं ततः ॥194॥

तस्मादागत्य कालांते पवित्रेऽत्रैव भारते।
गंधारविषये पुष्कलावती नगरे शुभे ॥195॥

प्रभोरिंद्रगिरेर्नाम्ना मेरुमत्याः स्त्रियः सुता।
गांधारी नाम संजाता सारसौभाग्यमंडिता ॥196॥

कस्मैचिन्मैथुनायोच्चैः दीयमानेंद्रभूभृता।
यदा तदा समागत्य नारदस्त्वां हरे जगौ ॥197॥

त्वयापि वचनं श्रुत्वा नारदस्य तदा क्षणे।
समासक्तेन सैन्येन गत्वा तत्र रणांगणे ॥198॥

1.संस्थितेरु इति ब प्रतौ

प्रभोरिंद्रगिरेः कृत्वा मानभंगं महीपतेः ।
एषा चानीय गांधारी पट्टदेवी कृता मुदा ॥199॥

अथ गौरी पुरावृत्तं श्रृणुत्वं भो महीप्रभोः[1] ।
अत्र द्वीपे सुविख्याते पुरं नगपुरं महत् ॥200॥

सैकदा चारणं वीक्ष्य यशोधरमहामुनिम् ।
स्मृत्वा पूर्वभवं भर्त्रा पृष्टाच्चैवं जगौ किल ॥201॥

धातकीखंडमध्यस्थपूर्वमेरोश्च पश्चिमे ।
विदेहे विपुलेशोकपुरं तत्र महावणिक् ॥202॥

आनंदाख्यः प्रिया तस्य नाम्ना नंदयशाः सुधीः ।
अमितादिसागराय मुनींद्राय सुभक्तितः ॥203॥

सुपुण्यैर्नवभिः प्रीत्या दत्वा हारं सुखप्रदम् ।
पंचाश्चर्यं समासाद्य सा साध्वी निजपुण्यतः ॥204॥

जीवितां ते महासौख्यं संप्राप्योदक्कुरुस्थलम् ।
ततो भवनवासींद्रभार्या भूत्वा ततश्च्युता ॥205॥

केदाराख्यपुराधीशः पुत्री जाता यशस्वती ।
पूर्वपुण्येन संयुक्ता पित्रा दत्ता सुयुक्तितः ॥206॥

भो हेमाभ प्रभो तेऽहं संजातास्मि मनःप्रिया ।
इति प्रभोः प्रियावाक्यं श्रुत्वा संतोषमापसः ॥207॥

ततो यशस्वती स्वापि राज्ञी राजीवलोचना ।
मुनिं सागरदत्ताख्यं वने सिद्धार्थसंज्ञके ॥208॥

नत्वा तदुक्तिभिः कृत्वा सोपवासादिकं तपः ।
मृत्वा सौधर्मकल्पेऽभूद्देवी सारसुखान्विता ॥209॥

1.हरीप्रभोः इति अ-ब प्रतयोः

द्वीपेस्मिन्नैव कौशांब्यां नगर्यां सुमतिर्महान् ।
श्रेष्ठी तस्य सुभद्रायां स्वर्गादागत्य सा सुरी ॥210॥

धार्मिकीति सुता जाता धर्मकर्मणि तत्परा ।
सा पुनर्जिनमत्याख्यां क्षांतिकां संप्रणम्य च ॥211॥

गृहीत्वा जिनगुणादिसंपत्तिं संविधाय च ।
महाशुक्रे सुरी भूत्वा सुखं भुक्त्वा समागता ॥212॥

अत्रैव भरते क्षेत्रे वीतशोकपुरेशिनः ।
स्वनाम्ना मेरुचंद्रस्य चंद्रवत्यां सुताऽभवत् ॥213॥

गौरीति नाम विख्याता रूपादिगुणमंडिता ।
विजयाख्यपुराधीशः प्रभुर्विजयनंदनः ॥214॥

सभक्तस्तुभ्यमानीय ददावेतां महोत्सवैः ।
त्वं च संयोजयामास पट्टदेवीपदे सुखम् ॥215॥

अथ प्रवक्ष्ये भो कृष्ण श्रृणुत्वं मद्वचः प्रभो ।
पद्मावती महादेवी भवसंबंधविस्तरम् ॥216॥

गणींद्रः संजागदे त्वमत्रैवोज्जयिनीपते ।
विजयाख्यभूपस्य देव्यासीदपराजिता ॥217॥

तयो र्द्वयोः सुता जाता विजयश्रीगुणोज्वलाः ।
सत्यशीलजलापूरः प्रक्षालितमनोमला ॥218॥

हस्तिशीर्षपुराधीशा हरिषेणेन धीमता
सा कुलाचारसंयुक्त्या परिणीता विभूतिभिः ॥219

सैकदा विजयश्रीश्च दत्वाहारतपश्विने ।
समाधिगुप्तमुनये विधिना भक्तिपूर्वकम् ॥220॥

भूत्वा हेमवते क्षेत्रे भुक्त्वा भोगान् मनःप्रियान् ।
मृत्वा तत्रापि चंद्रस्य संजाता रोहिणी प्रिया ॥221॥

पल्योपमायुषः प्रांते विषये मगधाभिधेः ।
शाल्मलिग्रामवास्तव्यकर्षकस्य धनेशिनः ॥222॥

नाम्ना विजयदेवस्य देविलायां सुता भवत् ।
सा रोहिणी समागत्य पद्मादेवीति विश्रुता ॥223॥

सा पुनर्वरधर्माख्यमुनींद्रचरणांबुजम् ।
नत्वा ज्ञात फलास्वादने व्रतं दृढ़मग्रहीत् ॥224।

एकदा शाल्मलिग्रामः पापिष्टैर्भिल्लकैर्हतः ।
सर्वे लोकाः प्रणम्याशु संययुः काननं घनम् ॥225॥

महाक्षुधा परिक्रांताः प्राणसंदेहमाश्रिताः ।
विषवल्ली फलान्युच्चै र्भक्षयित्वा क्षयं गताः ॥226॥

पद्मादेवी च सा तत्र सती तद् व्रत संयुता ।
अभुक्त्वा तानि क्षुद्बाधा पीडितापि मृतिं ययौ ॥227॥

सत्यं येऽत्र महाधीराः स्वव्रते दृढमानसः ॥
प्राण त्यागेपि ते भव्याः नैवमुंचंति स्वव्रतम् ॥228॥

सा तु हैमवतक्षेत्रं गत्वा पल्योपमं सुखम् ।
जघन्यभोगभूत्पन्नं प्राप्य तस्मात् समागता ॥229॥

द्वीपे स्वयंप्रभे भूत्वा देवी नाम्ना स्वयंप्रभा ।
स्वयंप्रभाख्यदेवस्य रूपसौभाग्यमंडिता ॥230॥

जंबूद्वीपेऽत्र विख्याते क्षेत्रे भरतसंज्ञके ।
जयंतपुरनाथस्य श्रीधरस्य स्त्रियां ततः ॥231॥

श्रीमत्यां सा समागत्य विमलश्रीः सुताजनि।
भद्रिलाख्यपुराधीशो मेघनादस्य कामिनी ॥232॥

विमलश्रीरभूत् साच सारभोगादि संयुता ।
एकदा स महीनाथो मेघनादो विशुद्धधीः ॥233॥

नाम्ना धर्ममुनेः पार्श्वे श्रुत्वा धर्मजिनोदितम् ।
त्रिधा वैराग्यसंपन्नो राज्यं त्यक्त्वा तृणं यथा ।।234।।

मुनिर्भूत्वा तपः कृत्वा मृत्वा संयाससंयुतः ।
सहस्रारपति[1] र्जातः स्वपुण्येन महर्द्धिकः ।।235।।

विमलश्रीर्भामिनी सा पद्मावत्याभिधानिकाम् ।
आर्यिकां भक्तितो नत्वा समादाय च संयमम् ।।236।।

आचाम्ल वर्धमानाख्यं तपस्तप्त्वा सुदुःसहम् ।
तत्र स्वर्गे महादेवी जाता तस्यैव नाकिनः ।।237।।

दीर्घकालं सुखं प्राप्य तस्मादागत्य पुण्यतः ।
अत्रारिष्टपुरेशस्य भूपतेर्हरिवर्मणः ।।238।।

श्रीमत्यां सा सुरी जाता ख्याता पद्मावती सुता ।
सारसौभाग्यसंदोहगुणरत्नविराजिता[2] ।।239।।

स्वयंवरे महारत्नमालया चैतया मुदा ।
त्वं त्रिखंडपतिश्चापि पद्मावत्या वशीकृतः ।।240।।

त्वयापि भो हरे पट्टदेवी संविहितादरात् ।
एषा पद्मावती पूता जिनभक्तिपरायणा ।।241।।

इति श्रीवरदत्ताख्यगणींद्रमुखपंकजात् ।
श्रुत्वा कांताकृताचारान् संतुष्टः सहरिस्तराम् ।।242।।

तास्तिस्रोपि स्वजन्मनि संश्रुत्वा मुनिपुंगवात् ।
संतुष्टा मानसे गाढ़ं तं नमंति स्म भक्तितः ।।243।।

1.सहश्रारपति इति अ-द प्रतयोः
2. गुणरूपविराजिता इति ब प्रतौ

तथा सर्वेपि ते भव्या मुनींद्रवचनामृतम् ।
पीत्वा श्रीमज्जिनेंद्रोक्तं सद्धर्मभक्तितो भजन् ॥244॥

यत्र श्रीमद्गणाधीशः संज्ञानगुणलोचनः ।
स्वयं वक्ता कृपासिंधुस्तत्र को वा न धार्मिकः ॥245॥

सद्देवेन्द्रनरेन्द्रचन्द्रनिकरे नागेन्द्रसत्खेचरैः
र्भक्त्या योत्र समर्चितो गुणनिधिस्त्रैलोक्यचूड़ामणिः ।
भव्यानां भवसागरैकतरणे पोताय मानोदृढः
स श्रीनेमिजिनेश्वरो भवतु वो लोकद्वये शर्मदः ॥246॥

इति त्रिभुवनैकचूड़ामणिः श्रीनेमिजिनपुराणे भट्टारकश्रीमल्लिभूषणशिष्यः कृष्णमहादेवीनां भवांतरव्यावर्णनो नाम चतुर्दशोधिकारः ॥ 14॥

पञ्चदशोऽधिकारः

अथ प्रणम्य तं भक्त्या गणीन्द्रं भुवनोत्तमम् ।
प्रद्युम्नशम्भवोत्पत्तिं भवान्तरं सुविस्तरम् ॥1॥

पद्मनामा बलोऽपृच्छत् सभायां त्रिजगद्गुरोः ।
सम्प्रकाशयितुं भव्यमानसेषु गुणांस्तयोः ॥2॥

तन्निशम्य गणाधीशो वरदत्तो जगद्धितः ।
सञ्जगादत्र भो राजन्! संसारे सरतां नृणाम् ॥3॥

मिथ्या पापोदयेनोच्चैः निर्ययुर्जन्मकोटयः ।
किं ताभिश्च महादुखदायिनीभिर्निरन्तरम् ॥4॥

किन्तु श्रीमज्जिनेन्द्रोक्तं धर्मप्राप्तेः पवित्रितम् ।
यज्जन्म तत्तयोर्वक्ष्ये श्रृणु त्वं भो सुधीर्बलः! ॥5॥

अस्मिन् जम्बूमति द्वीपे क्षेत्रे भरतनामके ।
जिनप्रणीतसद्धर्मे देशे मगधसंज्ञके ॥6॥

शालिग्रामे द्विजो जातः सोमदेवाभिधानकः।
अग्निला ब्राह्मणी तस्य तयोः पुत्रौ बभूवतुः ॥7॥

अग्निभूतिस्तथा वायुभूतिस्तौ वेदकोविदौ ।
मिथ्याशास्त्ररतौ विप्रकुलोत्पत्तिमदोद्धतौ ॥8॥

एकदा तौ पुरे नन्दिवर्धनाख्ये निजेच्छया ।
तद्वने नन्दिघोषाख्ये मुनींद्र नन्दिवर्धनम् ॥9॥

मुनिसंघसमायुक्तं पवित्रीकृतभूतलम् ।
दुष्टौ विलोक्य दुर्वाक्यमूचतुः पापपण्डितौ ॥10॥

सत्यं ये दुर्जनालोके साधून् संवीक्ष्य निर्मलान् ।
ते कुप्यन्ति दुराचाराश्चन्द्रं वा भषणा भुवि ॥11॥

आगच्छन्तौ समालोक्य तौ गुरुर्नन्दिवर्धनः ।
ज्ञात्वा दुष्टाशयौ गाढं स्वसंघं प्रत्यभाषत ॥12॥

भवद्भिर्नैव केनापि समं वक्तव्यमित्यहो ।
साम्प्रतं चान्यथा बाधा मुनिसंघे भविष्यति ॥13॥

इति श्रुत्वा गुरोर्वाक्यं तथ्यं पथ्यं सुखप्रदम् ।
सर्वे ते मुनयो मौनं सुस्थिताः ध्यानतत्पराः ॥14॥

ततस्तौ तान्मुनीन् वीक्ष्य निश्चलान्मेरुवत्तराम् ।
कृत्वा हास्यं प्रगच्छन्तौ स्वग्रामं विप्रपुत्रकौ ॥15॥

मार्गे सत्यकनामानं मुनिं दृष्ट्वा च निर्मदम् ।
आगछन्तं कृताहारं जैनं तत्वविदांवरम् ॥16॥

ज्ञानलेशमदाविष्टौ दुष्टौ तं चैवमूचतुः ।
रे रे नग्नतपोभग्न! कृत्वा यज्ञं पशून् बहून् ॥17॥

हत्वा वेदोदितं कर्म कृतं नैव त्वया क्वचित् ।
स्वर्गलोकः कथं ते स्यान्नानाभोगसुखप्रदः ॥18॥

तन्निशम्य मुनिः प्राह सत्यकाख्यो विचक्षणः ।
जिनेन्द्रवचनाम्भोधिवर्द्धनैकविधुस्तराम् ॥19॥

अहो विप्रात्मजौ मूढौ युष्माकं यज्ञके यदा ।
हत्वा पशूंस्तृणाहारानपराधविवर्जितान् ॥20॥

भक्षयित्वा पलं कष्टं पीत्वा मद्यं मलप्रदम् ।
प्राप्यते त्रिदशावासो नरकं केन गम्यते ॥21॥

पशूनां घातकः स्वर्गी युष्माकं चेन्मते मतः ।
ततो भिल्लादयो निन्द्याः स्वर्गतेऽपि प्रयान्ति च ॥22॥

किं व्रतैः किं जलस्नानैः किं कषायाम्बरैः परैः ।
एकादशी दिने कष्टादुपवासैस्तु किं वृथा ॥23॥

इत्यादिकं मुनेर्वाक्यं श्रुत्वा सर्वजनैस्तदा ।
प्रशंसितो मुनिर्गाढ़ं सत्यपक्षसमाश्रितैः[1] ॥24॥

मानभंगं समासाद्य तौ ततो द्विजसूनकौ ।
परेद्युर्बद्धवैरो च निशायां निशितायुधौ ॥25॥

महाक्रुद्धौ समागत्य निर्जने च वने घने ।
तं मुनिं प्रतिमायोगं सुस्थितं धीरमानसम् ॥26॥

विलोक्य सत्यकं हन्तुं शस्त्रेणैव दुराशयौ ।
समुद्यतौ तदा ज्ञात्वा स्वचिह्नेन प्रवेगतः ॥27॥

नाम्ना सुवर्णयक्षेण कीलितौ तौ तथैव च ।
अष्टांगेषु यथा कष्टं प्राणसन्देहमाश्रितौ ॥28॥

युक्तं साधुषु दुष्टात्मा पापी पीडाविधायकः ।
किं प्रयान्ति न संकष्टं भुवनत्रयनिन्दितम् ॥29॥

श्रुत्वा तत्पुत्रयोः कष्टं समागत्य तदा तयोः ।
पितरौ सोमदेवाख्यः साग्निला च भयाकुलौ ॥30॥

रक्षरक्षेति जल्पन्तौ मुनीनां शरणं गतौ ।
परिवारेण संयुक्तौ यक्षस्यापि कृताञ्जली ॥31॥

तदा सुवर्णयक्षस्तु तान् सर्वान्[2] सञ्जगाद[3] सः ।
हिंसाधर्मं परित्यज्य भवन्तो भो द्विजा! यदि ॥32॥

धर्मं श्रीमज्जिनैः प्रोक्तं दयासत्यादिलक्षणम् ।
करिष्यन्ति तदा पुत्रमोचनं स्यादिति ध्रुवम् ॥33॥

सोमदेवादयः सर्वे ततो भीत्वा च मायया ।
नत्वा मुनीन् जिनेन्द्रोक्तं सद्धर्मं श्रावकोचितम् ॥34॥

1.समाश्रितौ इति स प्रतौ
2.इति पदं अनुपलब्धौ ब प्रतौ
3.जगाद इति ब प्रतौ

समादाय ततः पुत्रमोचने च दुराशयः ।
पुत्रौ प्रति प्रतोषेण सञ्जगुर्भो सुतोत्तमौ! ॥35॥

अस्माभिः कारणं प्राप्य जैनो धर्मः समाश्रितः ।
इदानीं त्यजयतां शीघ्रं तन्निशम्य सुतौ च तौ ॥36॥

अग्निभूतिस्तथा वायुभूतिर्द्वौ काललप्यितः ।
प्रीत्या श्रावकसद्धर्माच्चलतु नैव पुण्यतः ॥37॥

ततः कारणतो मूढास्तीव्रा मिथ्यात्ववासिनः ।
तयोरूपरि संक्रुद्धा ते विप्राः कुगतीः श्रिताः ॥38॥

बान्धवौ तौ च सद्धर्मं निर्मलं श्रावकोचितम् ।
समाराध्य तदा प्रान्ते स्वर्गे सौधर्मसंज्ञके ॥39॥

देवौ पारिषदाख्यौ तौ भूत्वा धर्मप्रसादतः ।
पञ्चपल्योपमायुष्कं भुक्ता सौख्यं निरन्तरम् ॥40॥

तस्मादागत्य च द्वीपे जम्बूनामनि भारते ।
क्षेत्रेऽस्मिन् कौशले देशे साकेतनगरे वरे ॥41॥

अरिञ्जयो महाराजो धार्मिको जिनभक्तिभाक् ।
तत्रार्हद्दासनामा च श्रेष्ठी सद्धर्मवत्सलः ॥42॥

वप्रश्रीः श्रेष्ठिनी तस्यामग्निभूतिश्चरः सुरः ।
पूर्णभद्रः सुतो जातो मणिभद्रः परोऽभवत् ॥43॥

निश्चयव्यवहाराभ्यां सद्धर्मः शोभते यथा ।
तथार्हद्दास वाक् श्रेष्ठी पुत्राभ्यां शोभितस्तराम् ॥44॥

एकदा समाहारा योऽरिञ्जयाख्यो विचक्षणः।
सिद्धार्थवनमध्यस्थं महेन्द्राख्यं महामुनिं ॥45॥

अर्हद्दासादिभिः सार्धं गत्वा नत्वा सुभक्तितः ।
श्रुत्वा धर्मं मुनेस्तस्य पादमूले जगद्धिते ॥46॥

नाम्नारिन्दमपुत्राय राज्यं दत्वा विरक्तधीः ।
दीक्षां जैनेश्वरीं श्रित्वा मुनिर्जातो गुणोज्ज्वलः ।।47।।

अर्हद्दासोऽपि श्रेष्ठी परमेष्ठी प्रभक्तिमान् ।
तेनैव प्रभुणा सार्धं सम्बभूव मुनिस्तदा ।।48।।

तत् पुत्रः पूर्णभद्रो यो ज्येष्ठो नाम्ना गुणैर्युतः ।
तदा तं गुरुमानम्य पृच्छति स्म महामुनेः ।।49।।

पूर्वजन्मसमुत्पन्नौ माता मे च पिता प्रभो ।
तौ द्वौ कुत्राद्य वर्तेते स्वामिंस्तद्वक्तुमर्हसि ।।50।।

महेन्द्राख्यो गुरूः सोऽपि ज्ञानी सम्प्राह तं प्रति ।
श्रृणु त्वं भो महाभव्यः पूर्णभद्र गदाम्यहम् ।।51।।

पूर्वजन्मपिता ते वै सोमदेवो द्विजः क्रुधीः ।
श्रीमज्जिनेन्द्रचन्द्रोक्तसारधर्मपरान्मुखः ।।52।।

कृत्वा पापानि मृत्वा च कष्टे रत्नप्रभाबिले ।
सर्पावर्त्ताभिधाने स सञ्जातो नारकस्तदा ।।53।।

महादुखं चिरं प्राप्य तस्मान्निर्गत्य कष्टतः ।
मातंगः काकजंघोऽस्ति साम्प्रतं कुलगर्वतः ।।54।।

माताग्निला चरी सापि पापात्तस्यैव गेहके ।
कुर्कुरी काकजंघस्य चाण्डालस्य खरस्वरी[1] ।।55।।

अत्रैवेति समाकर्ण्य पूर्णभद्रेण तेन तु ।
गत्वा तत्रोपकारेण मृष्टवाक्यैश्च तौ तदा ।।56।।

सम्बोधितौ समासाद्य भावं चोपशमं शुभम् ।
प्रान्ते सन्यासमातंगः काकजंघोऽपि धर्मतः ।।57।।

---

1. खरस्वरा इति अ-द प्रतयोः

नन्दीश्वरमहाद्वीपे देवो जातो निधीश्वरः ।
तस्मात् श्रृण्वन्तु भो भव्याः! किं धर्मादपरं वरम् ।।58।।

तत्रैव नगरे रम्ये साकेते निजपुण्यतः ।
अरिन्दमाख्यभूपस्य श्रीमत्यां सा शुनी मृता ।।59।।

प्रबुद्धाख्या सुता जाता रूपसौभाग्यमण्डिता ।
एकदा यौवनारम्भे सा स्वयंवरमण्डपम् ।।60।।

गच्छन्ती तेन यक्षेण बोधिता सुतरां तदा ।
भो कन्ये! किं न जानासि पुरा त्वं पापकर्मणा ।।61।।

काकजंघस्य मे गेहे मातंगस्य श्रुती तदा ।
बोधिता पूर्णभद्रेण सञ्जातासि नृपात्मजा ।।62।।

साम्प्रतं किं प्रवृत्तासि त्वं विवाहे महाशुभे ।
इत्यादिकं समाकर्ण्य सा प्रबुद्धाख्यकन्यका ।।63।।

वैराग्येण समाश्रित्य क्षान्तिकां प्रियदर्शनाम् ।
दीक्षामादाय संकृत्वा तपः श्रीजिनभाषितम् ।।64।।

सौधर्माधिपतेर्देवी मणिचूलाभिधाभवत् ।
साररूपगुणोपेता तत्रस्वर्गे सुखंस्थिता ।।65।।

पूर्णभद्रः सुधीः सोऽपि मणिभद्रोऽपि निर्मदः ।
भ्रातरौ तौ समाराध्य श्रावकाचारमुत्तम् ।।66।।

तत्रैव प्रथमे कल्पे जातौ सामानिकौ सुरौ ।
द्विसागरोपमं सौख्यं प्राप्य तस्मादपि च्युतौ ।।67।।

द्वीपेऽस्मिन् भारते क्षेत्रे विषये कुरुजांगले ।
हस्तिनाख्यपुरेशस्य नाम्नार्हद्दासभूपतेः ।।68।।

काश्यपायाः[1] महादेव्यास्तौ द्वौ पुत्रौ बभुवतुः ।
मधुक्रीडावनामानौ[2] रूपं सम्पद्विराजितौ ।।69।।

1.कासपाया इति ब प्रतौ

2. मधुक्रीडाकनामानौ इति ब प्रतौ

कदाचिदर्हतां भक्तः सोर्हद्दासो महीपतिः ।
विमलप्रभयोगीन्द्रं सम्प्रणम्य सुखप्रदम् ॥70॥

श्रुत्वा धर्मं जिनैः प्रोक्तं स्वर्गं मोक्षप्रसाधनम् ।
स्वराज्यं युवराज्यं च पुत्रयोः स समर्प्य च ॥71॥

भीत्वा संसारदुखौघाद् दीक्षित्वा समभून्मुनिः ।
रत्नत्रयपवित्रात्मा सुधीः स्वपरतारकः ॥72॥

हस्तिनागपुरे तत्र कदाचित्कर्मयोगतः ।
विख्यातामलकण्ठाख्यः पुराधीशो महीपतिः ॥73॥

कनकादिरथोनाम्ना समायातो निजात्पुरात् ।
सेवितुं तं मधुं भूपसेवकः कामिनीयुतः ॥74॥

समूढो मधुराजोऽपि नाम्ना कनकमालिकाम् ।
तां विलोक्य महारूपं संयुक्तः कामपीडितः ॥75॥

स्वीचकार हठात् पापी हा कामो न्यायवर्जितः ।
येन पृथ्वीपतिश्चापि परस्त्रीलम्पटोऽभवत् ॥76॥

कनकादिरथः सोपि नृपः क्षुद्रोऽसमर्थकः ।
तदा शोकाकुलो मूढा मिथ्यातापस्समाश्रितः ॥77॥

द्विजटीसंज्ञया शीघ्रं तद्दीक्षां संगृहीतवान् ।
कृत्वा पञ्चाग्निकं कष्टं तपो मृत्वा ततोऽजनि ॥78॥

देवो ज्योतिर्गणे ख्याते धूमकेत्वभिधानकः ।
तद्योग्यसम्पदोपेतस्तत्र यावच्च सुस्थितः ॥79॥

मध्वाख्यो भूपतिः सोऽपि क्रीडावेन समन्वितः ।
एकदा भक्तितो नत्वा मुनिं विमलवाहनम् ॥80॥

श्रुत्वा धर्मं जिनेन्द्रोक्तं सत्कर्मादिदशप्रमम् ।
निन्दा स्वस्य दुराचारे कृत्वा वैराग्यमाश्रितः ॥81॥

राज्यलक्ष्मीं परित्यज्य बान्धवौ तौ गुणोज्वलौ ।
दीक्षालक्ष्मीं समादाय मोक्षलक्ष्मीविधायिनीम् ।।82।।

कृत्वा तपो महाघोरं दुखदावानलोपमम् ।
ज्ञात्वा तत्वव्रतं सत्यं प्रणीतं जिनपुंगवैः ।।83।।

आराधनां समाराध्य शल्यत्रयविवर्जितौ ।
प्रान्ते सन्यास्य सम्प्राप्तौ महाशुक्रे सुरेन्द्रताम् ।।84।।

सुखं तत्र चिरं भुक्त्वा कालान्ते ज्येष्टबान्धवः ।
पूर्वपुण्येन रुक्मिण्याः प्रद्युम्नः स सुतोऽभवत् ।।85।।

चरमांगधरो धीरः रूपसौभाग्यसंयुतः ।
कामदेवो दयामूर्तिर्बालो वा बालभास्करः ।।86।।

एवंविधः स्थितो यावन्मातुः पार्श्वेऽपि सौख्यतः ।
द्वितीये दिवसे गच्छन्नाकाशे स विमानकः ।।87।।

पूर्वोक्तधूमकेतुश्च ज्योतिर्देवो दुराशयः ।
बालकस्योपरि प्राप्ते विमाने कीलिते यथा ।।88।।

विमानं कीलितं केन वायुवेगं नभस्तले ।
विभंगज्ञानतो ज्ञात्वा ममायं शत्रुकः कुधीः ।।89।।

पूर्वजन्मनि मे पापी कनकादिरथस्य वै ।
स्त्री हर्त्तायं मयेदानीं हन्यते कष्टतो ध्रुवम् ।।90।।

इत्याध्याय पुरा वैरं वह्निना प्रज्वलन् भृशम् ।
निद्रां विधाय सर्वेषामंतःपुरनिवासिनाम् ।।91।।

तं नीत्वा बालकं शीघ्रं गत्वाकाशे सुदूरतः ।
महावृक्षशताकीर्णे वने खदिरनामनि ।।92।।

अधस्तात्तक्षकाख्यायाः शिलायाः पापकर्मकृत्।
क्षिप्त्वा खलः स्वयं शीघ्रं गतः क्वापि निजेच्छया ।।93।।

यः शत्रुर्निर्दयः पापी प्रस्तावं प्राप्य दुर्जनः ।
किं करोति न स कष्टं परेषां दुखराशिदम् ॥94॥

तदैव विजयार्द्धस्य दक्षिणश्रेणिसुस्थिते ।
सुदेशे मृगवत्याख्यो मेघकूटपुरे प्रभुः ॥95॥

विद्याधराधिपः प्रौढ़ः कालसंवरनामभाक् ।
महाविमानमारूढो युक्तः काञ्चनमालया ॥96॥

श्रीमज्जिनेन्द्रचन्द्राणां प्रतिमाः प्रार्चितुं शुभाः ।
संव्रजल्लीलयाकाशे खदिराख्यवनोपरि ॥97॥

समायातस्तदालोक्य तां शिलां तक्षकांचलाम् ।
महाविस्मयसम्पन्नः समन्ताद्वीक्ष्य शुद्धधीः ॥98॥

यन्नतस्तां शिलां स्थूलामपनीय विचक्षणः ।
तं शिशुं च समालोक्य सर्वलक्षणसंयुतम् ॥99॥

गृहीत्वा पुण्यपुञ्जं वा तेजसा जितभास्करम् ।
सामान्यो नैव बालोऽयं संविचार्येति मानसे ॥100॥

केनापि पूर्ववैरेण क्षिप्तोऽयं निर्जने वने ।
भो प्रिये! तव पुत्रोऽस्तु बालोऽयं भुवनोत्तमः ॥101॥

अमुं गृहाण सम्प्रीत्या तां जगादेति कामिनीम् ।
इत्याकर्ण्य प्रभोर्वाक्यं जगौ काञ्चनमालिका ॥102॥

अस्मै चेद्दीयते स्वामिन् यौवराज्यपदं त्वया ।
तदाहं संग्रहीष्यामि बालकं तन्निशम्य स ॥103॥

एवमस्तु प्रभुः प्राह कालसंवरसंज्ञकः ।
प्रियां कर्णस्थ सौवर्णपत्रं तत्पट्टकं व्यधात् ॥104॥

ततस्तौ द्वौ समादाय तं बालं पुण्यसम्बलम् ।
मेघकूटपुरं गत्वा प्रमोदकलिताशयौ[1] ॥105॥

1.प्रमोदकल्पिताशयौ इति अ प्रतौ

तत्र कृत्वा महाशोभां पुरे सद्रत्नतोरणैः ।
स्नेहिभिः सज्जनैर्युक्तैर्गीतवादित्र मंगलैः ॥106॥

जिनेन्द्रभवनैः कृत्वा महास्तपनपूजनम् ।
याचकेभ्यो महादानं दत्वा वाञ्छाधिकं मुदा ॥107॥

देवदत्तोऽयमित्युच्चैश्च कर्तुर्नाम तस्य च ।
पूर्वपुण्येन जन्तूनां मंगलानि पदे पदे ॥108॥

एवं महोत्सवैस्तत्र स बालो गुणमण्डितः ।
बालक्रीड़ाशतैर्नित्यं जनयन् प्रीतिमुत्तमम् ॥109॥

राजादीनां च सर्वेषां विद्याधरधरेशिनाम् ।
चन्द्रवद्वृद्धिमागच्छन् कलाभिः स्वगुणैः स्थितः ॥110॥

इतो द्वारवतीपूर्यां तद्वियोगेन रुक्मिणी ।
सञ्जाता दुःखिनी गाढं मालती वा हिमागमे ॥111॥

मेघमाला घनापाये दुर्बला वा तदाभवत् ।
सा माता गतो शोभाभूद्रात्रिर्वा चन्द्रवर्जिता ॥112॥

महाशोकेन सन्तप्ता तटी दावानलेन वा ।
गिरेः फलविहीना वा सद्वल्ली सा च नो बभौ ॥113॥

पत्यादिसारसम्पत्या[1] मण्डिता सापि दुखिता ।
सत्यं स्त्रीणां महादुखं भवेत्पुत्रवियोगतः ॥114॥

तथा श्रीवासुदेवाद्याः सर्वे ते सज्जना जनाः ।
तद्वियोगेन सम्प्रापुः महादुखपरम्पराम् ॥115॥

एवं यावत् स्थिताः सर्वे कृष्णाद्याः शोकसागरे ।
तावत्तत्र समायातस्तत्पुण्यान् नारदो मुदा ॥116॥

---

1. इत्यादिसारसम्पत्या इति ब प्रतौ

दत्वा मानं हरिः पुत्रवृत्तं प्रोक्तं च तं जगौ ।
त्वया केनाप्युपायेन स बालोन्विष्यतामिति ॥117॥

तदाकर्ण्य जगादोच्चैर्नारदो भो नरेश्वर।
अहं भ्रमन्नभोभागे विशाले निजलीलया ॥118॥

गत्वा पूर्वविदेहस्थां सत्पुरीं पुण्डरीकिणीम् ।
नाम्ना स्वयंप्रभुं तत्र केवलज्ञानभास्करम् ॥119॥

नत्वा तीर्थकरं देवं देवदेवेन्द्रपूजितम् ।
पुत्रवार्ता मया पृष्टा स च प्राह जगद्धितः ॥120॥

भवान्तराणि पुत्रस्य वैरिणा च यथा हृतः ।
क्षिप्तो वनान्तरे कष्टं बालकः पालितो यथा ॥121॥

विद्याधरनरेन्द्रेण महास्नेहभरेण सः ।
मन्दिरे तस्य ते पुत्रो वर्धते च यथा सुखम् ॥122॥

कालसंवरसंज्ञस्य रञ्जयन् हृदयाम्बुजम् ।
सर्वविज्ञानसम्पन्नो भूत्वा षोडशवार्षिकः ॥123॥

महाविद्यादिलाभेन मण्डितः परमोदयः ।
आगमिष्यति पुत्रस्ते कामदेवो मनोहरः ॥124॥

युष्माकं[1] सह संयोगो भावी तेन सुतेन भो ।
विभूत्या परमानन्ददायी षोडशवत्सरैः ॥125॥

इत्येवं भावि सर्वस्वं सर्वज्ञेन भाषितम् ।
श्रुत्वा मया समागत्य श्रीमतां च प्रकाशितम् ॥126॥

ततो भूप परित्यज्य सर्वचिन्तां स्वमानसे ।
भावनीयं सदा पूतं सत्यं श्रीजिनभाषितम् ॥127॥

नारदोक्त्या समाकर्ण्य पुत्रवृत्तं जिनोदितम् ।
सर्वे ते वासुदेवाद्या रुक्मिणी च सुखंस्थिताः ॥128॥

तथा रूप्याचले तत्र स्वपुण्यपरिपाकतः ।
सम्पूर्णयौवनः सोऽपि कुमारोजनि सौख्यतः ॥129॥

ज्ञानविज्ञानसन्मानैः रञ्जिताखिल खेचरः ।
चरमांगधरत्वाच्च तद्बलं केन वर्ण्यते ॥130॥

यः स्वयं कामदेवश्च भुवनत्रयरञ्जकः ।
तस्य रूपादिसम्पत्तिः कस्योच्चैर्न मनोहरा ॥131॥

इत्यादिकैर्गुणो र्युक्तो जिनभक्तिपरायणः ।
कुमारः सुस्थितः तत्र सुखेन परिमण्डितः ॥132॥

एकदा तेन भूपेन प्रेषितः सैन्यसंयुतः ।
गत्वा रणांगणे शीघ्रं महायुद्धं विधाय च ॥133॥

जित्वारिमग्निनामानं समानीय मदोद्धतम् ।
अर्पयामास भूपस्य स भटो देवदत्तवाक् ॥134॥

कालसंवरनामापि खेचरेन्द्रो महामुदा ।
दृष्टा पराक्रमं तस्य सर्वपुत्रशिरोमणिः ॥135॥[1]

नानारत्नसुवर्णाद्यैर्महामानं ददौ सुधीः ।
सारपुण्यसमायुक्तः प्राणी कै र्वा न मन्यते ॥136॥

तदासौ स्वप्रतापेन शत्रुसन्दोहहारिणा ।
कीर्तिकान्त्या जगच्चेतो हारिण्या च बभौतराम् ॥137॥

सूर्याचन्द्रमसोर्लीलां दधानः परमोदयः ।
शत्रुमित्रकुले दानैः सज्जनानां सुरद्रुमः ॥138॥

अथैकदा प्रभोस्तस्य भार्या काञ्चनमालिका ।
कामदेवं समालोक्य साररूपसमन्वितम् ॥139॥

1.अ प्रतौ अनुपलब्धः

तं कुमारं प्रति प्राह दर्शयन्ती निजाकृतिम्।
हावभावविलासादिविभ्रमैर्मदनोद्धतैः ॥140॥

जन्मान्तरागतस्नेहाद्विकारशतसंयुता।
लज्जाभयं कुलाचारं परित्यज्यैकहेलया ॥141॥

अहो कुमार! मामिच्छ देहि मे जीवितं द्रुतम्।
विद्यां प्रज्ञप्तिकामेतां गृहाण विधिपूर्वकम् ॥142॥

यः पुरा पुत्रभावेन पालितो लालितः करे।
तत्र तस्यारतीच्छाभूद्धिक्कामं पापकारणम्॥143॥

सोऽपि नत्वा[1] मनोभावं तस्याश्चात्यंतदुश्चलम्।
धूर्त्तत्वेन च विद्यार्थं वचसा नैव चेतसा ॥144॥

करिष्यामि तवाभीष्टं प्रतिपद्येति वेगतः।
विद्यामादाय तां दिव्यां कार्यकोटिविधायिनीम् ॥145॥

गत्वा विचक्षणः कामः सिद्धकूटजिनालयम्।
पापस्य विलयं चारुध्वाजाद्यैः प्रविराजितम् ॥146॥

कृत्वा तद्वन्दनां भक्तिं महायुक्तिसमायुतः।
विलोक्य चारणौ तत्र मुनीन्द्रौ भुवनोत्तमौ ॥147॥

भक्त्या प्रणम्य तत्प्रोक्तं श्रुत्वा धर्मजिनोदितम्।
सञ्जयन्तमुनेश्चारुचरित्रं च निशम्य सः ॥148॥

तत्र तत्प्रतिमापादमूले च विधिना सुधीः।
विद्यां संसाध्यतां दिव्यां प्रमोदात्पुरमागमत् ॥149॥

तदा तस्य कुमारस्य सद्विद्या लाभतोऽभवत्।
कापि शोभा मणेर्वोच्चैः सारसंस्कारयोगतः ॥150॥

1.मत्वा इति अ प्रतौ

सापि राज्ञी पुनर्वीक्ष्य तदा तद्रूपसम्पदाम् ।
भुवनत्रयनारीणां मनोमाणिक्यमोहनीम् ।।151।।

सञ्जाता व्याकुला चित्ते रोचते नैव भोजनम् ।
तं विना मानसे तस्याः सञ्जातं भवनं वनम् ।।152।।

प्रार्थयन्ती पुनर्गाढ़ं तां कामपीडितां ।
तां जगाद सुधीः सोऽपि प्रद्युम्नः सुभटाग्रणीः ।।153।।

त्वं मे माता हिता व्यक्तं कथं वदसि पापदम् ।
वचो भूरि भवाम्भोधिमहादुःखैककारणम् ।।154।।

इत्याकर्ण्य कुमारोक्तं सा चोवाच वचश्चला ।
भो कुमार! त्वया प्रोक्तं कथं स्नेहहरं वचः ।।155।।

पुत्रस्त्वं मेऽत्र नैवासि किं नु वक्ष्ये श्रृणु त्वकम् ।
तक्षकाख्यशिलायास्त्वं पुत्रो दृष्टोसि कानने ।।156।।

खदिराख्ये महाघोरे ततस्त्वं कुरु मे वचः ।
देहि मे कामजं सौख्यं किं वृथा जल्पनैः परैः ।।157।।

इत्येवं कामसन्तप्तां भाषन्तीं भूपभामिनीम् ।
तां परित्यज्य शुद्धात्मा कुमारो निर्गतो जवात् ।।158।।

हताशा सा ततो दुष्टा राज्ञी मायाशतैर्भृता ।
नखैर्देहं विदार्य्याशु[1] स्वकीयं पापपण्डिता[2] ।।159।।

कालसंवरभूपाग्रे गत्वा साश्रुविलोचना ।
अहो स्वामिन्! महामोहात् पुत्राणां त्वं शतेषु च ।।160।।

तथापि पुत्रो वा तेन भ्रान्तो जातोऽसि वेत्सि नः ।
परस्य जनितो लोके किं स्वकीयो भवत्यलम् ।।161।।

---

1. विदर्घ्या इति अ प्रतौ
2. पापपिडिता इति अ प्रतौ

पश्य देव त्वया नित्यं पोषितेन दुरात्मना।
कामातुरेण कष्टेन परपुत्रेण तेन तु ॥162॥

स्तनाग्रं मे नखैस्तीक्ष्णैर्दारितं पापकर्मणा।
योग्योऽयं नैव दुष्टात्मा स्थापितुं मन्दिरे प्रभो ॥163॥

इत्यादिकैः प्रियवाक्यैर्वञ्चितः स खगेश्वरः।
अजानन् मानसे तस्याः प्रियायाः पापचेष्टितम्[1] ॥164॥

मूढात्मा[2] तीव्रकोपाग्निः ज्वालामालाकरालितः।
विचारेण विना शीघ्रं विद्युद्दष्ट्रादिकान् सुतान् ॥165॥

सम्प्राह देवदत्तोऽयं युष्माभिर्हन्यते द्रुतम्।
प्रच्छन्नं यत्र को वात्र नैव जानाति निश्चितम् ॥166॥

इत्याकर्ण्य प्रभोर्वाक्यं तेऽपि पंचशतानि वैः।
पुत्राः सर्वे तमाहन्तुं पूर्वमेव परस्परम् ॥167॥

कृतमंत्रा दुरात्मानस्तथेति प्रतिपद्य च।
तं क्रीड़ाव्याजतो लात्वा कुमारं काननं ययुः ॥168॥

अहो सद्भिः प्रकर्त्तव्यं पूर्वं चित्ते विचारणम्।
वक्तासौ कीदृशः किं वा वक्ति सत्यमसत्यकम् ॥169॥

केन वा कारणेनोच्चैः रुष्टो वा पीडितः परैः।
लज्जितो वा भयत्रस्तो मानतो लोभतोऽथवा ॥170॥

प्रेरितो वा परैर्दुष्टैर्दत्वा लुञ्चादिकं[3] धनम्।
इत्यादिकं विचार्योच्चैः कार्ये कार्यं धराधिपैः ॥171॥

तेन तु स्वस्य पापेन पापिन्या कष्टयोषिता।
प्रेरिते नातिमूढेन कुकार्यं भूभुजा कृतम् ॥172॥

1.पापवेष्टितम् इति अ-ब प्रतयोः
2. मूढो इति स प्रतौ
3.लंचादिकं इति अ-ब-द प्रतीनां

विचारविकलेनोच्चैः कालसंवरकेन च।
अतो लोकद्वये दुखदायिनीं धिग्विमूढताम् ॥173॥

ते तत्र दुर्जनाः वीक्ष्य वह्निकुण्डं ज्वलत्प्रभम्।
साक्षाद्यमाननं वोच्चैर्जनानां भूरिभीतिदम् ॥174॥

तं कुमारं प्रति प्राहुर्भो सुधीर्देवदत्तवाक्।
विशन्त्यस्मिन् महाकुण्डे सुधीराः कातराः न च ॥175॥

तदाकर्ण्य कुमारोऽपि निःशंकः पूर्वपुण्यभाक्।
स्मृत्वा पञ्चनमस्कारान् सर्वसिद्धिप्रदायकान् ॥176॥

न्यपतत्तत्र दुःसाध्ये महाभटशिरोमणिः।
कार्यं सन्तोऽपि कुर्वन्ति दैवाद्भाव्यविचारितम् ॥177॥

तत्र तत्पुण्यतः सोऽपि दिव्यरत्नादिभूषणैः।
सद्वस्त्रैः पूजितो देव्या कुमारः परमादरात् ॥178॥

सत्यं पुण्यवतां पुंसा दुर्वह्निर्जलतां व्रजेत्।
समुद्रः स्थलतां यान्ति दुर्विषं च सुधायते ॥179॥

शत्रुश्च मित्रतामेति क्रूराः सिंहादयः खलाः।
देवताश्च वशं यांति दुर्विघ्नोऽपि सुखायते ॥180॥

तस्माद्भव्याः प्रकुर्वन्तो सत्पुण्यं श्रीजिनोदितम्।
पात्रदानं जिनेन्द्रार्चां सच्छीलं प्रोषधादिकम् ॥181॥

महालाभेन संयुक्तं निर्गातं संविलोक्य तम्।
ते सर्वे विस्मयं प्राप्य पुनः प्राहुर्दुराशयाः ॥182॥

मेषपर्वतयोर्मध्ये भटो याति न दुर्भटः।
सोऽपि तत्र प्रविष्टोऽपि रुक्मिणी तनयो महान् ॥183॥

सम्पतंतौ समालोक्य निजोपरि तदा सुधीः।
पर्वतौ मेषरूपेण हस्ताभ्यां तौ निरुध्य च।184॥

सुस्थितस्तं निरीक्ष्योच्चैर्वासुदेवसुतं तदा।
महासुभटकोटीनां मण्डनं भुजशालिनम् ॥185॥

सन्तुष्टा तद्गता देवी परमानन्दनिर्भरा।
दिव्यवस्त्रादिभिर्युक्तं रत्नकुण्डलयुग्मकम् ॥186॥

दत्वा तस्मै सुपुण्याय चकार विनयं शुभम्।
सत्यं पुण्यवतां लोके किमसाध्यं भवत्यहो ॥187॥

ततोऽसौ निर्गतश्चापि दुर्जनैस्तैः प्रवेशितः।
वराहपर्वतस्योरुविलञ्चातिभयानकम् ॥188॥

तत्र सन्मुखमागच्छन् वराहो दुष्टमानसः।
रक्तनेत्रो महादंष्ट्रो दुष्टनादो मलीमसः ॥189॥

जन्तूनां प्राणनाशाय यमो वा कालविग्रहः।
तदा स शूकरः पापी विकरालो मदोद्धतः ॥190॥

कामदेवेन तेनोच्चैः करेणैकेन वेगतः।
दंष्ट्रायां निष्ठुरं धृत्वा कीटको वा वराककः ॥191॥

प्रचण्डभुजदण्डेन द्वितीयेन निहत्य च।
मस्तके निर्जितः शीघ्रं तदा संवीक्ष्य साहसम् ॥192॥

ससम्भ्रमं समागत्य देवता परया मुदा।
शंखं[1] विजयघोषाख्यं शत्रुसन्तानभीतिदम् ॥193॥

जालं च वैरिमत्स्यानां महाकालं ददौ द्रुतम्।
तस्मै भक्त्या कुमाराय महाविनयपूर्वकम् ॥194॥

तद्द्वयं च समादाय समागत्य भटाग्रणीः।
गत्वा कालगुहायां च प्रेषितो नृपपुत्रकैः ॥195॥

1.शंषं इति अ प्रतौ

तत्र नाम्ना महाकालो राक्षसस्तं विलोक्य च ।
महासामर्थ्यसंयुक्तं स्वयं सन्मुखमागतः ॥196॥

प्रणम्य परया भक्त्या वृषभाख्यमहारथम् ।
ददाति स्म सुरस्तस्मै कवचं रत्ननिर्मितम् ॥197॥

निर्गत्य स गुहायाश्च स रथः कवचान्वितः ।
ततस्तत्रैव रूप्याद्रौ कोऽपि विद्याधरो महान् ॥198॥

केनापि खेचरेणोच्चैः कीलितः पादपद्मयोः ।
दृष्टः कामेन तत्पीडा पीडितो नितरां तदा ॥199॥

तथा तस्य मनोभावं ज्ञात्वा खेटकवीक्षणात् ।
परोपकारिणा तेन रुक्मिणीतनयेन च ॥200॥

खेटकस्थां समादाय मुद्रिकां बन्धमोचिनीम् ।
अञ्जनं नेत्रयोः कृत्वा तस्य विद्याधरस्य च ॥201॥

मोचितः स खगश्चापि सन्तुष्टो मानसेतराम् ।
निजोपकारिणे तस्मै मदनाय प्रमोदतः ॥202॥

सुरेन्द्रजालं जालान्तं नरेंद्रं प्रस्तरं चयः ।
विद्यात्रयं जगत्सारं ददौ कार्यकरं परम् ॥203॥

निजोपकारिणे सत्यं लोके प्राणप्रदायिने ।
को वा नैव करोत्यत्र सुधीः प्रत्युपकारकम् ॥204॥

पुनस्तैः प्रेरितः सोऽपि महासुभटसत्तमः ।
सहस्रमुखसर्पस्य भवने मदनो महान् ॥205॥

पूरयामास पूतात्मा महाशंखं स्वलीलया ।
तद्ध्वनि श्रवणाच्छीघ्रं नागदेवो महादरात् ॥206॥

स्वनागी संयुतो भक्त्या समागत्य प्रमोदतः ।
पञ्चवर्णैः समायुक्तं धनुर्दिव्यं तथा परम् ॥207॥

नन्दकाख्यमसिं तीक्ष्णं मुद्रिकां कामरूपिणीम् ।
ददौ तस्मै कुमाराय पूर्वपुण्यप्रशालिने ॥208॥

तस्मादागत्य तेनोच्चैः कपित्थतरुसन्नतः[1] ।
लीलया कम्पितेस्तत्र स्थित देव्यार्पितं महत् ॥209॥

सम्प्राप्तं पादुकायुग्मं महागगनगामि यत् ।
दिव्यरत्नमयं सारं कुमारेण महाधिया ॥210॥

सुवर्णपादपे नाम्ना वने चात्यन्तसुन्दरे ।
तत्र पञ्चफणाख्येन[2] महानागाधिपेन च ॥211॥

तपनस्तापनो बाणो मोहनोऽपि विलापनः ।
मारणश्चेति बाणानां पञ्चकं शत्रुवञ्चकम् ॥212॥

तस्मै दत्तं महाप्रीत्या कामदेवाय सादरम् ।
पूर्वपुण्यप्रभावेन के न कुर्वन्ति चादरम् ॥213॥

तमो मर्कटकेनोच्चैस्तुंगे क्षीरवने घने ।
पञ्चरत्नप्रभाभारैर्भासुरं मुकुटोत्तमम् ॥214॥

विशुद्धौषधिमाला च छत्रं मुक्ताफलैर्युतम् ।
गंगातरंगसंकाशं चामरद्वयमुत्तमम् ॥215॥

तस्मै दत्तानि चत्वारि सारवस्तूनि धीमते ।
युक्तं पुण्यवतां पुंसां मर्कटोऽपि फलप्रदः॥216॥

स कदम्बमुखीवाप्यां प्राप्तवान् पुण्ययोगतः ।
नागपाशं महादिव्यं शत्रुसन्दोहबन्धनम्[1] ॥217॥

इत्यादिकान् महालाभांस्तस्य संवीक्ष्यते खलाः ।
सन्तप्ता मानसे गाढं स्वभावोऽयं खले सदा ॥218॥

1.कपित्थतरुरुन्नतः इति अ प्रतौ

2.फणीख्येन इति ब प्रतौ

3.शत्रुसंहबंधनं इति ब प्रतौ

तं जगुर्हन्तुकामास्ते देवदत्तमहाभटाः ।
यः पातालमुखीवाप्या पतेत्साहससंयुतः ॥219॥

स भवेत्सर्वभूमीशः किं लाभैर्प रैरिह[1] ।
इत्याकर्ण्य वचस्तेषां दुर्जनानां विचक्षणः ॥220॥

ज्ञात्वा दुष्टाशयं गाढं विद्यां प्रज्ञप्तिकां तदा ।
पातयामास तद्वाप्यां निजरूपेण वेगतः ॥221॥

तिरोभूय स्वयं तत्र सर्वप्रस्तावतत्त्ववित् ।
किं करिष्यन्ति चैते तु पश्यामीति तदा स्थितः ॥222॥

तदा ते पापकर्मणो वेगतो नृपपुत्रकाः ।
महाशिलां शतैर्वापि पूरयामासुरुद्धताः ॥223॥

तान् समालोक्य संक्रुद्धः कुमारोऽपि भटाग्रणीः ।
सम्बध्वा नागपाशेन विद्युद्दंष्ट्रादिकान् खलान् ॥224॥

अधोमुखान्समाक्षिप्य तद्वाप्यां नारकान् यथा ।
महाशिलापिधानं च दत्वा वापी मुखे दृढम् ॥225॥

ज्योतिः प्रभं कनिष्ठं च तेषु सर्वेषु वेगतः ।
प्रहित्य नगरं तत्र शिलायां च स्वयं स्थितः ॥226॥

सत्यं ये पापिनोऽन्येषां वञ्चकास्ते स्वपापतः ।
महाकष्टशतान्युच्चैः प्राप्नुवन्तीह भूतले ॥227॥

तदा क्षणेन भूभागे समागच्छन्तमादरात् ।
नारदं वीक्ष्य वेगेन समुत्थाय स्मरो महान् ॥228॥

दत्वा मानं च संस्थाप्यं समीपे प्रीतिपूर्वकम् ।
तेनोक्तं स समाकर्ण्य तदा गमनकारणम् ॥229॥

1.परिग्रहः इति अ प्रतौ

सुस्थितंश्च तदालोक्य महासैन्यसमन्वितम् ।
आगच्छन्तं द्रुतं व्योम्नि कालसंवरभूभुजम् ॥230॥

महाकोपेन सन्तप्तं ज्वलन्तं पावकं यथा ।
कुमारो तदोत्थाय कृत्वा युद्धं महाभटः ॥231॥

जित्वा तत्सैन्यकं सर्वं लीलया तं खगाधिपम् ।
मानभंगन्तरां तत्र प्रापयामास मन्मथः ॥232॥

ततो नष्टा स्वसैन्येन कालसम्भवभूपतिः ।
पातालवापिकायां च स्थितो यावत्तदा सुतः ॥233॥

ज्योतिः प्रभो विनीतात्मा सञ्जगाद प्रणम्य तम् ।
श्रृणु तात! परित्यज्य स्वकोपं पापकारणम् ॥234॥

यत्र यत्र कुमारोयं देवदत्तोऽत्र संकटे ।
अस्माभि[1]र्हन्तुमाक्षिप्तस्तत्र तत्र महादरात् ॥235॥

देवदेवीभिरागत्य नाना विद्यादिभिर्मुदा ।
दिव्याभरणसद्वस्त्रैः पूजितो निजपुण्यतः ॥236॥

त्वं भो देवप्रिया! वाक्यैर्वञ्चितो नैव वेत्सि च ।
किं वदन्ति स्त्रियः सर्वाः सत्यं याः पापमोहिताः ॥237॥

को वा जानाति किं केन प्रकारेण कुचेतसा ।
तया प्रोक्तं प्रभो विद्धि नाम्ना काञ्चनमालया ॥238॥

स्त्रियो माया सहस्राणां प्रायेण श्रेणयः प्रभो ।
भवन्ति भूतले दुष्टाः कष्टाः स्वपरतापकाः ॥239॥

ततस्तासु न कर्त्तव्यो विश्वासः सर्वथा सुधीः ।
धीर्धनैः परलोकार्थं सावधानैर्भवादृशैः ॥240॥

---

1. अस्माकैभिः इति द प्रतौ

त्वयाप्यजानता देव! प्रियवाक्यैश्च निर्दयम् ।
वृथायं हन्तुमारब्धः कुमारः पुण्यसम्बलः ॥241॥

धीरो वीरोऽतिगम्भीरो विशुद्धः सत्यशौचवान् ।
कामदेवो गुणैर्युक्तो धार्मिको जिनभक्तिभाक् ॥242॥

मा त्वं मोहपिशाचेन गृहीतो भवसि ध्रुवम् ।
स्वं विकल्पं परित्यज्य कुमारो विनयं कुरु ॥243॥

इत्याकर्ण्य सुतेनोक्तं सत्यं पथ्यं खगेश्वरः ।
कालसंवरनामापि प्रबुद्धः परमादरात् ॥244॥

गत्वा कुमारसामीप्यं तं समालिंग्य वेगतः ।
प्रोवाच मधुरं वाक्यं सर्वशान्तिविधायकम् ॥245॥

अहो पुत्र पवित्रात्मा त्वं सदा शीलसागरः ।
ज्ञाता सर्वक्रमस्योच्चैर्मंदिरं विनयस्य च ॥246॥

क्षमस्व सर्वथा पुत्र त्वमस्माकं कुचेष्टितम् ।
श्रुत्वेति भूपतेर्वाक्यं कुमारोऽपि विचक्षणः ॥247॥

तं नत्वा वेगतो भक्त्या तां शिलामपनीय च ।
नागपाशं विपाश्योच्चैर्मुक्तान् तान् खेचरान् गजान् ॥248॥

वापीतोयाच्च निष्कास्य सत्क्षमां कृतवान् सुधीः ।
सत्यं सतां तदेवात्र मण्डनं या क्षमा भुवि ॥249॥

तस्मिन्नवसरे प्राह नारदस्तं मनोभवम् ।
श्रृणु त्वं वत्स भो! बालं ख्याते द्वारवती पुरे ॥250॥

त्रिखण्डेशो महीराजः[1] कृष्णनामा सुविश्रुतः ।
सर्वखेचरभूनाथस्समर्चितपदद्वयः ॥251॥

1.महाराजः इति अ प्रतौ

तत्प्रिया रुक्मिणी राज्ञी सती सद्व्रतशालिनी।
तयोस्त्वं नन्दनो धीरः सज्जनानन्ददायकः ॥252॥

सर्वे ते यादवाधीशाः बलदेवपुरस्सराः।
वाञ्छंत्यागमनं ते वै यथा मेघस्य चातकाः ॥253॥

इत्यादिसर्वसम्बन्धं श्रुत्वा नारदजल्पितम्।
कामदेवस्तदा शीघ्रं नत्वा प्राह खगाधिपम् ॥254॥

भो विशुद्धखगाधीश !सत्यं त्वं मे पिता सुधीः।
सा मे माता न सन्देहो नाम्ना काञ्चनमालिका ॥255॥

ययाहं पालितो गाढं स्तन्यपानेन नित्यशः।
अतस्त्वं मे क्षमां कृत्वा बालकस्योपरि ध्रुवम् ॥256॥

आदेशं देहि भो नाथ! श्रीमत्पादप्रसादतः।
गत्वा द्वारवतीं तेषां सन्तोषं संकरोऽस्म्यहम् ॥257॥

इत्याग्रहेण तेनोच्चैः खगेन्द्रेण विसर्जितः।
कामदेवस्तदा शीघ्रं सर्वाणां पृच्छया युक्तितः ॥258॥

नारदेन सहारूढ़ो रथं वृषभनामकम्।
चचाल परमानन्दात् पुरीद्वारवतीं प्रति ॥259॥

नभो मार्गे तदा तेन नारदेन समीरितम्।
स्वयंप्रभजिनेन्द्रेण सम्प्रोक्तं यत्पुरा किल ॥260॥

श्रृण्वन् स्वपूर्वजन्मोरुवृत्तान्तं विस्तरेण च।
अग्निभूतिभवाद्युत्थं परमानन्दनिर्भरः ॥261॥

हस्तिनागपुरं प्राप्य तदा तत्र पुरेशिनः।
दुर्योधनस्य जलधेः सुतामुदधिसंज्ञिकाम् ॥262॥

दातुं भानुकुमाराय सत्यभामा सुताय च।
महामज्जनश्रृंगारहारदोरादिमण्डिताम् ॥263॥

तां समालोक्य चाकाशे रथे धृत्वा सुनादरम् ।
प्रस्तराख्यमहाविद्या शिला याच्छाद्यसुन्दरः ॥264॥

स्वयं तत्र विनोदेन समुत्तीर्य महीतले ।
सुधीर्विद्याप्रभावेण नानाहास्यकुतूहलैः ॥265॥

कृत्वा बहून् विकारांश्च तत्रस्थान् सकलान् जनान् ।
महाविस्मयसम्पन्नान् संविधाय च वेगतः ॥266॥

ततो निर्गत्य सम्प्राप्ते मथुरानगरी बहिः ।
विलोक्य पाण्डवांस्तत्र सद्विभूत्यातिमण्डितान् ॥267॥

प्रियापुत्रादिसंयुक्तान् परमानन्दतस्तदा ।
दातुं भानुकुमाराय स्वसुताः सुमहोत्सवैः ॥268॥

गन्तुकामान् स्वयं कामो भूत्वा भिल्लो भयानकः ।
समारोपितः सच्चापः स बाणः कालविग्रहः ॥269॥

शुक्लस्य व्याजतो गाढं स्वविद्यायाः प्रभावतः ।
महाभटान्महाधूर्त्तान् पण्डुपुत्रान् कदर्थ्य च ॥270॥

गत्वा द्वारवतीं बाह्ये नारदं च तदा पुनः ।
रथस्थं पूर्ववद् धृत्वा स्वयं तत्र विलोक्य च ॥271॥

सत्यभामा वनं रम्यं भूरिपुष्पफलादिभिः ।
विद्यया मर्कटो भूत्वा महाचेष्टा समन्विता ॥272॥

अतीव चपलत्वेन वृक्षे वृक्षे परिभ्रमन् ।
गृहीत्वा तत्फलान्युच्चैश्चेष्टया दिक्षु चाक्षिपत् ॥273॥

भुक्तं वनं च तत्पानं वापी सर्वजलेन च ।
भृत्वा कमण्डलुः स्वस्य ब्रह्मवेषेण निर्गतः ॥274॥

तत्रोच्चैः सत्यभामायाः दास्यादीनां विनोदतः ।
कोपं हास्यं च सञ्चक्रे विद्यया मन्मथस्तराम् ॥275॥

वापीतोऽपि ततः पुर्यां गन्तुकामो मनोभवः।
स्वस्य विद्याप्रभावेन नाना क्रीडाविनोदकृत् ॥276॥

स्पन्दने रासभांस्तुंगात् स मेषान् निजलीलया ।
विपर्या सं समायोज्य तत्रारूढः स्वयं तदा ॥277॥

पुरगोपुरकं रुद्धा तत्र निर्गमने जनान् ।
आकुलव्याकुलीकुर्वन्नरनारीश्वररञ्जयन् ॥278॥

प्रविश्य नगरीं तत्र वैद्यरूपेण सर्वतः ।
छिन्नकर्णादिसन्धानं करोम्युच्चैश्च वेगतः ॥279॥

नानाज्वारादिकान् व्याधीन् स्फेटयामि क्षणार्द्धतः ।
शालकाख्योप्यहं वैद्यः सर्ववैद्यशिरोमणिः ॥280॥

इत्यादिघोषणैस्तत्र भूरिं भूपतिकन्यकाः ।
दातुं भानुकुमाराय समानीताः सुभूषणाः ॥281॥

तासां चापि मनोभोजं क्रीडया संविकाश्य च ।
ततो द्विजाकृतीर्भूत्वा दिव्यमूर्तिर्मनोहरा ॥282॥

सत्यभामा गृहं गत्वा कृत्वा मायाद्विजान् बहून् ।
तैः सार्द्धं वल्लभनार्थं च भोजनावसरे द्रुतम् ॥283॥

सम्प्रार्थ्य सत्यभामां तां वासुदेवाग्रभामिनीम् ।
मायया प्रचूराहारं नाना पक्वान्नधान्यकम् ।284॥

व्यञ्जनैर्दधिभिर्दुग्धैर्भुक्त्वा तृप्तिविवर्जितः ।
रिक्तकुक्षिः पुनः कांक्षां प्रकुर्वन् भणितस्तया ॥285॥

राक्षसोऽयं समायातो विप्रवेषेण मद्गृहम् ।
अग्निवत् सर्वभक्षीति समाकर्ण्य ततो रुषा ॥286॥

सम्पूर्णभोजनं चापि दातुं नैव प्रशक्यते[1] ।
केन धात्रा कृता चैषा लोभिनी च हरेः प्रिया ॥287॥

---

1. प्रकाश्यते इति अ प्रतौ

स्थूलवक्रो जनस्याग्रे घोषयन्निर्गतो गृहात् ।
तथा क्षुल्लकवेषेण मातुर्गेहमुपागमत् ॥288॥

विनोदेन तदा प्राह भो देवि! त्वं दयान्विता ।
बुभुक्षितोऽहं मे देहि भोजनं चित्तरञ्जनम् ॥289॥

तदा तया स रुक्मिण्या सारषड्रसभोजनैः ।
भोजितोऽपि न संतृप्तो ज्ञात्वा तस्य मनोगतम् ॥290॥

पुनस्तया दयाभावैः प्रमोदभरतस्तराम् ।
महामोदकदानेन प्रीणितः[1] स व्रती तदा ॥291॥

कृत्वा तद्भोजनं रम्यं सन्तुष्टस्तु स्थितः सुखम् ।
यावत्तावच्च तत्रोच्चैरकालेऽपि विलोक्य सा ॥292॥

चम्पकाशोकपुष्पौघं कोकिलालिस्वनं वनम् ।
तथोत्पन्नमहानन्दैः परैश्चिह्नैः शुभावहैः[2] ॥293॥

स्वस्तनोन्नतयुग्मे च पयः पूरेण सुन्दरी ।
स्वसर्वांगे समुत्पन्नैस्तथा रोमाञ्चकैः शुभैः ॥294॥

स्वमानसे च सन्तुष्टा तं जगौ रुक्मिणी मुदा ।
किं भो भद्र! परिप्राप्ते कालेऽस्मिन्नारदोदिते ॥295॥

मत्पुत्रोऽसि समायातस्त्वं मे प्रीतिः प्रजायते।
दर्शने ते तदाकर्ण्य मातुर्वाक्यं प्रतुष्टवान् ॥296॥

स्वरूपं प्रकटीकृत्य कामदेवः पदद्वयं
रुक्मिण्याः स प्रणम्योच्चैः परमानन्ददोऽभवत् ॥297॥

1.प्रीणिणः इति ब प्रतौ
2. शुभावकैः इति ब प्रतौ

तदा तस्याश्च रुक्मिण्याः पुत्रसंयोगतोऽभवत् ।
यत्सुखं वर्ण्यते केन तत्सुखं स्नेहनिर्भरम् ॥298॥

तथा तया परिपृष्टः सन्तोषेण सुतो जगौ ।
स्वचेष्टितं यथा वृद्धिं सम्प्राप्तो रजताचले ॥299॥[3]

कालसंवरभूपस्य मन्दिरे सुखतः सुधीः ।
यथा लाभश्च विद्यादिसम्पदानां महानभूत् ॥300॥

इत्यादिकं सुतेनोक्तं श्रुत्वा सापि प्रतोषिणी ।
रुक्मिणी तं पुनः प्राह सुधीर्भो पुत्रभूतले ॥301॥

दर्शनेन तवास्माकं सम्पूर्णाः सन्मनोरथाः ।
यथा चातकयुग्मानां सञ्जाते जलदागमे ॥302॥

शिशुत्वं नेक्षितं तत्र मनोनयनवल्लभम् ।
तन्निशम्य कुमारोऽपि महाविद्याप्रभावतः ॥303॥

जातमात्रां कृतेः सर्वां बालक्रीड़ां सुखप्रदाम् ।
सम्प्रदर्श्य सुधीः सौख्यं स्वमातुः कृतवान् भृशम् ॥304॥

सुपुत्रलक्षणं तद्वियत्पित्रोः कुरुते सुखम् ।
यथासौ कामदेवश्च सञ्चक्रे सुखमुत्तमम् ॥305॥

इत्येवं सुखवार्ताभिर्मातुश्चित्तं स रञ्जयन् ।
यावदास्ते सुखं कामः प्रद्युम्नो महिमाकरः ॥306॥

सत्यभामा तदा चित्ते नायातो रुक्मिणी सुतः ।
अद्यापीति विचार्याशु नाचित्तं प्राहिणो द्रुषा ॥307॥

सोऽपि शीघ्रं समागत्य रुक्मिणीं प्रत्यभाषत ।
भो मात! दीयतां स्वस्य शिरोरुहसमूहकः॥308॥

3.अनुपलब्धौ स प्रतौ

भानोः[1] स्नाननिमित्तं च तदाकर्ण्य स्वमानसे।
महाविस्मयमासाद्य प्रद्युम्नेन प्रजल्पितम् ॥309॥

किं भो मात! वदत्येष पापीदुष्टतरं वचः।
सा चोवाच सती पुत्र! यदा त्वं जनितो मया ॥310॥

तदैव[2] भानुनामापि जनितः सत्यभामया।
तदावयोर्महासख्यौ गते पार्श्वे हरेर्मुदा ॥311॥

तस्मिन् सुप्ते सुखं भूपे मत्सखी तत्पदान्तिके।
तस्थौ तस्याः सखी चापि स्थिता तन्मस्तकान्तिके ॥312॥

प्रबुद्धे च तदा तस्मिन् मत्सख्या तं प्रणम्य च।
पुरा प्रोक्तं प्रभो पुत्रा[3] रुक्मिण्या जनितो महान् ॥313॥

सर्वलक्षणसम्पूर्णो दिव्यमूर्तिर्मनोहरः।
तत्समाकर्ण्य चक्रेशो ददौ ते ज्येष्ठतां मुदा ॥314॥
श्रृणु पुत्र तदा वक्ष्ये त्वदुत्पत्तेः पुरा किलः।
हरेः सम्प्रश्नतो मत्वा मुनीन्द्राद्विनयंधरात् ॥315॥

सुतोत्पत्तिमया सत्यभामया च तथैव च।
तारुण्ये गर्वतः प्रोक्तं सुधीरज्ञानभावतः ॥316॥

यस्याः पूर्वसुतो भावी सोऽन्यस्याः केशकान् ध्रुवम्।
गृहीत्वा स्वविवाहस्य काले संस्नाति नन्दनः ॥317॥

त्वयि बाले हृते पुत्रे वैरिणो धूमकेतुना।
तस्या भानौ सुते जाता ज्येष्ठता कर्मयोगतः ॥318॥

अद्य भानोर्महाभूत्या सत्यभामानिकेतने।
विवाहमंगलस्नानं वर्तते परमादरात् ॥319॥

1.भानेन निमित्तं इति अ प्रतौ, अनुपलब्धः स प्रतौ
2.तत्रैव इति स प्रतौ
3.पुत्रो इति अ , ब प्रतयोः

तन्निमित्तं च धम्मिल्लाल्लातुं[1] मे प्रेषितस्तया ।
नापितो यं समायातो दुःसह कर्मसञ्चयः ॥320॥

मातुर्वाक्यं स च श्रुत्वा कामदेवो महाक्रुधा ।
स्वविद्यासारसामर्थ्यान्नापितस्य तदा क्षणे ॥321॥

शरीरे सञ्चकारोच्चैर्विकारान् कष्टकोटिदान् ।
शूरः किं सहते सत्यं स्वमातुर्मानखण्डनम् ॥322॥

तथा तत्किंकरान् वीक्ष्य सोप्यातान् स्वविद्यया ।
वासुदेवस्य रूपेण तर्जयामास निष्ठुरं ॥323॥

आगच्छन्तं पुनर्वीक्ष्य जराख्यं च महत्तरम् ।
दीर्घाकृतस्वपादेन कामस्ताडयति स्म तम् ॥324॥

मेषरूपेण तत्राशु वसुदेवं पितामहम् ।
पातयामास वीरोऽसौ विनोदेन महीतले ॥325॥

सिंहो भूत्वा च पद्माख्यं बलदेवं स बालकः ।
जित्वा जगाद चैकान्ते भो मात! तिष्ठ साम्प्रतम् ॥326॥

इत्युक्त्वा रुक्मिणीं कृत्वा नूतनां निजविद्यया ।
तामादाय तदाकाशे स्थापयित्वा विमानके ॥327॥

सोऽगच्छत्तत्र सञ्जाते महाकोलाहलस्वने ।
वासुदेवस्तदा रुष्टः पृष्टतस्तस्य निर्ययौ ॥328॥

सर्वसैन्येन संयुक्तस्तं हन्तुं च यमाकृतिः ।
कामोपि तं समायातं हरिं वीक्ष्य सुदारुणम् ॥329॥

शीघ्रं नरेन्द्रजालेन जयति स्म स्वलीलया ।
सर्वत्र सारपुण्यानां जयो लोकेन दुर्लभः ॥330॥

1.धमिल्लालातुं इति द प्रतौ

तस्मिन्नेव क्षणे तत्र समागत्य स नारदः ।
हसित्वा तं हरिः प्राह भो नरेन्द्रवचः श्रृणु ।।331।।

अयन्ते बालको देव रुक्मिणीकुक्षिसंभवः ।
कामदेवो जगच्चेतो मोहनैकमणिः प्रभो ।।332।।

सत्यं तीर्थकरोद्दिष्टं सञ्जातं वचनं शुभम् ।
नीत्वा षोडशवर्षाणि लब्धविद्यः समागतः ।।333।।

विनोदेन सुधीरे[1] तत्सर्वं विद्याप्रभावतः ।
सञ्चकार कुमारोऽयं नान्यः कोऽपि परो नरः ।।334।।

इत्याकर्ण्य यदा कृष्णः सन्तुष्टो मानसेतराम् ।
निधाने[2] वा परिप्राप्ते[3] पुत्रागमनसंश्रुतः ।।335।।

तदैव वेगतः सोऽपि समागत्य मनोभवः ।
हस्तिनो[4] वासुदेवस्य चरणाम्भोजयुग्मयोः ।।336।।

पपात[5] परमानन्दमनन्दं जनयन् भृशम् ।
महाविनयसम्पन्नः प्रतापजितभास्करः ।।337।।

तदा हरिः प्रभुः शीघ्रं परमानन्दनिर्भरः ।
तं समालिंग्य प्रद्युम्नं सुतं सौभाग्यमन्दिरम् ।।338।।

पुनः पुनर्विलोक्योच्चैस्तस्यरूपोरु सम्पदाम् ।
सन्तोषकमपि प्राप कविवाचामगोचरम् ।।339।।

समारोप्य महातुंगं स्वगजस्कन्धमगजम् ।
जयकोलाहलैः शीघ्रं परिवारैः परिष्कृतः ।।340।।

1.सुधीरेव इति अ प्रतौ
2. निधानेन इति ब प्रतौ
3.परेप्राप्ते इति ब प्रतौ
4.हलिनो इति अ-ब-स प्रतीनाम्
5. पापत इति ब प्रतौ

महावादित्रनिर्घोषैर्बधिरीकृददिग्मुखः ।
चलच्चामरसच्छत्रः ध्वजाद्यैः प्रविराजितः ॥341॥

देवेंन्द्रो वा प्रतीन्द्रेण युक्तः सर्वबलान्वितः ।
पुरीं द्वारवतीं रम्यां प्राविशत् परमोदयः ॥342॥

पुरे तत्र महाभूत्या भानूद्दिष्टाभिरादरात् ।
कन्याभिर्दिव्यरूपादिसम्पदाभिः सहोत्तमम् ॥343॥

कल्याणाभिषवं कृत्वा महादानाभिस्तराम् ।
प्रद्युम्नस्य विवाहान्ते हर्याद्याः सज्जना व्यधुः ॥344॥

इत्येवं कामदेवोऽसौ परिणीयोरुकन्यकाः ।
हरेःकुलक्रमस्योच्चैः सम्प्राप्तो ज्येष्ठतां पराम् ॥345॥

रुक्मिण्याश्च तदा मातुर्मनोभोजे विशेषतः ।
भास्करो वा सुतः सोऽपि प्रकाशं कृतवान् भृशम् ॥346॥

एवं काले गलत्युच्चैः सर्वेषां पुण्यतः सुखम् ।
अन्यदा ज्ञानिना तत्र केनचित् प्रविजल्पितम् ॥347॥

प्रद्युम्नस्य पुराजन्म बान्धवः पुण्यसंयुतः ।
स्वर्गलोकात्समागत्य हरेः पुत्रो भविष्यति ॥348॥

तत्समाकर्ण्य वेगेन सत्यभामा तदा मुदा ।
गत्वा हरिं प्रति प्राह भो प्रभो! श्रूयतामिह ॥349॥

तत्सुतोत्पत्तिलाभो मे यावन्नाथ भवत्यलम् ।
तावत्त्वया न कर्त्तव्या मां विहाय रतिक्रिया ॥350॥

अन्यत्र वनितावृन्दे प्रार्थितोऽसि मया ध्रुवम् ।
इत्याकर्ण्य तदा वार्ता रुक्मिणी च तदीर्षया ॥351॥

एकान्ते स्वसुतं प्राह श्रृणु त्वं पुत्र! तेऽनुजः।
स्वर्गादागत्य मे सख्या जाम्बवत्याः सुतो भवेत् ॥352॥

यथा तथा प्रकर्त्तव्यो महोपायो विचक्षणा।
त्वयेत्याकर्ण्य कामोऽपि ज्ञानविज्ञानपण्डितः ॥353॥

जाम्बवत्यै ददौ विद्यां मुद्रिकां कामरूपिणीम्।
मनोवाञ्छितसद्रूपकारिणीं शर्मदायिनीम् ॥354॥

तां मुद्रिकां करे कृत्वा धूर्ता जाम्बवती तदा।
सत्यभामाकृतिं धृत्वा गता पार्श्वं हरेर्मुदा ॥355॥

तत्र प्रीत्या रतिक्रीड़ा विनोदे हरिणा सह।
सञ्जाते परमानन्दात् स्वर्गादागत्य तत्क्षणे ॥356॥

स क्रीडा व चरो देवो महापुण्यविराजितः।
जाम्बवत्यास्तदा तस्याः शुभे गर्भे सुखं स्थितः ॥357॥

मासेर्नवभिरत्यन्तसुखोपेतैर्महोत्सवैः।
तया च जाम्बवत्या स जनितः पुण्यसम्बलः ॥358॥

शम्भवाख्यो भवत्सोऽपि सर्वलक्षणसंयुतः।
युवा जाम्बवतीपुत्रो मुक्तिगामी गुणाकरः ॥359॥

तथा सा सत्यभामा च सुभानुनामनन्दनः।
सम्प्राप्तं परमानन्ददायकं गुणनायकम् ॥360॥

एकदा शम्भवेनोच्चैस्तेन सद्बलशालिना।
सुभानुर्निर्जितो गाढं गान्धर्वादिविवादतः ॥361॥

सर्वत्र पूर्वपुण्यानां देहिनां भुवनत्रये।
जयो यशः सुखं लक्ष्मीः कीर्तिः कान्तिश्च सर्वदा ॥362॥

इत्यादिकं समाकर्ण्य गणीन्द्रमुखपंकजात्।
सत्यभामा महाराज्ञी रुक्मिणी च विचक्षणा ॥363॥

त्रिधा वैरं परित्यज्य संसाराम्भोधिपातकम्।
परस्परं महाप्रीत्या ते द्वे सख्यौ बभूवतुः ॥364॥

येषां महामुनीन्द्राणां शुद्धचारित्रशालिनाम् ।
श्रुत्वा वचो महाक्रूराः सिंहाद्याः पशवोऽपि च ।।365।।

वैरभावं परित्यज्य जन्मजातं क्षणार्द्धतः ।
भवन्ति मानसे शुद्धाः मनुष्येषु च का कथा ।।366।।

सीरपाणिश्च संश्रुत्वा तेन श्रीमद्गणेशिना ।
प्रोक्तं प्रद्युम्नवृत्तान्तं शम्भवस्य च चेष्टितम् ।।367।।

सम्प्राप्य परमानन्दं भव्यैःवृन्दैः समन्वितः ।
तस्य श्रीवीरदत्तस्य ननाम चरणद्वयम् ।।368।।

सकलसुरसुरेंद्रैः पूज्यपादाब्जयुग्मो
मुनिवरशतसेव्यो भव्यलोकैकबन्धुः।
सकलविमलबोधध्वस्तमिथ्यान्धकारो
जयतु सततमुच्चैर्नेमिनाथो जिनेन्द्रः।।369।।

इतित्रिभुवनैकचूड़ामणिश्रीनेमिजिनपुराणेभट्टारकश्रीमल्लिभूषणशिष्याचार्य श्रीसिंहनन्दिनामांकितब्रह्मनेमिदत्तविरचितेश्रीप्रद्युम्नकुमारभवावलीरुक्मिणीमातुः संयोगशम्भवकुमारभवोत्पत्तिव्यावर्णनो नाम पंचदशोऽधिकारः ।।15।।

षोडशोऽधिकारः

अथ प्रणम्य तीर्थेशं नेमिनाथं जगद्गुरुम्।
पद्मनामा समापृच्छद्बलदेवः कृताञ्जलिः ।।1।।

भो स्वामिन्! वासुदेवस्य प्राज्यं राज्यं कियच्चिरम्।
वर्त्तते भुवनाधीशं[1] ब्रूहि मे गुणसागरः ।।2।।

तदा प्राह जगत्स्वामी केवलज्ञानभास्करः।
श्रीमन्नेमिजिनाधीशो विश्वलोकैकबान्धवः ।।3।।

श्रृणु त्वं भद्रकृष्णस्य राज्यं द्वादशवार्षिकम्।
वर्तते भो ततो नश्येत् शीघ्रं मद्यनिमित्ततः ।।4।।

द्वीपायनेन निर्मूलं पुरीद्वारवतीं द्रुतम्।
वह्निज्वालासहस्रेण क्षयं संयास्यति ध्रुवम् ।।5।।

कृष्णो जरत्कुमारस्य बाणेन प्राणहारिणा।
मृत्वा वने घने घोरं प्रथमां यास्यति क्षितिम् ।।6।।

तत्रैक सागरं दुखं भुक्तं दुःकर्मणार्जितम्।।
ततो निर्गत्य कालान्ते भारतेऽस्मिन् गुणोज्वलः ।।7।।

एषः तीर्थकरो देवो भविष्यति भवान्तकृत्।
केवलज्ञानसाम्राज्यः सुरासुरनमस्कृतः[2] ।।8।।

त्वं भो पद्मसुधीर्विद्धि तद्वियोगेन दुःखितः।
षण्मासेषु महाशोकी सम्भ्रमिष्यसि मोहतः ।।9।।

सिद्धार्थनामदेवस्य सारवाक्यामृतैर्हितैः।
त्यक्तः शोकं बुधैर्निंद्यं वेगतः परमार्थवित् ।।10।।

1.भवनाधीशं इति अ-ब प्रतयोः

2.सुरासुरनमकृतः इति द प्रतौ

संसारदेहभोगेषु विरक्तस्त्वं त्रिशुद्धितः ।
दीक्षामादाय नैर्ग्रंथी कृत्वा घोरं तपश्चिरम् ॥11॥

भूत्वा माहेन्द्रकल्पे च ततोत्कृष्टायुषः स्थितेः ।
चिरं कालं सुखं प्राप्य महापुण्यप्रभावतः ॥12॥

अत्रैव भारते क्षेत्रे समागत्य जगद्धितः ।
भूत्वा तीर्थंकरो देवो भव्याभोरुहभास्कर ॥13॥

केवलज्ञानमुत्पाद्य लोकालोकप्रकाशकम् ।
शेषकर्माणि निर्मूल्य सिद्धः शुद्धो भविष्यसि ॥14॥

इति श्रीनेमिनाथोक्तं व्यक्तं श्रुत्वा स्वमानसे ।
बलदेवो दृशं प्रापन्नान्यथा जिनभाषितम् ॥15॥

तथा जैनेश्वरी वाणी श्रुत्वा तत्रैव वेगतः ।
द्वीपायनोऽपि दीक्षित्वा प्राप्तो देशान्तरं तदा ॥16॥

नाम्ना जरत्कुमारोऽपि सिंहव्याघ्रैर्भयानकम् ।
कौशांवारण्यकं गत्वा भिल्लवेषेण सुस्थितः ॥17॥

मूढ़ाः कुर्वन्तु निर्बन्धान्नानोपायसहस्रकम् ।
श्रीमज्जिनेन्द्रचन्द्रोक्तं सत्यं स्यादेवभूतले ॥18॥

कृष्णोर्द्धचक्रवर्ती च श्रीमन्नेमिजिनोदितम् ।
श्रुत्वा वाक्यं जगत्सारं संसाराम्भोधिपारदम् ॥19॥

प्राप बद्धपापकृत्कष्टं नारकायुर्विशेषतः ।
संयमग्रहणे मन्दस्तं प्रणम्य जिनेश्वरम् ॥20॥

सारसम्यक्त्वसद्रत्नं सर्वसम्पद्विधायकम् ।
स्वीकृत्य परमानन्दान्मनो वाक्काययोगतः ॥21॥

नाहं शक्नोमि जैनेन्द्रीं दीक्षां स्वर्मोक्षदायिनीम् ।
लातुं कर्मग्रहग्रस्तो भो भव्याः! श्रूयतां वचः ॥22॥

वारयामि न कं चापि ये भव्याः शूरसत्तमाः ।
स्वर्गमोक्षसुखप्राप्त्यै परमानन्ददायिनः ॥23॥

श्रीमन्नेमिजिनेन्द्रस्य शरणं चरणद्वयम् ।
प्रयातुं[1] भवसन्तापः शमनैकघनाघनम् ॥24॥

इत्यादि घोषयामास सर्वस्त्रीबालकं प्रति ।
तत्समाकर्ण्य ते भव्याः सुभटाश्च चक्रिणः सुताः ॥25॥

प्रद्युम्नाद्यास्तदा ज्ञात्वा चित्ते संसारदुःस्थितिः ।
रुक्मिण्याद्याः महादेव्यो भक्त्या नत्वा हरिं प्रभुम् ॥26॥

बन्धूश्चापृच्छय सद्वाक्यैः परित्यज्य परिग्रहम् ।
श्रीमन्नेमिजिनेन्द्रस्य पादपद्मद्वयं द्रुतम् ॥27॥

प्रणम्य परया प्रीत्या मुनीन्द्रानपि युक्तितः ।
सम्प्रापुः संयमं जैनं सुरासुरसमर्चितम् ॥28॥

सत्यमासन्नभव्या ये जैनतत्वविदांवराः ।
तेषां श्रियं परित्यक्तुं साहसं न महीतले ॥29॥

ततः प्रद्युम्ननामासौ कामदेवो मुनिर्महान् ।
तथा जाम्बवती पुत्रः शम्भवाख्यो विचक्षणः ॥30॥

अनिरुद्धो महाधीरः प्रद्युम्नस्य सुतः सुधीः।
एते त्रयो जगच्चेतो हारिचारित्रमण्डिताः ॥31॥

1.प्रयंन्तु इति अ प्रतौ

उर्जयन्तगिरेः कूटत्रयं श्रित्वा महाधिपः ।
शुक्लध्यानप्रभावेण घातिकर्माणि कर्मठाः ॥32॥

निर्मूल्य केवलज्ञानं समुत्पाद्य जगद्धितम् ।
इन्द्रादिभिः समभ्यर्च्य पादपद्मद्वयस्ततः ॥33॥

शेषकर्मक्षयं कृत्वा समुच्छिन्नक्रियाख्यतः ।
ध्यानतो मुक्तिकान्तायाः सम्प्रापुः सुखमुत्तमम् ॥34॥

सर्वे तेऽष्टगुणाः सिद्धाः त्रैलोक्यशिखरे स्थिताः।
सन्तु मे सर्वकर्मारिविनाशाय जगद्धितः ॥35॥

तदा तत्र पुरे चक्री सम्यग्दृष्टिशिरोमणिः ।
महाधर्मानुरागेण मनुये परमादरात् ॥36॥

कस्मैचित्साधवे युक्त्या दानमौषधसंज्ञकम् ।
दत्वा तीर्थकरं नाम स्वीचकार महाद्रुतम् ॥37॥

युक्तं ये साधुवर्गस्य वैयावृत्त्यं सुभक्तितः ।
कुर्वन्ति ते महाभव्याः प्राप्नुवन्त्यमृतं पदम् ॥38॥

अथ श्रीनेमिनाथोऽसौ केवलज्ञानभास्करः ।
भव्यपुण्यप्रभावेण धर्मचक्रपुरस्सरम् ॥39॥

पूर्ववत्कनकाम्भोजः न्यस्तपादम्बुजद्वयः।
आकाशगामिभिर्व्योम्नि भूमिगैर्भुविगैर्युतः ॥40॥

गणैर्द्वादशभिश्चैवं विशुद्धवचनामृतैः ।
तर्पयन् भव्यसस्यौघान्[1] सुरासुरसमर्चितः ॥41॥

1.भव्यशस्यौघान् इति अ प्रतौ

प्रातिहार्यादिभिर्युक्तः परमानन्ददायकः ।
समस्ताश्चर्यसम्पन्नो नानादेशान् विहृत्य च ।।42।।

दुन्दुभीनां निनादेन जयकोलाहलस्वनैः ।
पल्लवाख्यं महादेशं सम्प्राप्तस्त्रिजगद्गुरुः ।।43।।

अत्रान्तरे प्रवक्ष्येऽहं संक्षेपेण यथा श्रुतम् ।
पाण्डवानां च सम्बंधं श्रुण्वन्तु सुधियो जनाः ।।44।।

कम्पिल्यानगराधीशो भूपतिर्द्रुपदाभिधः ।
राज्ञी दृढरथा तस्यां द्रौपदी तनयाऽभवत् ।।45।।

रूपसौभाग्यसम्पन्ना प्रसन्ना मानसे सदा ।
सा कन्या शोभते स्मोच्चैः स्वगुणैर्वा सुरांगना[1] ।।46।।

सम्पूर्णयौवनां वीक्ष्य तां पुत्रीं भूमिपोऽन्यदा ।
द्रुपदो मंत्रिणः प्राह श्रूयतां भो महाधियः ।।47।।

कस्मैदेयात्र कन्येयं तदा मंत्री जगाद च ।
पौदनाख्यपुरे राजा चन्द्रदत्तः प्रर्वतते ।।48।।

देविलाख्या[1] प्रिया तस्यामिन्द्रवर्मा सुतः सुधीः ।
तस्मै देया प्रभोः कन्या तदाकर्ण्य परोऽवदत् ।।49।।

भीमो नाम प्रभुर्लोके यत्प्रतापो विराजते ।
तस्मै कन्यामहारत्नं दीयते भो महीपतेः! ।।50।।

मंत्री प्राह तृतीयोऽपि महाभटशिरोमणिः ।
अर्जुनो निर्जितारातिस्तस्मै कन्या प्रदीयते ।।51।।

चतुर्थोऽपि जगौ मंत्री श्रृणु त्वं भो धराधिपः।।
स्वयंवरविधिः कार्यः कन्या तत्र यदृच्छया ।।52।।

1.सरांगनाः इति ब प्रतौ

2.देवेलाख्या इति ब-स प्रतयोः

कस्यचित्पुण्ययुक्तस्य कण्ठेऽसौ रत्नमालिकाम् ।
करोतु परमानंदान्न विरोधः परैः सहः ॥53॥

तत्समाकर्ण्य भूपेन द्रुपदाख्येन धीमता ।
सन्मान्यमन्त्रिणः सर्वान्नानादानैर्मनोहरैः ॥54॥

कारयित्वा महाभूरिसामग्रीं सुमनोहराम् ।
स्वयंवरविधिस्तेन प्रारब्धो महिमान्वितः ॥55॥

तदैव पांडवाः पञ्च युधिष्ठिरपुरस्सराः ।
महासुभटमुख्याश्च तथापि द्यूतदोषतः ॥56॥

दुर्योधनेन दुष्टेन कूटद्यूतप्रपञ्चतः ।
जित्वा ते भ्रातरः सर्वे पुरान्निर्घाटिताः क्रुधाः ॥57॥

लात्वा क्षितिं तदा सोऽपि स्वयं दुर्योधनः खलः ।
राज्यं कुर्वन् स्थितो लोके हा तृष्णा[1] पापकारणम् ॥58॥

वञ्चिता दुर्जनेनोच्चैर्गत्वा लाक्षालयं तदा ।
मत्वा तत्कपटं शीघ्रं पूर्वपुण्यप्रसादतः ॥59॥

सुरंगद्वारतो नष्टा हत्वा तत्रस्थ किल्विषम् ।
कम्पिल्यानगरीं प्रापुर्यत्रास्ते स स्वयंवरः ॥60॥

तस्मिन्महोत्सवे तत्र परे भूपाश्च सद्भटाः ।
छत्रचामरवादित्र सद्विभूत्या समागताः ॥61॥

विधाय मण्डपं तत्र विलसत्तोरणध्वजम् ।
नानारत्नसुवर्णोरुपुष्पमालाभिरुत्तमम् ॥62॥

---

1. महानृट् इति ब-स प्रतयोः

श्रीजिनेन्द्रमहापूजां कृत्वा स्तवनपूर्वकम् ।
दिव्याभरणवस्त्राद्यैर्मण्डितां निजकन्यकाम् ॥63॥

भूपः प्रवेशयामास सौभाग्यरसकूपिकाम् ।
द्रुपदः परमानंदात् स्वकीर्तिं वा गुणोज्वलाम् ॥64॥

सापि कन्या स्वरूपेण द्रोपदी भुवनोत्तमा ।
भानुभेव सती सर्वमनोऽम्भोजविकासिनी ॥65॥

प्रविश्य मण्डपं तत्र सिद्धार्थाख्यपुरोधः सः ।
विभूतिवर्णनोपेतोन्नामग्रहणपूर्वकम् ॥66॥

प्रोक्तान् क्षत्रियभूपालान्[1] पश्यन्ती निजलीलया ।
सर्वान् भूपान् परित्यज्य तत्र पुण्याधिकं पुनः ॥67॥

अर्जुनाख्यं समालोक्य तेषु रूपगुणोज्वलम् ।
शीघ्रं सम्भावयामास सन्तुष्टा रत्नमालया ॥68॥

अर्जुनस्य गले क्षिप्ता रत्नमालात्र कन्यया ।
द्रौपद्येति महानन्दैर्जातकोलाहलस्तदा ॥69॥

तन्निशम्य महीपालाः सर्वे ते नीतिवेदिनः[2] ।
द्रुपदाद्युग्रवंशोत्थाः क्षत्रियाः कुरुवंशजाः ॥70॥

अन्येऽपि धीधनाभूपाः कार्यं जातमिदं शुभम् ।
इत्यानन्देन संयुक्ताः सञ्जगुस्ते परस्परम् ॥71॥

ततो द्रुपदराजोऽपि परमानन्दनिर्भरः ।
विवाहविधिसर्वस्वं कृत्वा सद्दानमानतः ॥72॥

1.क्षत्रिभूपालान् इति अ प्रतौ

2. नीतवेदिनः इति ब-द प्रतयोः

अर्जुनाय तदा तस्मै तां कन्यां द्रौपदीं सतीम् ।
सन्ददौ[1] पूर्वपुण्येन जन्तोर्लाभः पदे पदे ॥73॥

इत्थं महोत्सवैस्तत्र सज्जनानन्ददायकैः ।
द्रौपदीपरिणीतोच्चैरर्जुनेन महीभुजा ॥74॥

तत्सत्यं भुवने ख्यातं ज्ञानिभिः सम्प्रकीर्तितम् ।
यो मूढो विपरीतत्वं वक्ति पापी स एव हि ॥75॥

ततस्ते पाण्डवाः सर्वे समागत्य निजं पुरम् ।
विभूत्या पुण्यतस्तत्र जिनस्तपनपूजनम् ॥76॥

कृत्वा भक्त्या महाभोगान् भुञ्जानाः सुखतः स्थितः ।
तदा तस्यार्जुनाख्यस्य भूपतेर्धर्मसन्ततेः ॥77॥

सुभद्रायां समुत्पन्नो महाभटशिरोमणिः ।
अभिमन्युर्नाम पुत्रो रूपसौभाग्यभाग्यभाक् ॥78॥

द्रौपद्यां पञ्चपञ्चालनामानश्च मनोहराः ।
सञ्जाताः स्वगुणैः ख्याताः पुत्राः परमपौरुषाः ॥79॥

तथा भुजंगशैलाख्यपुर्यां कीचकनाशनम् ।
स्थित्वा विराटभूपस्य मन्दिरे गूढवर्तितः ॥80॥

नाना रूपान्तरं कृत्वा रन्धनादिषु कर्मसु ।
पौरुषेण कृतं[2] यच्च गोमण्डलनिवर्तनम् ॥81॥

तत्सर्वं विस्तरेणोच्चैः[3] पुराणपरिवेदिभिः ।
ज्ञातव्यं पाण्डवानां हि चरित्रं चित्तरञ्जनम् ॥82॥

1.सदौ इति अ प्रतौ

2. कृतमन्यतरं इति ब-स प्रतयोः

3.तत्सर्वं विस्तरेणोच्चैः इति अ प्रतौ

तदा युधिष्ठिरो ज्येष्ठो भटकोटिशिरोमणिः ।
स्वबान्धवैः समायुक्तः कुरुक्षेत्रे महीतले ॥83॥

महायुद्धं विधायोच्चै र्जित्वा सर्वांश्च कौरवान् ।
सर्वस्य विषयस्यापि स्वयं भूत्वा क्षितीश्वरः ॥84॥

विभज्य स्वानुजैः सार्द्धं राज्यलक्ष्मीं मनोहराम् ।
भुञ्जानो विविधान् भोगान् पूर्वपुण्योदयात् स्थिता ॥85॥

एवं तत्र पुरे रम्ये तेषां साहसशालिनाम् ।
पाण्डवानां जिनेन्द्रोक्तं धर्मकर्मविधायिनाम् ॥86॥

यावत्कालो गलत्युच्चैर्महासौख्येन धीमताम् ।
तावद्वक्ष्ये कथामन्यां शृण्वन्तु सुधियो जनाः ॥87॥

अथ द्वादशवर्षाणां प्रान्ते प्राप्ते समीपकम् ।
कृष्णः सम्पातयामास मदिरां कानने द्रुतम् ॥88॥

तदैव तत्र सम्प्राप्तो मुनिर्द्वीपायनोऽपि च ।
भ्रान्त्या काले कियत्न्यूने स्थितस्तत्र पुराद्बहिः ॥89॥

तदा यादवभूपलकुमारैः कर्मयोगतः ।
गत्वा तत्र वने रन्तुं तृषाक्रान्तेश्च पापतः ॥90॥

पीत्वा मद्याश्रितं तोयं समागच्छद्भिराकुलैः ।
तद्विकारवशान्नष्टबुद्धिभिः स मुनिस्तदा ॥91॥

द्वीपायनो महाकष्टैः पीडितो नितरां तथा ।
यथा कोपाग्निं सन्तप्तः कृत्वा चित्ते निदानकम् ॥92॥

मृत्वा च भावनो देवो भूत्वा स्मृत्वा कुबोधतः ।
कुधीः पूर्वभवं वैरं महाकोपेन कम्पितः ॥93॥

वह्निना स क्षणार्द्धेन नानाहर्म्यावलीयुताम् ।
भस्मीचकार पापात्मा पुरीं द्वारवतीं तदा ॥94॥

धनैर्धान्यैर्जनैर्युक्तां पुरीद्वारवतीं द्रुतम् ।
स पापी दहति स्मैवं वह्निज्वालासहस्रकैः॥95॥

महाकोपेन सन्तप्तस्तादृशीमपि भूतले ।
धिक्कोपं पापदं कष्टं भवभ्रमणकारणम् ॥96॥

तदा तौ बान्धवौ पद्मकृष्णाख्यौ बलकेशवौ ।
विलोक्य मरणं कष्टं सज्जनानां सुदुःखितौ ॥97॥

महाशोकेन सन्तप्तौ गिरौ दावानलेन वा ।
देहमात्रेण सन्नष्टौ प्रविष्टौ काननं घनम् ॥98॥

यः पूर्वं सर्वशत्रूणां प्रतिमल्लोऽपि भूतले ।
त्रिखण्डेशो हरिर्नष्टः काननं शरणं गतः ॥99॥

न ध्वजश्चामरं नैव न पताका न सेवकाः ।
युक्तं पुण्यक्षये जन्तोः कावस्था नैव सम्भवेत् ॥100॥

तत्र सिंहादिभिर्युक्तं कानने सोऽपि केशवः ।
महाचिंतातुरः श्रांतस्तृष्णाशोषितविग्रहः ॥101॥

मूर्छया मोहितो गाढं दूत्या वा दण्डिनो द्रुतम् ।
सुप्तो वृक्षतले तत्र गतप्राणं धनोऽथवा ॥102॥

बलदेवोऽपि तद्दुखदुःखितो भ्रातृमोहतः ।
जलार्थं वेगतः क्वापि गतो घोरे वने भटः ॥103॥

तदा तत्र भ्रमन् पापी प्राप्तो भिल्लाकृतिः कुधीः
नाम्ना जरत्कुमारश्च विवेकविकलाशयः ॥104॥

ताडयामास तीक्ष्णेन दुर्जनेनैव दुर्जनः ।
निर्दयत्वेन बाणेन तं हरिं प्राणहारिणा ॥105॥

जन्तुः क्वापि प्रयात्येव कानने वा गिरौ जले ।
सर्वथा भाविदुखेन मुच्यते नैव भूतले ॥106॥

मृत्वा कृष्णः कृताघोऽसौ प्रथमं नरकं गतः ।
यत्र पापोदये दुखं नारकाणां निरन्तरम् ॥107॥

ततश्च बलदेवोऽपि तोयमादाय वेगतः ।
समागत्य तमालोक्य पतितं निश्चलं क्षितौ ॥108॥

जगाद केशवं तत्रोत्तिष्ठ भो बान्धव द्रुतम् ।
तोयं गृहाण भो भद्र! मुखं प्रक्षालय क्षितौ ॥109॥

कथं सुप्तोऽसि दुश्चिन्तो धूलीधूसरितांगकः ।
उत्तिष्ठोत्तिष्ठ भो धीर! किं त्वं रुष्टोऽसि मां प्रति ॥110॥

नैव ब्रूसे कथं भ्रातश्चिन्ता मे मानसे भवेत् ।
त्यक्त्वा निद्रां द्रुतं वाणीं देहि मे प्राणधारिणीम् ॥111॥

भो हरे! यातु सर्वं च धनं राज्यं पुरादिकं ।
यत्र त्वं वर्तसे कृष्णः महाभटशिरोमणिः ॥112॥

तत्र सर्वे भविष्यन्ति ते पदार्था मनोहराः ।
ततश्चिन्ता परित्यज्य शीघ्रमुत्तिष्ठ माधवः! ॥113॥

इत्यादिकैःप्रलापैश्च यदा नोत्तिष्ठति प्रभुः ।
तदा तेन कराब्जाभ्यां स्पृष्टो यावत् स बान्धवः ॥114॥

तावद्बाणव्रणाद्वीक्ष्य रुधिरं दुःखराशिदम् ।
सीरपाणिस्तदा गाढं दुखदावानलाहतः ॥115॥

चकार रोदनं तत्र निर्जने कानने घने।
हा हा हरे! तवेदानीं किं जातं भो! विरूपकम् ॥116॥

वज्रप्रायोऽपि ते कायः कथं केन विदारितः।
क्षुद्रकीटेन किं वज्रमहास्थम्भोपि लक्षितः ॥117॥

किं वा जरत्कुमारोऽपि पापी चात्र समागतः।
तेन वा किं हतो मेऽत्र बान्धवः सुभटाग्रणीः ॥118॥

इत्यादिकं महाशोकं स कुर्वन्मोहतो बलः।
स्नानं विलेपनं तस्य मृतकस्यापि मण्डनम् ॥119॥

नानाभरणवस्त्राद्यैश्चंदनाद्यैश्चकार च[1]।
तथा स्कन्धे समारोप्य तत्प्रेतं चेतनोज्झितम् ॥120॥

मृतं चापि महामोहाज्जीवं तं वा स्वमानसे।
मन्यमानो महापीठे पर्यटन् स निरन्तरम् ॥121॥

षण्मासेषु सुधीः सोऽपि बलदेवो महानपि।
सिद्धार्थनामदेवेन नानोपायशतैर्हितैः ॥122॥

सम्बोधितस्तदा ज्ञात्वा मानसे च हिताहितम्।
चन्दनागरुकर्पूरैश्चक्रे तद्दहनक्रियां ॥123॥

महावैराग्यसम्पन्नो विरक्तो विभवादिषु।
समागत्य सुधीः सोऽपि समवादिसृतिं परा ॥124॥

प्रणम्य परया भक्त्या श्रीमन्नेमिजिनेशिने।
पादपद्मद्वयं पूतं संसाराम्भोधितारणम् ॥125॥

---

1. भरणवस्त्राद्यैश्चकार च मनहरः इति ब प्रतौ, भरणवस्त्राद्यैश्चकार इति स प्रतौ

दीक्षामादाय पूतात्मा मुनिर्भूत्वा सुनिस्पृहः ।
कृत्वा तपो जिनेन्द्रोक्तं सुचिरं चतुरोत्तमः ॥126॥

आराधनां समाराध्य शुद्धचित्तश्चतुर्विधाम् ।
रत्नत्रयेणसंयुक्तः शल्यत्रयविवर्जितः ॥127॥

सन्यासेन दशप्राणान् परित्यज्य महाबलान्[1] ।
महर्द्धिकः सुरो भूत्वा कल्पे माहेन्द्रसंज्ञके ॥128॥

ज्ञात्वा सर्वं पुरावृत्तं सावधिज्ञानलोचनम् ।
प्रशस्य शासनं[2] जैनं स्वर्गमोक्षप्रदायकम् ॥129॥

देवदेवीः समाराध्य पादाम्भोजद्वयोर्मुदा ।
कुर्वन् जैनेश्वरीपूजां महाभक्तिपरायणः ॥130

ज्ञात्वा तत्वाम्बुजः[3] सौख्यं पञ्चेन्द्रियसमुद्भवम् ।
भुञ्जानः सर्वदा तत्र सुस्थितो गुणमण्डितः ॥131॥

भावितीर्थंकरः स्वामी योऽभवत्सुरसत्तमः ।
तद्गुणग्रामरत्नानां वर्णने कः क्षमो भुवि ॥132॥

श्रीमज्जिनेन्द्रधर्मेण महाविभवकारिणा ।
भवन्ति सुखिनो भव्याः सन्देहो नैव भूतले ॥133॥

हरेर्मरणमाकर्ण्य सर्वे ते पाण्डवास्तदा ।
निर्जिताखिलभूपालाः प्रसिद्धाः भुवनत्रये ॥134॥

1.महाबलान् इति द प्रतौ

2.प्रशस्यशसनं इति अ प्रतौ

3.तत्वव्रजः इति अ-द प्रतयोः

स्वामिबन्धुवियोगेन दुःखिता मानसेतरा।
त्यक्तराज्यमहाभाराः संसृतेर्भीतचेतसः ॥135॥

शीघ्रमागत्य तीर्थेशं श्रीमन्नेमिजिनेश्वरम्।
सम्प्राप्य शरणं भक्त्या तं समभ्यर्च्य वस्तुभिः ॥136॥

जलाद्यैः केवलज्ञानभास्करं भुवनोत्तमम्।
स्तोतुं समुद्यताः सर्वे विनयानतमस्तकाः ॥137॥

त्वं देवत्रिजगत्स्वामी सुराधीशार्चितक्रमः।
केवलज्ञानसत्तेजा मिथ्यातिमिरभास्करः ॥138॥[1]

त्वं त्राता त्वं पिता स्वामिस्त्वं बन्धुर्भव्यदेहिनाम्।
त्वं संसारमहाव्याधेः स्फेटनैकभिषग्वरः ॥139॥

त्वं भो नेमे! महाधर्मोपदेशैर्दुःखनाशनैः।
हस्तावलम्बने धीरो जन्तूनां पततामधः ॥140॥

त्वं शस्त्रादिविनिर्मुक्तः क्षमावान्नपि भूतले।
महामोहारिजेताभूः सावधानो जगद्धितः ॥141॥

रागद्वेषविनिर्मुक्तस्त्वमेव भुवनत्रये।
यतः संसारवाराशेः पारं प्राप्तोऽसि निर्मलम् ॥142॥

अहो देवो जिनाधीशो! नेमिनाथजगद्गुरो!
त्वमेव कामशत्रुघ्नस्त्वमेव भवतारकः ॥143॥

विमुक्तः सर्वदोषैरघैर्यतस्त्वं भुवनत्रये।
ततस्त्वमेव सम्पूज्यो वन्दनीयस्त्वमेव वै ॥144॥

---

1. अ प्रतौ अनुपलब्धः

अतस्ते शरणं प्राप्ता वयं संसारदुःखतः ।
त्राहि त्वं परमानन्दकारणं त्वां श्रितानिमान् ॥145॥

इति स्तुत्वा महाभक्त्या[1] तं जिनं त्रिजगद्गुरुम् ।
पृच्छन्ति स्म पुनर्नत्वा ते स्वकीयं भवान्तरम् ॥146॥

तदा सर्वगुणाधीशो नेमिनाथो जगद्धितः ।
सञ्जगाद जगत्पूज्यो भुवनैकपितामहः ॥147॥

दिव्यभाषापतिर्दिव्यः प्रव्यक्तं महिमास्पदम् ।
श्रूयतां भो महाभव्या! द्वीपे जम्बुद्रुमांकिते ॥148॥

क्षेत्रेऽस्मिन् भारते रम्ये देशे ख्यातेंऽगनामनि ।
चम्पापुरीपतिर्जातो मेघवाहनसंज्ञकः ॥149॥

कुरुवंशसमुत्पन्नो धार्मिको नीतितत्त्ववित् ।
तत्रैव च महापुर्यां सोमदेवो द्विजोत्तमः ॥150॥

सोमिला ब्राह्मणी तस्य सती सद्गुणमण्डिता ।
तयोः पुत्रास्त्रयो जाताः सर्वशास्त्रविचक्षणाः ॥151॥

सोमदत्तोऽभवज्ज्येष्ठो द्वितीयः सोमिलः सुधीः ।
तृतीयः सोमभूतिश्च सोमवन्निर्मलाशयः ॥152॥

एतेषां मातुलस्याग्निभूतेस्तिस्रोऽभवन्सुताः ।
अग्निलायां महारूपं सम्पदाभिर्विराजिता ॥153॥

धनश्रीः[2] श्रीरिवोत्कृष्टा मित्रश्रीश्च परा मता ।
नागश्रीर्नामतश्चेति तास्तिस्रः सुमहोत्सवैः ॥154॥

अग्न्यादिभूतिना तेन मातुलेन यथाक्रमम् ।
तेषां समर्पिताः कन्याः विवाहविधिना सुखम् ॥155॥

---

1. श्रुत्वा इति ब-द प्रतीनाम्
2. धनेश्रीः इति ब-स प्रतयोः

धनश्रीः सोमदत्तस्य मित्रश्रीः सोमिलस्य च ।
सोमभूतेः प्रिया जाता नागश्रीश्च कनीयसी ॥156॥

एवं सुखेन सर्वेषां तेषां काले गलत्यलम् ।
सोमदेवो द्विजो धीमान् सर्वविप्रशिरोमणिः ॥157॥

धार्मिकः प्राप्य वैराग्यं कारणं निर्मदो हृदि ।
जिनेन्द्रचरणाम्भोजद्वयं नत्वाऽभवन्मुनिः ॥158॥

अथैकदा गृहायातं भिक्षार्थं कर्मयोगतः ।
नाम्ना धर्मरुचिं वीक्ष्य मुनीन्द्रं भक्तिनिर्भरम् ॥159॥

तं प्रतीक्ष्य जगौ ज्येष्ठः सोमदत्तो दयार्द्रधीः ।
नागश्री दीयतामस्मै मुनये दानमित्यलम् ॥160॥

सा पापिनी तदा चित्ते ममैव प्रेषणं सदा ।
ज्येष्ठो वक्ति कुपित्वेति तस्मै पात्राय धीमते ॥161॥

विषेण मिश्रिताहारं ददौ प्राणप्रहारकम् ।
भाविदुर्गतिभाक् प्राणी करोत्येवं कुकर्मदम्[1] ॥162॥

मुनिर्धर्मरुचिः सोऽपि व्याप्तो वेदनया तथा ।
सन्यासेन सुधीः प्राप्तः स्थानमन्त्यमनुत्तरम् ॥163॥

मूढप्राणी करोत्येवं वृथा साधुप्रपीडनम् ।
साधुः स्वपुण्ययोगेन सम्प्रयात्येव सद्गतिम् ॥164॥

ताड्यते ताप्यते स्वर्णं घृष्यतेऽपि परैस्तराम् ।
तथापि स्वगुणैस्तच्च स्यात्सतां मूर्ध्नि मण्डनम् ॥165॥

सोमदत्तादयस्तेऽपि भ्रातरो द्विजसत्तमाः ।
ज्ञात्वा नागश्रियः[2] पापं महादुःखेन पीडिताः ॥166॥

1.कुकर्मकम् इति अ प्रतौ
2.नागश्री इति अ प्रतौ

लज्जिता लोकमध्ये च मुखं दर्शयितुं तदा।
नैव क्षमाः परित्यज्य त्रयस्ते सम्पदादिकम् ॥167॥

महावैराग्यभावेन विरक्ताः संसृतेस्तराम्।
समीपे वरुणाख्यस्य मुनीन्द्रस्य सुभक्तितः ॥168॥

दीक्षामादाय जैनेन्द्रीं भवभ्रमणनाशिनीम्।
सञ्जाताः मुनयो धीरास्तपश्चरणतत्पराः ॥169॥

गुणवत्यर्यिका पार्श्वे धनमित्रश्रियौ तदा।
ब्राह्मण्यौ संयमं लात्वा चक्रतुस्ते महातपः ॥170॥

एवं पञ्चापि ते जीवाः समाराध्य जिनोदितम्।
आराधनां चतुर्भेदं प्रान्ते सन्यासपूर्वकम् ॥171॥

स स्मरन्तो जिनं देवं मृत्वा सर्वे समाधिना।
देवाः सामानिकाः शीघ्रं मरणाच्युतकल्पयोः ॥172॥

सम्बभूवुः स्वपुण्येन द्वाविंशत्यब्धिजीविनः।
ज्ञात्वा पूर्वभवं कृत्यं सन्तुष्टामानसेतराम् ॥173॥

श्रीमज्जिनेन्द्रः पूजादौ रसिकास्ते निरन्तरम्।
त्रोत्पन्नमहाभोगान् स्वपञ्चेन्द्रियतर्पकान् ॥174॥

भुञ्जानाः सुचिरं कालं सुस्थिताः स्नेहिनः सदा।
सत्यं जिनेन्द्रधर्मेण केन वा सुखिनो भुवि ॥175॥

नागश्रीरपि पापेन पञ्चमं नरकं गता।
तत्र दुःखं चिरं प्राप्य ततो निर्गत्य भीषणः ॥176॥

सर्पः स्वयम्प्रभद्वीपे भूत्वा दृष्टिविषस्ततः ॥
सोऽपि मृत्वा स्वपापेन द्वितीयं नरकं श्रितः ॥177॥

तत्रापि दुःखमासाद्य सागरत्रयमुत्कटम् ।
पापिनो भ्रमणं नित्यं भवत्येवं भवार्णवे ॥178॥

तस्मादागत्य संसारे दुःखभारे निरन्तरम् ।
पुनः कष्टात्परिभ्रम्य त्रसस्थावरयोनिषु ॥179॥

सागरद्वयमत्यन्तदुखदं कालमुल्वणम् ।
ततश्चम्पापुरे भूत्वा चाण्डाली कर्मयोगतः ॥180॥
समाधिगुप्तनामानं मुनीन्द्रं वीक्ष्य सा तदा ।
सम्प्रणम्य जिनेन्द्रोक्तं धर्मं श्रुत्वा सुखप्रदम् ॥181॥

मद्यमांसमधुत्यागं कृत्वा मृत्वा[1] च पुण्यतः ।
तस्मिंश्चंपापुरे नाम्ना सुबंधोर्वणिजः स्त्रियाम् ॥182॥

धनदेव्यां सुता जाता सुकुमारीति विश्रुता ॥
दुर्गन्धदेहिका पूर्वपापशेषेण वासिता ॥183॥

तत्रैव नगरे वैश्यो धनदेवो विचक्षणः ।
तत्प्रिया शोकदत्ताख्या तयोः पुत्रौ मनोहरौ ॥184॥

ज्येष्ठोऽभूज्जिनदेवाख्यो जिनदत्तो द्वितीयकः ।
तौ द्वौ सुखेन सञ्जातौ बान्धवौ नवयौवनौ ॥185॥

एकदा बन्धुभिस्तस्य जिनदेवस्य हेतवे ।
गृह्यते सुकुमारी सा किलेत्याकर्ण्य[2] वेगतः ॥186॥

तद्देहदुष्टदुर्गन्धाद्भीत्वासौ जिनदेववाक् ।
सुव्रताख्यं मुनिं नत्वा मुनिर्जातो विचक्षणः ॥187॥

जिनदत्तो लघुः सोऽपि बन्धुवर्गाग्रहेण च ।
तां कन्यां परिणीयांश्च सुकुमारीं सुदुःस्सहाम् ॥188॥

सर्पिणीमिव चित्ते च मन्यमानो विरक्तधीः ।
स्वप्ने वा न स्पृशत्येनां नैव वक्ति कदाचन ॥189॥

सापि कन्या तदा चित्ते खेदखिन्ना सती सदा ।
निन्दति स्म स्वदौर्गन्ध्यं दौर्भाग्यं दुष्टकर्म च ॥190॥

सन्तप्तमानसे गाढं चिन्तयन्ती विपुण्यतां ।
युक्तं पापोदये जन्तोः पश्चात्तापो भवत्यलम् ॥191॥

कदाचित्सुकुमारी सा सोपवासां स्वमन्दिरे ।
समायातां समालोक्य सुव्रतां क्षान्तिकां शुभाम् ॥192॥

आर्यिकाभिः समायुक्तां तां प्रणम्य सुभक्तितः[1] ।
सञ्जगादेति भो मातः! किमेते क्षान्तिके शुभे ॥193॥

जिनोक्तं द्वे तपः प्राप्ते हेतुना केन निर्मलम् ।
तन्मे त्वं करुणां कृत्वा ब्रूहि भो! कारणं शुभम् ॥194॥

सुव्रता तन्निशम्योच्चैः सार्यिका प्राह भो सुते!
श्रृणु त्वं वच्मि ते पूते स्वर्गे सौधर्मसंज्ञके ॥195॥

पुरा जन्मनि देव्यौ द्वे सौधर्मेन्द्रस्य वल्लभे ।
इमे नन्दीश्वरद्वीपे जिनपूजामहोत्सवे ॥196॥

गते धर्मानुरागेण तत्र प्रोक्ता परस्परम् ।
प्राप्य सारं मनुष्यत्वं करिष्यावस्तपो ध्रुवम् ॥197॥

आवामकुर्व तां चेति प्रतिज्ञां सुदृढां ततः ।
प्रान्ते मृत्वा च साकेतनगरे सम्पदाभृते ॥198॥

1.सर्वं इति स प्रतौ
2.कलात्याकर्ण्य इति अ

श्रीषेणभूपतेः कान्ता श्रीकान्तानाम विश्रुता ।
तस्यामेते सुते जाते रूपसौभाग्यमण्डिते ।।199।।

पूर्वाभूद्धरिषेणाख्या श्रीषेणा च पराभवत् ।
एकदा यौवनं प्राप्य वनं वा कामभूपतेः ।।200।।

महाविभूतिसंयुक्ते सत्स्वयंवरमण्डपे ।
एते स्थिते च वादित्रैर्मिलिते सज्जने जने ।।201।।

स्मृत्वा पूर्वभवे प्रोक्तं विरक्ते भवभोगके ।
बन्धून् विसर्ज्य सद्वाक्यैर्दीक्षां जैनीं समाश्रिते ।।202।।

इत्याकर्ण्य तदा सा च सुकुमारी विरक्तधीः ।
तत्समीपे समादाय दीक्षां पश्चाद्वनेन्यदा ।।203।।

वेश्यां वसन्तसेनाख्यां प्रार्थ्यमानां विटैर्जनैः[1] ।
वीक्ष्यैवं मे च सौभाग्यं भूयादिति निदानकम् ।।204।।

कृत्वा बुधैर्जनैर्निन्द्यं प्रान्ते मृत्वा तपोबलात् ।
प्रागुक्तस्सोमभूतेश्च देवी जाता च्युते दिवि ।।205।।

दत्वा चिन्तामणिं दिव्यां जगच्चेतोऽनुरञ्जनम् ।
प्राप्यते किं न काचस्य शकलं चाल्पमूल्यकाम् ।।206।।

श्रूयतां पण्डु पुत्रा! भो स्वर्गलोके स्वपुण्यतः ।
ते भ्रातरस्त्रयो भुक्ताः सुखं चोत्कृष्टजीवितम् ।।207।।

ततश्चागत्य सञ्जाता कुन्त्यां रत्नत्रयोपमाः ।
युधिष्ठिरो भवान् ज्येष्ठो द्वितीयो भीमनामभाक् ।।208।।

1.सुतभक्तितः इति द प्रतौ

अर्जुनाख्यस्तृतीयोऽपि तथा संश्रूयतां पुनः ।
धनमित्रश्रियौ पूर्वं सुरौ तत्रैव पुण्यतः ॥209॥

भूत्वा चात्र समागत्य मद्रीकुक्षीसमुद्भवौ ।
नकुलः सहदेवश्च सञ्जातौ सुभटोत्तमौ ॥210॥

ते यूयं पाण्डवाः पञ्चकलागुणविशारदाः[2] ।
सञ्जाताः पूर्वपुण्येन सुभटाः धर्मवत्सलाः ॥211॥

दुर्गन्धा सुकुमारी सा सुरी भूत्वा तपोबलात् ।
ततश्च्युता[3] च कम्पिल्यापुरेशस्य महीपतेः ॥212।

द्रुपदाख्यस्य भार्यायां द्रौपदीति सुताजनि ।
सती दृढरथायां वै कन्यागुणविराजिता ॥213॥

सैषार्जुनस्य भूपस्य सञ्जाता प्राणवल्लभा ।
रूपादिगुणसम्पन्ना धार्मिका परमोदया ॥214॥

इति श्रीनेमिनाथोक्तं श्रुत्वा ते पाण्डवास्तराम् ।
सन्तुष्टास्तं जिनं नत्वा महाभक्त्या जगद्धितम् ॥215॥

दीक्षां जैनीं समादाय पञ्च वा परमेष्ठिनः ।
सज्जनैर्बहुभिः सार्द्धं क्षमागुणसमन्वितैः ॥216॥

बभूवुर्मुनयो धीरास्तपश्चरणचञ्चवः ।
निःस्पृहाः सर्वथा सर्ववस्तुदेहादिकेषु च ॥217॥

1.वटैर्जनैः इति अ प्रतौ

2. पंचकुलागुणविशरदाः इति ब प्रतौ

3. ततश्च्युत्वा इति अ प्रतौ

त्रयाणां जननी कुन्ती तथा चार्जुनवल्लभा ।
सुभद्रा द्रौपदी चेति तिस्रस्ताः कुलदीपिकाः ॥218॥

रात्रिमत्यार्यिकापादमूले दीक्षां समाश्रिताः ।
नाना तपश्चिरं कृत्वा जिनैः प्रोक्तं सुखप्रदम् ॥219॥

शास्त्राभ्यासं विधायोच्चैः श्रीजिनोक्तं शुभाशयाः ।
रागद्वेषविनिर्मुक्ताः प्रान्ते सन्यस्य निर्मदाः ॥220।

तिस्रोऽपि षोडशे स्वर्गे सुखं प्रापुर्मनोहरम् ।
तस्मादागत्य कालान्ते नरत्वं प्राप्य निर्मलम् ॥221॥[1]

जिनेन्द्रतपसा शीघ्रं कृत्वा कर्मारिखण्डनम् ।
केवलज्ञानमुत्पाद्य मुक्तिं यास्यंति निश्चितम् ॥222॥

पञ्चापि पाण्डवास्तैः वै मुनयो भक्तिनिर्भराः ।
श्रीमन्नेमिजिनेन्द्रेण सार्द्धं सारमहीतले ॥223॥

कृत्वा विहारमत्युच्चैस्तपसा शुद्धमानसाः ।
शत्रुञ्जयं समागत्य पवित्रं पर्वतं ततः ॥224॥

दर्शनज्ञानचारित्ररत्नत्रयविराजिताः[2] ।
योगमातपमादाय सुस्थिताः ध्यानतत्पराः ॥225॥

तत्र स्थितास्तदा पञ्चनिश्चलास्ते मुनीश्वराः ।
शोभन्ते स्म स्थिराः पञ्चमेरवो वा समागताः ॥226॥

श्रीमन्नेमिजिनेन्द्रोक्तं सप्ततत्वोरुविस्तरम् ।
जीवाजीवादिकं चित्ते भावयन्ते निरन्तरम् ॥227॥

1.श्लोकोऽयं स प्रतौ अनुपलब्धः

2.विराजता इति स प्रतौ

शत्रुमित्रसमाश्चित्ते पवित्रे देहनिस्पृहाः ।
जीवकर्मपृथग्भागं[1] स्वर्णपाषाणयोरिव ॥228॥

कृत्वा निजात्मतत्वे च सुस्थिताः परमार्थतः ।
तपस्तापेन तप्ताश्च चन्द्रवच्छीतलाशयः ॥229॥

तदा तत्र समायातो दुर्योधनमहीपतेः ।
पापी कुर्यवरो नाम भागिनेयो दुराशयः ॥230॥

तान् मुनीन्द्रान् समालोक्य मातुलस्य वधे तदा ।
स्मृत्वा चित्ते महाक्रुद्धो मारयामीति वेगतः ॥231॥

तान् समावेष्ट्य सैन्येन समन्तान्मुनिसत्तमान् ।
मुकुटांगदकेयूरकुण्डलादीनि दुष्टधीः ॥232॥

वह्नौ लोहमयान्युच्चैः सन्तप्तानि सतामसः ।
तेषां दिव्यशरीरेषु यथा स्थानं निधाय सः ॥233॥

उपसर्गं मुनीन्द्राणां सञ्चक्रे पापमण्डितः[2] ।
भाविदुर्गतिदुःखानां पापिनामीदृशी मतिः ॥234॥

जित्वोपसर्गकं[3] घोरं कातराणां सुदुःसहम् ।
शुक्लध्यानाग्निना तेषु कौन्तेयाः ये मुनीश्वराः ॥235॥

त्रयस्ते सर्वकर्माणि शत्रुभूतानि देहिनाम् ।
भस्मीकृत्य प्रवेगेण सम्प्रापुर्मोक्षमक्षयम् ॥236॥

नकुलः सहदेवश्च मुनीन्द्रौ शेषपुण्यतः ।
पञ्चमानुत्तरं प्राप्तौ सञ्जातौ सौख्यसागरौ ॥237॥

1.जीवकर्मपृथग्भावं इति स प्रतौ

2. पापपण्डितः इति अ-ब प्रतयोः

3. जितोपसर्गकं इति द प्रतौ

पञ्चापि पाण्डवास्ते मे मुनीन्द्राः भुवनोत्तमाः ।
कुर्वंतु कर्मनिर्मूलं वंदिताः संस्तुताः सदा ॥238॥

अथ श्रीनेमिनाथोऽसौ केवलज्ञानभास्करः ।
सर्वदेवेन्द्रनागेन्द्रनरेन्द्रार्चितपंकजः ॥239॥

वर्षाणां षट्शतान्युच्चैर्नवांकद्वितयेन च ।
युतानि नवभिर्मासैश्चतुर्भिश्च दिनैस्तथा ।240॥

धर्मोपदेशपीयूषैर्भव्यान् सन्तर्पयन् सुखम् ।
स्वर्गमोक्षमहामार्गं प्रकाश्य भुवनोत्तमः ॥241॥

उर्जयन्तं समागत्य पर्वतं महिमास्पदम् ।
मासमेकं निरुद्ध्योच्चैर्योगं योगविदांवरः ॥242॥

सार्द्धं पञ्चशतैः स्वामी मुनीनां ज्ञानचक्षुषाम् ।
त्रयस्त्रिंशत्समायुक्तैः पवित्रैर्ध्यानतत्परैः ॥243॥

आषाढमासे शुक्ले पक्षे वै सप्तमीतिथौ ।
पूर्वरात्रे पवित्रात्मा चित्रानक्षत्रसंयुते ॥244॥

चतुर्थशुक्लध्यानेन गुणस्थाने चतुर्दशे ।
पञ्चलघ्वक्षरैः कालस्योपान्त्यसमये शुभे ॥245॥

द्वासप्ततिं प्रकृतीस्ताः क्षयं नीत्वा तथांतिके ।
निहत्य समये शीघ्रं त्रयोदश पुनश्च ताः ॥246॥

अघातिकर्मसन्दोहमेवं हत्वा समुज्वलः ।
एकेन समयेनोच्चैः सिद्धो बुद्धो गतः शिवम् ॥247॥

सम्यक्त्वादिगुणैः शुद्धैः प्रसिद्धैरष्टभिर्युतः ।
त्रैलोक्यशिखरारूढः[1] स सिद्धो मे शिवं कुर्यात् ॥248॥

---

1. त्रैलोक्यशिषरारूढः इति अ-स प्रतयोः

तदैवागत्य देवेन्द्राः रुद्रभक्तिसमन्विताः ।
देवदेवांगनोपेताः परैर्भव्यैश्च संयुताः ॥249॥

तडिद्दामेव नष्टं च कृत्वा देहं जिनेशिनः ।
स्वेषां पुण्यार्थमुत्कृष्टं महाधर्मानुरागतः ॥250॥

चन्दनागुरुकर्पूरैः सुगंधबहुवस्तुभिः ।
अग्नीन्द्रमुकुटोत्पन्नपावकेन[1] महाधियः॥251॥

विधाय दहनं तस्य सम्प्रणम्य पुनः पुनः ।
अहो स्वामिन्! पवित्रस्त्वं श्रीमन्नेमिजिनेश्वरः ॥252॥

त्वं तीर्थेशो जगत्स्वामी सर्वकर्मारिमर्मभित् ।
सिद्धो बुद्धो विशुद्धात्मा ज्ञाता दृष्टा जगद्धितः ॥253॥

सञ्जातोसि यथा देव! त्वं निरञ्जनसौख्यभाक् ।
साकारोऽपि निराकारः केवलं शुद्धचेतनः[2] ॥254॥

तथा श्रीमत्प्रसादेन भवामो वयमप्यहो ।
इति स्तुतिसहस्रेण तं स्तुत्वा[3] भुवनोत्तमम् ॥255॥

तद्भस्मप्रीतितो[4] लात्वा पवित्रं पापनाशनम्।
स्वललाटे शिरोदेशे हृदये च भुजद्वये ॥256॥

संविधाय ततः कृत्वा नर्त्तनं च विचक्षणः ।
देवैश्चतुर्निकायैश्च संयुक्ताः शुभलक्षणाः ॥257॥

एवं नेमिजिनेन्द्रस्य जगच्चूडामणेः प्रभोः
कल्याणं पंचमं कृत्वा भक्तिभारेण संयुताः ॥258॥

---

1. पावनेक इति स प्रतौ
2. शुद्धचेतसः इति स प्रतौ
3. श्रुत्वा इति अ प्रतौ
4. तद्भस्मप्रतितो इति ब प्रतौ

संस्मरन्तो गुणान् जिष्णोस्त्रैलोक्यप्राणिशर्मदान् ।
स्वं स्वं स्थानं ययुः पुण्यं समादाय सुखप्रदम् ॥259॥

स श्रीनेमिजिनः स्वामी पञ्चकल्याणनायकः ।
पूजितो वन्दितो नित्यं स्वभक्तिं मे ददात्वलम्[1] ॥260॥

यया सम्प्राप्यते शीघ्रं सुखं स्वर्गापवर्गजम् ।
किं परैर्बहुभिः क्लेशैस्तां विनात्र महीतले ॥261॥

स एव भुवने धन्यः स एव गुणसागरः ।
यस्य चित्ते स्थिरा नित्यं भक्तिः श्रीमज्जिनेशिनाम् ॥262॥

इति श्रीमन्महावीरसमवादिसृतौ किल ।
गौतमस्वामिना प्रोक्तं पुराणे श्रीजिनेशिनाम् ॥263॥

श्रीमन्ननेमिजिनेन्द्रस्य पुराणं भुवनोत्तमम् ।
श्रुत्वा श्रीश्रेणिको राजा संतुष्टो मानसेतराम् ॥264॥

महापुराणं तद्वीक्ष्य मयापि स्वल्पमेधसा ।
श्रीमन्नेमिजिनेन्द्रस्य केवलं भक्तिभारतः ॥265॥

प्रसिद्धैः संस्कृतश्लोकैः पुराणमिदमुत्तमम् ।
संक्षेपेण कृतं भव्यदेहिनां सौख्यकारणम् ॥266॥

श्रीमज्जिनेन्द्रमुखाम्भोजसमुत्पन्ना सरस्वतिः ।
भुक्तिमुक्तिप्रदा मातस्त्वं क्षमां कर्तुमर्हसि ॥267॥

यत्किंचिद्बालवत्प्रोक्तं मया भो देवि! साम्प्रतं।
तन्मेऽत्र तव प्रसादेन भूयात्कर्मक्षयप्रदम् ॥268॥

आगमं शब्दशास्त्रं च नैव जानामि किञ्चनम् ।
कथासम्बंधमात्रेण मयेदं रचितं शुभम् ॥269॥

1.ददत्वलम् इति ब-स प्रतयोः

ये चात्र साधवो धीराः जिनेन्द्रवचने रताः ।
कृत्वा कृपामिदं शास्त्रं शोधयन्तु विचक्षणाः ॥270॥

श्रीमन्नेमिजिनेन्द्रस्य सत्पुराणं सुखप्रदम् ।
वार्त्तयापि श्रुतं प्रोक्तं करोति सुखसन्ततिः ॥271॥

यदा भानोः करोत्येव दूरस्थस्य महीतले ।
विकासं पद्मराशीनां सुप्रभैव निरन्तरम् ॥272॥

एवं ज्ञात्वा महाभव्या ये श्रृण्वन्ति पठन्ति च
श्रीमन्नेमिजिनेन्द्रस्य पुराणं शर्मकारणम् ।॥273॥

पाठयन्ति परानुच्चैर्लेखयन्ति लिखन्ति च ।
भावयन्ति च ये नित्यं मानसे भक्तितत्पराः ॥274॥[1]

प्राज्यं राज्यं विवेकत्वं मान्यतां भुवनत्रये ।
स्वर्गमोक्षं क्रमेणोच्चैः प्राप्नुवन्ति सुवेगतः ॥275॥[2]

धर्मशास्त्रमिदं मत्वा शर्मकोटिप्रदायकम् ।
भावयन्तु सदा भव्यास्ततो भक्त्या निरन्तरम् ।276॥

श्रीमन्नेमिजिनेन्द्रस्य पुराणमिदमुत्तमम् ।
शक्त्या भक्त्या श्रितं कुर्यात्केवलावगमं मम ॥277॥

(शार्दूलविक्रीडित)

यः स्वामी सकलामरेन्द्रनिकरैर्भक्त्या सदाभ्यर्चितो ।
मोहध्वान्तविनाशनैकचतुरः सत्केवलज्ञानभाक् ।
भव्याम्भोरुहभास्करो गुणनिधिर्दोषैर्विमुक्तः सदा ।
स श्रीनेमिजिनेश्वरो भवहरो भूयात्सतां शर्मदः ॥278॥

1.अन्तिम पंक्तौ अ प्रतौ अनुपलब्धः

2.तेमनोवाछितं वस्तुलक्ष्मीकीर्ति.....

पुत्रमित्रकलत्रादिसंपदाशर्मदायिनीम् ॥ इति ब प्रतौ अतिरिक्तः

यश्चिन्तागतिनामभाक् खगपतिः स्वर्गे चतुर्थे सुरः
तस्मादप्यपराजितो नरपतिर्जातोऽच्युतेन्द्रः सुधीः ।
सम्भूत्वा भुवि सुप्रतिष्ठनृपतिः पश्चाज्जयन्ते सुरः ।
सोस्मान्नेमिजिनेश्वरो हरिकुलव्योमैकचन्द्रोवतात् ॥279॥

यज्ज्ञानं भुवनं समस्तमखिलैर्जीवादिभिः सम्भृतम् ।
ज्ञात्वा सूक्ष्मतया ततोऽपि परतो ज्ञेयं न किंचिच्च खे ।
भूरित्वाद् भुवनत्रये प्रविलसत्यत्रैव वल्ली यथा ।
स श्रीनेमिज्जिनो जगत्त्रयगुरुः कुर्यात्सतां मंगलम् ॥280॥

(वसन्ततिलका)

पूर्वं सुभानुरनुपूर्वादिविप्र भूत्वा
विद्याधरो जनिसुरस्तु चतुर्थकल्पे ।
शंखो वणिक्यति सुतोऽनुमहादिशुक्रे ।
देवो बलोऽपि नवमोऽथचतुर्थकल्पे ॥281॥

जातोऽमरः परमसौख्ययुतो जिनेन्द्रः
भक्त्या प्रसिद्धमहिमास्ति गुणैः समेतः ।
अद्यापि धर्मनिलयो तु समागतश्च ।
तीर्थंकरो भवहरो हि भविष्यतीह ॥282॥

भूत्वा पुरामृतरसायननामकोऽत्र ।
हत्वा मुनिं च गतवान्नरकं तृतीयम् ।
संसारघोरगहने सुचिरं भ्रमित्वा ।
यक्षाभिधो गृहपतिस्तदनुप्रभूत्वा ॥283॥

निर्नामको नृपसुतोऽजनि धर्मतोऽभूत् ।
देवो महान्नपि गुणैर्दशमे च कल्पे ।
तस्मान्निदानवशतोऽजनि कृष्णनामा ।
भुक्तार्द्धचक्रिविभवं भरतेऽत्र पुण्यात् ॥284॥

हत्वारिपूनपि बहूनिह निष्ठुरोऽपि ।
चाणूरमल्लभटकंसजरादिसन्धान् ।
नत्वा जगत्त्रयगुरुं जिनपुंगवं वै ।
श्रीनेमिनाथमातुलं भुवनैकबन्धुः ॥285॥

श्रुत्वा जिनेन्द्रगदितं भुवि सारधर्मम् ।
संसारपारकरणं सुदयादितारम् ।
लात्वा जगत्त्रयहितं जिनपादमूले ।
सम्यक्त्वरत्नममलं भवदुखनाशम् ॥286॥

बद्ध्वान्त्यनाम सुखदं भुवनप्रपूज्यम् ।
बद्धायुषोऽपि वशतो गतवांश्च धर्मम् ।
आगत्य सोऽपि नरकादिह तीर्थनाथो ।
दिव्यो भविष्यति सुरेन्द्रसमर्चनीयः ॥287॥

तस्मात्पवित्रमनसः स्वहितैकताना ।
भव्या जिनेन्द्रगदिते शिवशर्मबीजे ।
धर्मे रतिं दृढतरां कुरुत प्रमोदात् ।
लोकद्वये भवति शर्म यतः सुलक्ष्मीः ॥288॥

(मालिनी)

स जयतु जिनदेवो देवदेवेन्द्रवन्द्यो
गुणमणिगणरुद्रो नेमिनाथो विशुद्धः ।
मदनमदविदारी सर्वसन्देहहारी
परमपदविधाता सर्वकल्याणकर्ता ॥289॥

तदुदितवरवाणी केवलज्ञानखानिः
विशदसुखविलासश्रेणिरत्यन्तशुद्धाः ।
मम मनसि विशुद्धे स्थापिता सर्वदा वै
दिशतु विपुलभक्त्या क्षायिकीं दृष्टिलक्ष्मीम् ॥290॥

(शार्दूलविक्रीडित)

गच्छे श्रीमतिमूलसंघतिलके सारस्वतीये शुभे ।
विद्यानन्दिगुरुप्रपट्टकमलोल्लासप्रदो भास्करः ।
ज्ञानध्यानरतः प्रसिद्धमहिमाचारित्रचूडामणिः ।
श्रीभट्टारकमल्लिभूषणगुरुर्जीयात् सतां भूतले ॥291॥

(स्रगधरा)

प्रोद्यत्सम्यक्त्वरत्नो जिनकथित महासप्तभंगीतरंगैः ।
निर्द्धूतैकान्तमिथ्यामतमलनिकरः क्रोधनक्रादिदूरः ।
श्रीमज्जैनेन्द्रवाक्यामृतविशदरसः श्रीजिनेन्द्रप्रवृद्धिः ।
जीयान्मे सूरिवर्यो व्रतनिचयलसत्पुण्यपण्यश्रुताब्धः ॥292॥

मिथ्यावादान्धकारक्षयकरणरविः श्रीजिनेन्द्रांह
पद्मद्वंदे निर्द्वंद्वभक्तिर्जिनगदितो महाज्ञानसिन्धुः ।
चारित्रोत्कृष्टभारो भवभयहरणो भव्यलोकैकबन्धुः ।
जीयादाचार्यवर्यो विशदगुणनिधिः सिंहनन्दी मुनीन्द्रः ॥293॥

(मालिनी)

यस्योपदेशवशतो जिनपुंगवस्य।
नेमेः पुराणमतुलं शिवसौख्यकारि ।
चक्रे मयापि मतितुच्छतयात्र भक्त्या ।
कुर्यादिदं शुभतमं मम मंगलानि ॥294॥

(स्रगधरा)

शान्तिकान्तिसुकीर्तिसकलसुखयुताम् सम्पदामायुरुच्चैः
सौभाग्यं साधुसंगमं सुरपतिमहितं सारजैनेन्द्रधर्मम् ।
विद्यां गोत्रं पवित्रं सुजनजनशतं पुत्रपुत्रादितात्यम् ।
श्रीनेमेः सत्पुराणादिशत्रुशिवपदं वोऽत्र भव्याः पवित्रम् ॥295॥

इतित्रिभुवनैकचूडामणिश्रीनेमिजिनपुराणे भट्टारकश्रीमल्लिभूषणशिष्याचार्यश्रीसिंहनन्दिनामांकिते ब्रह्मनेमित्तविरचिते श्रीनेमितीर्थंकरपरमदेवपञ्चमकल्याणकव्यावर्णनो नामपद्मनामनवमबलदेवकृष्णनामनवमनारायणजरासन्धनाम प्रतिनारायणचरित्रव्यावर्णनो नाम षोडशोऽधिकारः समाप्तम् ॥

अकारादिक्रमेण श्लोकानुक्रमणिका

अ

ई

उ

ए

त

द

म

संदर्भग्रन्थसूचिका

(क)आधारभूताः पाण्डुलिपयः

1. नेमिनाथपुराणम् – ब्रह्मनेमिदत्तकृत पाण्डुलिपिः,श्री दि.जैनमन्दिर बड़ा तेरह पंथियों का जयुपर (सान्द्रमुद्रिकामाध्यमेन प्राप्ता)
2. नेमिनाथपुराणम् – ब्रह्मनेमिदत्तकृत पाण्डुलिपिः, श्री दिगम्बर जैन मन्दिर महासंघ,जयपुर (सान्द्रमुद्रिकामाध्यमेन प्राप्ता)
3. नेमिनाथपुराणम् - ब्रह्मनेमिदत्तकृत पाण्डुलिपिः,श्री दि.जैनमन्दिर बड़ा तेरह पंथियों का जयुपर (सान्द्रमुद्रिकामाध्यमेन प्राप्ता)
4. नेमिनाथपुराणम् - ब्रह्मनेमिदत्तकृत पाण्डुलिपिः, श्री दिगम्बर जैन मन्दिर महासंघ,जयपुर (सान्द्रमुद्रिकामाध्यमेन प्राप्ता)

(ख) प्रकाशितसहायकग्रन्थाः

1. नेमिनाथपुराण - वाग्भट्ट, श्री दि.जैनमन्दिर बड़ा तेरह पंथियों का जयुपर, 1875
2. भगवान अरिष्टनेमि और कर्मयोगी श्रीकृष्ण एक अनुशीलन – देवेन्द्रमुनि शास्त्री, श्री तारक गुरु जैन ग्रन्थालय पदराड़ा, (राज.), 1971
3. नेमिनाथ महाकाव्यम् – श्रीकीर्तिरत्नसार, अगरचन्द नाहटा, बीकानेर, 1975
4. श्रीनेमिनाथ पुराण – उदयलाल कासलीवाल, दि.जैन पुस्तकालय,गांधीचौक-सूरत, वि.सं.2011
5. नेमिनाथचरित्र – पं काशीनाथ जैन, आदिनाथ हिन्दीजैन साहित्यमाला पुष्प2, 1956
6. हरिवंश पुराण – आ.जिनसेन,सम्पादक-डॉ पन्नालालजैन साहित्याचार्य भारतीयज्ञानपीठ, नौवां संस्करण,2004
7. पद्मपुराण(भाग1) – रविषेणः, अनु. पन्नालालसाहित्याचार्य,भारतीयज्ञानपीठ,काशी,1959
8. उत्तरपुराण – गुणभद्राचार्य, सम्पादक- डॉ पन्नालालजैन साहित्याचार्य भारतीयज्ञानपीठ, तृ.सं. 1989
9. चौबीसतीर्थंकर महापुराण – ब्र हरिलालजैन,श्रीकुन्दकुन्दकहान सत्साहित्य प्रकाशन केन्द्र, 1994

10. त्रिशष्टिशलाकापुरुष – श्रीमद्हेमचन्द्राचार्य,अनुवादक-श्रीकृष्णलालवर्मा, श्री गोढीजीजैन मन्दिर,मुम्बई,

11. वायुपुराण – महामुनिश्रीमद्व्यासप्रणीत, अनु.-रामप्रतापत्रिपाठी शास्त्री,हिन्दी साहित्य सम्मेलन प्रयाग,1987

12. उत्तराध्ययन सूत्र – श्रुताचार्यप्रवर्तकश्रीअमरमुनि (सम्पा.),पद्मप्रकाशन,पद्मधाम,दिल्ली,2011

13. श्रीहिन्दी जैन कल्पसूत्र- श्रीआत्मानन्दजैन महासभा ,पंजाब, 2000

14. दशवैकालिकसूत्र- आर्य शय्यंभाचार्य निर्यूढ,पं शशिकान्त झा (अनु.),सम्यग्ज्ञानप्रचारकमण्डल,जयपुर,2013

15. समवायांग- भगवत्सुधर्मस्वामी प्रणीत,श्रीमिश्रीलालजीमहाराज(सम्पा.),श्रीआगमप्रकाशनसमिति,ब्यावर (राज.)

16. आवश्यकनिर्युक्ति- आचार्यभद्रबाहुविरचित,पू.श्रीसुमनकुमारजी (सम्पा.),प्रो डॉ दामोदरशास्त्री (अनु.),आचार्यश्रीसोहनलालजैन ग्रन्थ प्रकाशन, अम्बाला,(हरि),2010ई.

17. अष्टाध्यायी – पाणिनिः, पुष्पदीक्षितः, ज्ञानभारतीपब्लिकेशन्स,दिल्ली,2009

18. जैन पुराणों का सांस्कृतिक अवदान – डॉ दरबारीलाल कोठिया,जैन विद्या संस्थान,महावीरजी (राज.),1993

19. जैन पुराणों का सांस्कृति अध्ययन – डॉ. देवीप्रसाद मिश्र, हिन्दुस्तानी एकेडमी,इलाहाबाद, सन्1988ई.

20. जैन-पाण्डुलिपियाँ एवं शिलालेख एक परिशीलन- प्रो.राजराम जैन,श्रीगणेशवर्णी दि.जैन संस्थान नरिया,वाराणसी (उ.प्र.), 2007ई.

21. पुराण विमर्श – बलदेव उपाध्याय, चौखम्बा विद्याभवन, वाराणसी,पं.सं., वि.सं.2039

22. जैन पुराण साहित्य, के.ऋषभचन्द्र, महावीर जैन विद्यालय स्वर्ण महोत्सव ग्रन्थ

23. पौराणिक साहित्य और संस्कृति- आ.भास्करानन्द लोहनी, शास्त्री रमा प्रकाशन,लखनऊ,1963

24. जैनपुराणकोश – प्रो. प्रवीणचन्द्रजैन (सम्पा.), डॉ.दरबारीलालकोठिया,जैनविद्यासंस्थान,दि.जैन अतिशयक्षेत्र महावीरजी(राज.),1933ई.

25. जैनेन्द्रसिद्धान्तकोश- क्षुल्लकजिनेन्द्रवर्णी,भारतीय ज्ञानपीठ(प्रका.) दिल्ली,1-1970ई.,2-1971ई,3-1972ई,4-1973ई.

26. पुराणों में इतिहास – कुंवरलाल जैन, इतिहास विद्या प्रकाशन,दिल्ली 1989

27. पाण्डुलिपि विज्ञान- डॉ सत्येन्द्र, राजस्थान हिन्दी ग्रन्थ अकादमी जयपुर, प्र.स. 1978

28. सामान्य पाण्डुलिपि विज्ञान- डॉ महावीरप्रसाद शर्मा, अपभ्रंशसाहित्य अकादमी, जैनविद्यासंस्थान,श्रीमहावीरजी,प्र.सं. 2003

29. शोधप्रविधि एवं पाण्डुलिपिविज्ञान- प्रो.डॉ अभिराजेन्द्रमिश्र, अक्षयवटप्रकाशन इलाहाबाद,प्र.सं.2008ई

30. पौराणिक संदर्भ कोश- किरण प्रकाशन हैदराबाद,डॉ एन.पी.कुट्टन पिल्लै,प्र.सं.1984

31. अभिधानराजेन्द्रकोश –श्रीमद् विजयराजेन्द्रसूरीश्वरजी,श्री अभिधानराजेन्द्रकोष प्रकाशन संस्थान,अहमदाबाद

32. बृहद् अनुवाद चन्द्रिका – चक्रधर नौटियाल हंस शास्त्री, मोतीलाल बनारसीदास प्रकाशन मुम्बई,सं.2003

33. साहित्य दर्पण – विश्वनाथ कविराज, चौखम्बा संस्कृत प्रतिष्ठान,दिल्ली,1987

34. काव्यालंकार – आचार्य भामहकृत, सम्पादक-डॉ.रमणकुमारशर्मा, विद्यानिधि प्रकाशन, दिल्ली,1994

35. काव्यादर्शः- पं शिवनारायण शास्त्री, परिमल पब्लिकेशन दिल्ली, प्र.सं. 2009

36. पाण्डुलिपि सम्पादन कला- डॉ रामगोपाल शर्मा दिनेश, प्रभातप्रकाशनदिल्ली, प्र.सं.1979

37. जैनदर्शन- डॉ महेन्द्रकुमार (लेखकः) श्रीगणेशप्रसादवर्णी जैनग्रन्थमाला,काशी,द्वि.सं.1966ई.

38. जैनधर्म- सिद्धान्ताचार्य पं.कैलाशचन्द्रशास्त्री,भारतदिगम्बरजैनसंघ,चौरासीमथुरा,तृ.सं.1955ई.

39. जैनधर्म का प्राचीन इतिहास- पं. परमानन्दशास्त्री,रमेशचन्द्रजैन मोटरवाले (प्रका.),दिल्ली,1975ई.

40. जैनसाहित्य और इतिहास- नाथूरामप्रेमी,हिन्दीग्रन्थरत्नाकर,हीराबाग-गिरगांव-बम्बई,प्र.सं.-1922ई.

41. भारतीयसंस्कृति में जैनधर्म का योगदान- डॉ.हीरालालजैन,मध्यप्रदेश-शासनसाहित्यपरिषद्,भोपाल,1962ई

42. तीर्थंकर महावीर और उनकी आचार्य परम्परा- डॉ. नेमिचन्द्र शास्त्री, अखिलभारतवर्षीयदिगम्बरजैनविद्वत्परिषद्,1974ई

43. भारतीय संस्कृति और अहिंसा – धर्मानन्द कौशम्बी,हेमचन्द्र मोदी पुस्तकमाला ट्रस्ट,1948

44. अनुसंधान स्वरूप एवं प्रविधि- डॉ रामगोपालशर्मा दिनेश, राज.हिन्दी ग्रन्थ अकादमी,जयपुर,1994

45. संस्कृतसाहित्य का बृहद् इतिहास(13खण्ड पुराण) - स्व पद्मभूषण श्रीबलदेवउपाध्याय (प्रधानसम्पा.) प्रो.गंगाधरपण्डा(सम्पा.), उत्तरप्रदेश संस्कृतसंस्थान,लखनऊ,2006ई

46. संस्कृतसाहित्य का इतिहास- प्रो. हंसराज अग्रवाल, चौखम्बा विद्याभवन,वाराणसी,1987


47. संस्कृतसाहित्येतिहासः – आचार्यलोकमणि दाहाल,कृष्णदास अकादमी वाराणसी,वि.सं.2050


48. जैन संस्कृत साहित्य का इतिहास- नाथूलालप्रेमी, बम्बईप्रकाशन,बम्बई,1982ई.

49. संस्कृतहिन्दीशब्दकोष- नवम संस्करण,वामनशिवरामआप्टे,न्यू भारतीबुक कॉरपरेशन,2005ई.

पाण्डुलिपिछायापृष्ठाः


‘अ’ प्रतिलिपेः प्रथमपृष्ठः






‘अ’ प्रतिलिपेः अन्तिमपृष्ठः


'ब' प्रतिलिपेः प्रथमपृष्ठः






'ब' प्रतिलिपेः अन्तिमपृष्ठः


‘स’ प्रतिलिपेः प्रथमपृष्ठः






‘स’ प्रतिलिपेः अन्तिमपृष्ठः

'द' प्रतिलिपेः प्रथमपृष्ठः





'द' प्रतिलिपेः अन्तिमपृष्ठः